रणांगकः पाकश्च घृतिपच्योरर्थः इत्यपादानत्वं बलाहकाद्विद्योततेकुसलात्पचतीत्यादौ तु निः
सरणांगकं विद्योतनं निःसरणांगकः पाकश्च घृतिपच्योरर्थः इत्यपादानत्वं नानुपपन्नं । एतच्च वाक्य
पदीयादौ स्पष्टं । तत्र प्रकृत्यर्थस्याभेदे न पंचम्यर्थे वधावन्वयः । तस्य चावधेर्निरूपकतासंबंधेन पतनादौ

सि॰र॰ ख
२६२
262

सच धर्मैर्यवनन्तधर्ममात्रे ऽव्हतोदनास्थालीन्यत्र सामान्नाधिकरण्यादर्शनादिति नव्याः। वस्तुतस्तु अथ
ष्ठाधेयत्वं व्रीहिप्रतिबंधादिना प्राग्दूषितत्वात् धर्मापि च स्पर्यवः किन्तु निरुक्तावधित्वसम्बन्धियत्वमवं
डोयावधिरूपमर्यादात्वमेवात्र च प्रकृत्यर्थस्याधेयत्व पाव्वयः। प्रत्ययार्थस्य च स्वनिरूपकविभागज
नकतासंसर्गेणाधारत्वेऽर्थाः। अस्य वृत्त्ययादानत्वनिरूपकविभागजनकं चैत्र वृत्तिकर्तृत्वनिरूपकं पतन
मिति बोधो भाष्यानुसारिणां। नैय्यायिकास्तु अक्ले लक्षणोधात्वर्थानाश्रयत्वं क्रियावत्प्रतियोगिकभे
दाश्रयत्वं प्रतियोगितावच्छेदिका क्रियापाकर्तृ प्रतिव्याप्तिवारणाय सन्यं तु उदासीनपर्वतादावतिव्याप्तिवा
रणाय विशेषणदलं विभागो भेदस्य च पंचम्यर्थः। प्रकृत्यर्थस्याधेयतया द्विविधेऽपि पंचम्यर्थेऽन्वयः। तस्य
च जनकत्वप्रतियोगितावच्छेदकत्वसंसर्गाभ्यां धात्वर्थे। तथा च वृक्षवृत्तिविभागजनकवृक्षवृत्तिभे
दप्रतियोगितावच्छेदकपतनानुकूलकृतिमांश्चैत्र इति शाब्दबोधः इत्याहुः। तन्न। नानेकशक्तिकल्पना राम
प्रसंगात्। प्रकृत्यर्थस्यावधित्वे बोधाभावाच्च वृक्षं त्यजती त्यत्र विभागस्य फलत्वेनैवविवक्षणात्तदाश्र २६२

यस्य कर्मत्वमेवेत्युक्तं। परां स्पंदते इत्यत्रासनाच्चलितो राज्याच्चलित इति वहुव्रीहादिति हस्त्यस्यापायपा
दानत्वमस्त्येवेत्याहुः। तच्चिंत्यं। स्पंदेः कंपनमात्रार्थकत्वे विभागं विना विधित्वात्रुपपत्तेः। पतत्यर्थ
कत्वे संदेहाभावाच्च। आसनाच्चलित इत्यादेरपि विभागानुकूलव्यापारस्य धातुवाच्यत्वे सत्ये
वसाधुत्वमित्यवधेयं। वृक्षस्य पर्णामिति। इह वृक्षः पतितविशेषणं न तु क्रियान्वयीत्यकारक
मिति भावः। यत्तु ग्रामादागच्छति शकटेनेत्यत्र परत्वात्करणसंज्ञया बाधितत्वाद्वृक्षस्य पर्णा
८६ मित्यत्राकारकत्वाच्चानिव्यादेरभावो ध्रुवग्रहणं व्यर्थमिति हरदत्तेनोक्तं। यच्च कोसलमादौ
तच्चिंत्यं। कारकत्वस्य व्यापकधर्ममात्रविवक्षायां साधकतमत्वेव विवक्षाभावदशायां करण
संज्ञायाश्चाप्रसंगेनापादानसंज्ञायाः दुर्वारत्वात्। ताभुवः प्रभवः इत्यत्र त्यग्रंथेन ध्रुवमित्यादि स
त्रस्थस्वग्रंथविरोधाच्चात्। जुगुप्सेति। जुगुप्सानिंदा। विरामो विरतिः। प्रमादो ऽनवधानता। एतदर्थ
कानां धातूनां कारकमपादानसंज्ञकमित्यर्थः। संयोगपूर्वकस्यासुखापायस्येहाभावान्सूत्रेणा प्रा

क४

सि०र०ख
२६३
263

भोवार्त्तिकारंभः भाष्यकारस्तु कारकप्रकरणेतमयहरणेनगोरासुरक्ष न्यायेनाश्रीयतइतिज्ञापना
दत्राधिनिंदादिपूर्वकनिवृत्तिवाचित्वमेषाममपेक्षे न्यासस्तु रक्षामपि बुद्धिकृतमपायमाश्रित्येदं वार्त्ति
कंभीत्रार्थानामित्यादिसप्रस्तत्रारोचप्रत्याचष्टेयत्तु निवृत्त्यादिरूपधात्वं तरार्थविशिष्टस्वार्थवृत्तित्व
माश्रित्यसूत्रवार्त्तिकप्रत्याख्यानमुख्यार्थमादायषष्ठीप्रयोगोऽतुवीरः।अनभिधा[illegible]नं बुसास्त्रमाश्रि
त्यप्रत्याख्यानंतु नमनोरमं।तत्समानसूत्रवार्त्तिकमानमेवेहप्रबलमित्येवं कौस्तुभे भाष्यदूषितं
तन्नायुयोत्तरमिति न्यायेनषष्ठ्याः शत्वाहृष्टिकशास्य बुद्धिकृतमपादानत्वं नेहविवक्षितमित्यादि
स्वीयकौमुदीव्याख्यानुसंधानमूलकत्वाच्च भीत्रार्थानां चोरादितो हेतुरुपयं चसमर्थः।अनिष्टज्ञानमनिष्टा
भावानुकूलव्यापारश्च क्रमेणार्थात्व[illegible] नयाचचोरहेतुकानिष्टज्ञानं चैत्रवृत्तीति चोरहेतुकानिष्टा
भावानुकूलव्यापारश्चैत्रनिष्ठइति च बोधः भीत्रार्थे किं।आघ्नुपरपतितानचकर्मत्वेन बाधः शंक्यः।कर्म राम
त्वाविवक्षायां कारकशेषत्वे षष्ठी वाधित्वाय घमीप्रसंगात्।भयहेतुः किमिति।अरण्यपस्यापाधिकरणसंज्ञा २६३

८न४

अथ स्वार्थोद्दीपनत इत्यत्र कथमपादानत्वं । कर्त्रेरितनीपापान्याप्यत्वात् दानवेहकर्मवदभिदेहाः स्वध्वः । अहानेः कर्मस्थक्रियत्वाभावात् ।
किं च स्वार्थस्य कर्तृताविरहे चैत्रस्य कर्मत्वाभावात्कर्मणि लकारो न स्यात् इति चेन्न । कर्मण्येव लकार इति संप्रदानसूत्रे कैयटोक्तेः । न स्या
पंभावः । स्वार्थेनेति कर्तुरितनीयाप्राप्तो फलीभूतोपायानुकूलव्यापाराश्रयस्य स्वार्थस्यावधित्वमात्रविवक्षायां पंचमी । कर्मसंज्ञायां स्वा
श्रोपलक्षणं कर्तृग्रहणमिति तत्रैव सूत्रे कैयटोक्त्या हानक्रियायां स्वतंत्रेणापादानेनेष्यमानस्येह कर्मत्वं भ्रमेवेति नहि सं । भाषेष्वंवश्रा
नीमत्र कर्मत्वे प्यप्यसवस्तु नो भट्टोजपत्स्यातं तदा अपत्वात्तेनेष्यमानानां भाष्याणामपि कर्मसंज्ञापत्तेः । अत एव कर्मणि द्वितीयेति सू
त्रशेषे कैयटेनोक्तं । अथोजकव्यापारस्य शब्दार्थत्वात्तदपेक्षं कर्मत्वमयुक्तमिति नीतिकौस्तुभकृतः । अत्रेदं वक्तव्यं । कर्मसंज्ञायां कर्तृग्रहणं
स्वातंत्र्योपलक्षणमित्यस्य स्वरसेऽनेन भवतां तात्पर्यमुत स्वार्थस्यापादानत्वस्वरसेऽनेन । नाद्यः । शत्रून् गमयत्स्वर्गमित्यादौ स्वर्गादेः कर्मताप्रस
ङ्गे न स्यात् सर्वसंमतत्वात् । न द्वितीयः । भाषाणां कर्मत्वस्य भवन्मतेऽपि दुर्वारत्वात् तदापादनपरभवद्ग्रन्थासंगत्यापत्तेः । अथ यदाह्दंधननि
रूपितमवधिकरणत्वं कल्प्यमानमभ्युपगमनिरूपितं कर्मत्वापेक्षया प्रबलमिति मम न दोष इति चेत्सत्यं कैयटमते पीतियत्किंचिदेतत् ।
फलीभूतोपायानुकूलव्यापारात्मकस्य हानस्य प्रकृते शाब्दत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । इत्यवधित्वव्यापाराश्रयत्वयोर्गुण
एतेनापादानेवाहीयकहोरितिसूत्रे माषाणां कर्मसंज्ञामापादयन्हरदत्तोऽपि परास्तः ॥

पद्धिवज्ञायांपरत्वात्कर्तृसंज्ञैवामस्त्वपादानसंज्ञायीतिसर्वमनवद्यं।यदपि अतएवकर्मणिद्वितीयेत्यारभ्यकर्मत्वमयुक्तमित्यंतमुक्तंतद्वि
न। अशाद्यर्थत्वादिति ब्रुवताग्रन्थेन विरोधस्य परिहृतप्रायत्वात्। शद्दृतोर्थतोवा तादृशकैयटस्वतन्त्रादर्शनाच्च। हरदत्तमाधवौ तु सार्थाद्वी
यतद्दृत्त्र कर्मकर्त्रीर्लकारस्त्याहतुः। तथाहि। अपगमनाज्जहातेरर्थः। सात्वद्दृडपधानादिनादेवदत्तस्यापगमने तत्समर्थावरणं।य
दातद्दृडपधानादिनास्वयमेवापगच्छतितदाकर्मकर्तृत्वमितिनच्चात्रापि तद्देवतादिग्रिपयत्वान्तत्रापरसिद्धतादृशक्रियापरत्वेजहातेः कर्म
णीयमितिदोषो वन्नमलेयायते [redacted] ॥ कि
व। सार्थाद्वीपतेरन्नकृत्यादिनस्यात्। नृदृपधानादिनाद्वन्द्वस्यस्वतोऽपगमनायोगात्। अपिच। सार्थी अ
द्दृतोहीनइतिध्रुवमपायेइतिसूत्रेभाष्यं नच दृत्तादिमतेऽनुपपन्नमेवस्यात्। लकारवाच्यत्वेवकर्तुः
कर्म वदतिदेशो धतिराद्धान्तात्। नवगत्यर्थाकर्मकेतिकर्तर्यपिवन्तः सुवन्तः। अपिनुन्दितकर्मकारणाम
कर्मकग्रहणेन ग्रहणात्तत्रनेष्यतइतिनव्याः कैयटसंमतमितिलः कर्मशिवेतिसूत्रेवन्ध्यमाणत्वात्।
यत्तुभिन्नः कुशूलइतिकर्मकर्तरिगत्यर्थाकर्मकेतिन्तोभवत्येवेतिकर्मवत्सूत्रेकैयटेऽवदत्। तन्नु
मतान्तराभिप्रायेणेतिद्रष्टव्यम्। अन्यथाऽऽशितः कर्तेत्यत्रस्त्वोन्तस्सिद्धान्तविरोधस्तादृक्प्रयोगस्याप्यु रा.म.
त्वफलकर्मवत्सूत्रस्थभाष्यव्याकोपश्चेत्यवधेयम्। तच्च तत्रैवस्फुटीकरिष्यामः। तस्मात्कर्मस्त्वे वन्नु २६३
इतिकैयटमतेभाष्यंसुयोजमितिदिक्॥ द्विशतसविकत्रिषष्टितमपत्रस्य निरङ्कपृष्ठेवतुर्थपङ्क्तौ शोधोयम्

परत्वाद्बाधिके तिलग्रहणं चिंत्यमिति कौस्तुभ उक्तत्वात्किं तेनेति प्रश्नः। इतरस्य कारकशेषत्वविवक्षायाम
नियमः संगच्छते। कौस्तुभोक्तमसदित्याशयेन प्रत्युदाहरति अश्वस्य इति। सप्तम्युपलक्षणमित्यरण्यस्य
चौराद्बिभेतीतिवन्न स्यादिति भावः। अत एव कस्य बिभ्यति देवाश्च जातरोषस्य संयुग इति रामायणोक्तस्य
संयुग इत्यस्यान्वयः। तस्य च बाधिकरणसंज्ञाबाधिका। तदविवक्षायां त्वपादानमस्मत्स्यैवेति स्वोक्ते संग
च्छते। पराजेः। अनिष्टसाधनत्वेन विवक्षितोऽर्थः सोढ इति व्याचष्टे। असह्य इति। अध्ययनादिति।
जन्यत्वं पंचम्यर्थः। अनिष्टं पराजेरर्थः। अध्ययनजन्यानिष्टं चैत्रवृत्तीति बोधः। कारकशेषत्वेन ष
ष्ठ्यां प्राप्तायां वचनं। असोढः किमिति। सर्वत्रान्तरं स्वविषये परत्वाद्बाधकं भविष्यतीति कौस्तुभे तस्य
प्रत्याख्यानात्किं तेनेति प्रश्नः। उत्तरं पूर्वोक्ताशयेन प्रत्युदाहरति। शत्रूनिति। नात्र शत्रवोऽनिष्टसाधनं
किंत्वनिष्टाश्रया एव। तथा च शत्रुनिष्ठानिष्टानुकूलश्चैत्रनिष्ठो व्यापार इति बोधः। यवेभ्यो गामिति
। वृत्तित्वं पंचम्यर्थः। यववृत्तिसंयोगानुकूलव्यापारस्य गोवृत्तिनिरोधाभावस्तदनुकूलव्यापारश्चैत्रवृत्तिरिति

सि॰ सु॰ बोधः। वारयतिद्वेत्रे इति। अधिकरणस्यशेषत्वविवक्षायामिदंप्रत्युदाहरणं। अन्यथापरत्वादधिक
२६४ रणत्वं बाधकंभविष्यतीति। अपित्रग्रहणं चिन्त्यमिति कौस्तुभोक्तरीत्या व्यर्थं स्यादिति भावः। अंतर्द्धौ। सत
264 म्यर्थीयं। ननु निमित्तात्कर्मयोगे इति। तत्र हि निमित्तशब्देन फलं गृह्यते तेन कारणाज्ञानेन बद्ध इत्यत्रा
तिप्रसंगात्। नचेहांतर्द्धिः फलं किंत्वदर्शनमेवेति। येनेतिनुकर्तरि तृतीया। उभयप्राप्ताविति नियमा
द्विन कृद्योगषष्ठी। नचोत्तमनइत्यस्य कर्मणो प्रयोगात्कथमिह नियमप्रवृत्तिरि[illegible]। उभयप्रा
प्ताविति नियमाद्वाक्ये तिवाच्यं। तस्य गम्यमानत्वादिति प्राञ्चः। तच्चिन्त्यं। अथशब्दानुशासनमित्य-
त्र कर्मणि चेतिसमासनिषेधप्रसंगात्। आचार्यस्य तत्रापि गम्यमानत्वेनोभयप्राप्ताविति त्यस्य कुर्वा
णत्वात्। समासभंगीकुर्वाणेन कैय्यटेन सह विरोधाच्च। अन्यथैषा यवप्रश्न इत्यत्रापि समासो न स्या
त्। तस्मात्कर्तुः करणत्वविवक्षायां तृतीयेत्यवधेयं। मातुरिति। प्रत्यक्षाभावे ह्यात्मकः सन्निकर्षाभा राम
वोधात्वर्थः। पंचम्यर्थो हेतुत्वं तच्च प्रत्यक्षाभावेऽन्वेति। मातुरिति प्रत्यक्षाभावे ह्यात्मकः संनिकर्षाभा २६४

वइतिबोध्यः।चोरानिति।कर्मत्वस्यशेषत्वेनविवक्षायामिदंप्रत्युदाहरणंबोध्यं।तेनांनर्द्दीविति चिंत्यमिति
कौण्डभट्टोनिरस्तः।आख्यातोपयोगेनियमपूर्वकेति।तत्रैवोपयोगग्रहणाद्दोहः इतिभावः।आख्यातादित्येत
त्तजंतंतद्व्याचष्टे वक्केति।नटस्येति।गाथाकर्मकश्रवणंविशिष्टंधात्वर्थः।तत्रभाविष्यगाथायांनटस्या
न्वयात्कारकत्वमस्ति।यद्वानटस्यपूर्वधात्वर्थेऽन्वयः।यश्चाशृणयतीतिभावः।जनिकर्तुः।जननंजनिः।इत्र
जादिभ्यइतीञ्।जननक्रियायाःकर्ता।अर्थासंगत्यपधालोपयोःप्रसंगात्।जनिवध्योश्चेतिनवृद्धिः।ततःशेषषष्ठ्या
समासोनतुकारकषष्ठ्यातृजकाभ्यामितिनिषेधात्।एतेनव्याकरणाधिकरणोऽर्थःशङ्क्यसमासानाम क ६
नुपपत्तिमुद्भावयंतोमीमांसकाःपरास्ताः।तत्रजनिकर्तेत्यत्रपाश्रयः।अंगादंगात्संभवसीति
धात्वंतरयोगेप्यपादानत्वदर्शनादेवंछितेफलितमाह।जायमानस्येति।प्रकृतिग्रहणंहेतुमात्रपरं
पुत्रात्प्रमोदोजायतइतिदर्शनादितिहरिदीक्षितास्तुपादानमात्रपरमितितुभाष्यकेपठन्।उभयसाधुत्वा
मुदाहरति।ब्रह्मणाइति।ब्रह्माहिरण्यगर्भः।सचनिमित्तमेवनतूपादानं।किंच।अविद्योपहित

वैनन्त्यं ब्रह्मतत्त्वप्रपंचोपादानमिति वेदांतसिद्धांतः। भुवः। भवनं भूः संपदादित्वाद्भावे क्विप्। पूर्वत्र समास
निर्दिष्टमपि कर्तृग्रहणमिहानुवर्त्तनेन स्यैव स्वरितत्वादित्याह। भूकर्त्तृ इति। प्रभवत्यस्मादिति
प्रभवः। ऋदोरप्। प्रथमप्रकाशनदेश इति। तथा चेदं नपूर्वस्त्रेणागतार्थमिति भावः। ल्यब्लोपे इति। ल्यब
न्तस्य गम्यमानार्थत्वात् प्रयोगः इत्यर्थः। यत्स्मृतिपदवधित्वेनाश्रित्याध्वनः कालस्य निर्माणं परिच्छेदः
क्रियते तेन तद्रूप्यर्थः। तेन यं च युते नार्थद्वारा उक्ता न्निर्मीयमाणाध्ववाचिनः प्रथमासप्तम्यौ स्याताम्।
कालादिति। इहापि तत्प्रकृतादिति वर्त्तते। वनादिति। वनमवधीकृत्याध्वायोजनाख्यपरिमाणोनपरि
च्छिद्यते। योजनयदेनैव परिमाणि परिमाणायोरूपादानात्। उक्तत्वं प्रथमासप्तम्योरर्थः। तथा
च वनावधिकयो जनान्तरं ग्रामः। कार्त्तिक्यवधिक मासोन्तरमाग्रहायणीति च बोध्यः। अन्यारात्
र्थग्रहणमिति। व्याख्यानादिति शेषः। प्रपंचार्थमिति। न चेतरस्तव्यनीच पौरितिकोशान्नी चार्थे स राम
दं ग्रहणमिति वाच्यं। अस्मान्नारो मदोवेति वक्ष्यमाणविभक्तेरुत्पन्नेनैव सिद्धेः। न चैवं विरूपाणामपीति २६५

कृशेषः शंक्यः। अनुकरणा[redacted]नां स्वस्वरूपमात्रवाचकत्वेन समानार्थत्वाभावात्। नैवे
वं घटः पटो नेत्यत्रातिप्रसंगः। नञो भेदद्योतकत्वादिति वाच्यं। निपातानां द्योतकत्वाभ्युपगमात्। प
नुनियतप्रयोगा हि केचिदव्यया इति वचनमाश्रित्य परिजल्पश्चित्यं अर्थासंगते स्तस्परवपु
ध्यापमाणत्वाद्वा। नचैवमपि घटस्यान्योन्याभाववत्त्वादात्म्याभाव इत्यादावतिप्रसंगः। घटादि
भागो भेदो वा पटस्येत्यत्रैव धर्ममात्रवाचित्वेऽपि तस्पिंडुवरित्वादिति वाच्यं। भेदत्वेन भेदबोधक
योगे एवं च स्युरभ्युपगमात्। उक्तोदाहरणे तु तादात्म्याभाव एव प्रतीयते न तु भेदत्वेन। अतए
व घटोऽङ्के दवानित्यादौ सामवत्येवापद्दोऽस्य विधेरनित्यत्वज्ञापनार्थमितरथाग्रहणात्। तेनेष्टतो
व्यवस्थेत्यवधेयं। अनेकमादिति। पुरुषाराधनमृतेन इति कथमिति चेत्। प्रमाद इति हरदत्तः।
ननोन्यत्रापि दृश्यत इति दृशिग्रहणाद्वैत्रं पावदिति वहस्यापि साधकत्वमित्यपरे। अन्ये च द्विनी
येति चांद्राः। अपि लत्वपतीति। दिशि दृष्टेनि। रूपेति शेषः। तेनैंद्यादयो न दिक्शब्दाः। नन्वेवं ककु

सि॰ र॰ स॰ वादिग्रहणाप्रसंगः।मैवं।अजाहिप्रत्ययांतं हि सर्वनामप्रकृतिकं न तत्साहचर्याद्दिक्शब्दोपि सर्वना
२६६ मैव गृह्यत इत्यदोषः।इति कश्चित्।तत्र वक्तव्यं।अन्येतरसाहचर्याद्व्याख्यानाद्वा न ङेययनो वत्तिप्रसंगा
266 भावादेर्ज्ञादिग्रहणाच्चिंत्यप्रयोजनं।स्यादेतत्।अन्यतरपदमपि साहचर्याद्दिक्शब्द एव गृह्यत
इत्यंगीकार्यं।अन्यथा सघ्रड्·चैत्रात्स्म त्रातिप्रसंगात्।तथा च दिक्शब्दत्वादेव सिद्धे किं तेने
८५ त्याशंकां समाधत्ते।अन्यतरस्यामित्यादिना।वक्तव्यं तत्।अन्यतरपदग्रहणमपि व्यर्थं।षष्ठ्यर्थे तस र्थे
त्यत्र प्रत्ययग्रहणाद्रूपमाणात् सार्थप्रत्ययांतत्वविज्ञानार्थमिति प्राग्ग्रामादित्यादौ दोषाभावप्रसंगा
त्।अपि तु अन्यतरपदग्रहणमंगीकृत्य प्रत्ययग्रहणं चिंत्यमिति न व्याः।तत्रावर्णालाघवानुरो
धिन्या आस्माकी गिरस्त्वत्याप्यत्वात्।प्रभृतियोगइति।तदर्थकैरित्यर्थः।तथा च कात्तिक्याः
प्रभृतीति भाष्यं व्याचक्षाणेन कैयटेन ततः आरभ्येत्यर्थ इति व्याख्यातं।अपपरी।एतच्च शक्यम् राम
मवक्तुं।पंचम्यपाङिन्यनेन कर्मप्रवचनीययोगे पंचमीविधानेन संज्ञाज्ञापनात्।तानचार्थांतरे २६६

इश्युविरूपतीभावे इस्माव(त्व)न्तः। परुषवाचीश्रुन्त शब्दः २

यिपरेः संज्ञाप्रसंगः। अथेन साहचर्याद्वर्जनार्थस्यैव तदुपत्तेः। नचैव मपित्रपपरी तिसमासविधि
नायंचमीज्ञापनसंभवात्। किं पंचम्यपाङ्गित्यनेनेतिवाच्यं। अशुक्लादपगच्छति अशुक्लात्परिगच्छतीत्यत्रवि
भाषाग्रुरणाद्गतिहेतुपंचम्यंतेनैव समासविधिसार्थक्यात्तस्मात्पंचम्यपाङ्गित्यावश्यकमित्यनेनैव
विहितायापंचमीतदंतेनेवाव्ययीभावसमासोनतुहेतुपंचम्यंतेन। लाक्षणिकत्वात्। वचनग्रहणा
दिति। विनानेनेतिमर्यादासहतेनेत्यभिविधिरित्यत्रोपात्तो विशेषो वचनग्रहणसामर्थ्यान्नाश्रीयते
तेनावधिमात्रद्योतकस्य संज्ञाविधानादर्थद्वयसंग्रहः। पद्मामर्यादाशब्दश्च व्यतेयस्मिन्सूत्रेतन्ना
ङ्मर्यादाभिविध्योरितिसूत्रंतत्रपश्चाङ्डद्वयद्वन्यर्थः। अत्रेदमवधेपालाक्षणिकत्वेनहेतुपंचम्याव्य
यीभावाप्रसंगमद्विद्योमर्या भिविधियहर्णाचित्यमिति। पंचम्यपाङ्। अत्र पक्ष्वं स्याचतेनग्रहणाबहु
वचननिर्देशादित्याह। एतेरिति। पितुयस्मादित्यनेनेव स्त्वेरार्थ्ये पंचमीति हरदत्तः। तस्मात्कर्मप्रवच
नीययोगाभावात्। पदयिनिमित्तकारणेतिपंचमीतिकश्चित्तानदपि। निमित्तादिशब्दानां प्रयोगाभा

दा ३

परिरत्रेति। अत्र पञ्चमी विधौ। प्रतिनिधि। अत एव लिङ्गादाभ्यां योगे पञ्चमी।१

सि॰र॰२३ तापदपि निमित्तकारणोति पंचमीति कश्चित् तन्न अपि ना। निमित्तादिशब्दानां प्रयोगाभावात्। अन्यथा वा
२६७ र्निके पर्यायाणां एष्वपि हि इदंशब्दे व्यर्थापत्तेः परिरत्रेति। अत्र पंचमी विधौ। प्रतिनिधि। अत एव लिंगादा
267 भ्यां योगे पंचमी। परिहरे इति। हरिवर्जोपि इत्यर्थः। परेर्वर्जने वा वचनमिति द्विर्वचनाभावः। मुख्याला
भेन तत्सदृशो यादानं प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानं। प्रघकम इति। पुरा दोषममनिरू
पितसादृश्य वा न प्रघक इत्यर्थः। पंचम्यर्थस्य दृष्टस्य प्रतियोगितया। अकर्तरि हेतुभूतमिति हेतावित्य
नुवर्तते इति भावः। तत्रोपापवादोपाख्याने नेति उत्तमर्णीय धार्यमाणान्यान्तमरणं तत्प्रयोजकोऽहे
तुश्चेति चकारात् ... संग्रहः। चात त्रैव त्रैरीति प्रयोज्यकर्त्री व्यध्याहार्यः। ननु शतशब्दात्कर्तरि ततीयां
बाधित्वापवादत्वात्पंचमी स्यादिति भावः। पागविभागादिति। हेतुमनुष्येभ्यः त्यत्र पदमंजर्यास्त
इमिहं वा कुलके प्रशाने स्तथा दृष्टेरिति विचार्यकं कन्तिर्हे शोपीहि लिंगं। द्रष्टव्यं विना। पर्यायत्रयापाया। राम
दानं पयोपां तरनिस्तु पंथा मनहिरू इदे वदत्तस्य त्यत्र नाइहदृष्टवंशा नाजमिरिति स्तुवचं वास २६७

तिकाशिका४

वृत्तौतुनैतदुक्तम् १
तत्र १

इति भाष्यकृत् १

सुब्रयेति ॥ नियातानामनेकार्थत्वादितिभावः ॥ पंचमीति ॥ मंडूकप्लुत्यापंचम्यनुवर्त्तनं द्विती
यानुसंनिहितेवेत्य[illegible] सन्यपिमुनित्रयवचनेप्रयोगानुरोधादेवंव्याख्यानमिति[illegible] ह [illegible] दत्तादयः ॥
धानं ॥ उक्त व्याख्यानस्यभाष्यारूढत्वं नास्तीत्याह ॥ स्तोकेनेति ॥ तृतीयापंचम्योः करणत्वमर्थः ॥ करणं किं
लोकं चलतीति क्रियाविशेषणं कर्मणो मा भूदिति ॥ नच क्रियाया विशेष्यत्वाद्द्रव्यत्वात्तावदप्यभावा ॥ तद्विशेष
कत्वकमेतरकारकलिंगानन्वयित्वमात्रेणासत्त्वरूपायास्तस्या विशेष्यत्वमात्रेणाद्रव्यत्वात्सि
द्धेः ॥ दूरं दूराद्दूरेणवेति ॥ इहोत्तरसूत्रस्थचकारात्सप्तम्यपि विधास्यते ॥ किंच दूरान्तिकार्थेभ्यइत्य
स्यसप्तम्यधिकरणे चेत्यत्रानुवर्त्तनादधिकरणेभ्योविभक्तिचतुष्टयं द्रष्टव्यं ॥ पंथा युज्यते च
दूराद्दावसथान्मूत्रामिति ॥ आवसथस्य दूरे इत्यर्थः ॥ असत्त्वेति ॥ सत्त्ववचनत्वे हि तद्विशे
षकत्वं तथा च सामानाधिकरण्येन द्रव्यविशेषणीभावापत्तौ तदा दूरः पंथा इति ॥ ॥ इ
ति पंचमी ॥ षष्ठी शेषे ॥ उपयुक्तादन्यः शेषः ॥ स च कइत्याशंकायामाह ॥ कारकेति ॥ तथा च क

८ र्मत एव नाप्राप्तायां षष्ठ्यां विधीयमानात्तृतीयातां नित्यं माबाधिष्टेत्यन्यतरस्यां ग्रहणं तेन षष्ठीसमावेशः सिद्धं न
८ दिति भाष्ये स्थितम् ॥ तथा च रूषष्ठ्या सहवृतस्रो विभक्तयः फलिताः ॥ मूलमप्येवमेव सुयोजम् ॥ मनोरमा तातुभा
८ ष्यसिद्धान्तानुद्भावनान्न्यूनेत्यवधेयम् [illegible] न्यतरस्यां ग्रहणं पंचमी समुच्चयार्थमेवेति तन्न

सि॰र॰त्त
२६८
268

मादीनां शक्यतावच्छेदकातिरिक्तसंबंधत्वरूपशक्यतावच्छेदकावच्छिन्नः संबंध एव शेष इति [redacted]पलि
तं तदाह स्वस्वामिवादिति। राज्ञ इति। यद्यप्यत्र राजा पुरुषाय ददातीत्यार्थिकं कर्तृत्वं राज्ञोऽस्ति तथापि राज्ञः
पुरुष इत्यत्र केनापि कारकसंबंधप्रतीत्यभावात् संबंधमात्रप्रतीतेर्भवत्ययं संबंधः शेषलक्षणाक्रांतः। नचैव
मपि राज्ञ इत्यादौ पुरुषान्वयस्योपपादनाय योगेऽपि विशेष्यात् षष्ठीप्रसंगः। विवक्षितार्थप्रतीत्यनुपपत्त्या विशेषणादे
व षष्ठ्यंगीकारात्। पन्तु पुरुषशब्दोपपायपदार्थं प्रातिपदिकार्थवृत्तिः कारकार्थको वेत्यशेषत्वान्न षष्ठीति न व्या
नेदं सारं। संबंधाभिधानाय षष्ठ्यामन्यतरस्माज्ज्ञाताथामपरस्य प्रातिपदिकार्थवृत्तित्वं तु वचनेन चेत्प्रथमत
एव विशेष्यात्किं न स्यादिति। पूर्वपक्षे भावत्कसमाधानस्यायुक्तत्वात्। पदद्वयप्रधानं शेष इति केचि
त्तदप्यसमंजसं शेषाभिप्रायेणोवक्तव्यवैचित्र्ये यंत्रराज इत्यत्र षष्ठ्यर्थः सेव्यत्वं सेवकत्वं वा। सच निरूपक
तयाऽऽधेयतया वा पुरुषेऽन्वेति। प्रकृत्यर्थस्तु आधेयतया निरूपकतया वा प्रत्ययार्थेन रथस्य प्रतीतौ त्या। राम
दौ तु धात्वर्थ एव षष्ठ्यर्थोऽन्वय इति प्राञ्चः। अन्ये तु विभक्त्यंतरेणा वैरूप्यापत्त्या षष्ठ्यर्थस्यापि साक्षात्पर २६८

परस्पा वा क्रियायामेवान्वयः। साक्षात्क्रियान्वये कारकत्वमिति तथा च तेनेत्याह। पुरुषस्यैव विशेषणात्वे तत्पु
रुषस्य राजेति भवति। संबंधस्तत्र चेत्र पीभयोर्विशेषणात्वे तु राज्ञः पुरुषस्य गौरित्यपीति बोध्यं। प्रत्ययप्रनिय
मे शेष एव षष्ठीति नियमार्थं शेषग्रहणं। अर्थनियमे तु व्यर्थं यत्र षष्ठी चान्या च प्राप्ना तत्र षष्ठ्येवेति निय
न ४ मादेवेष्टसिद्धेः। नन्वेवं माषाणामश्नीयादित्यादि न स्यादिति शंकां समाधातुमाह। कर्मादीनामपीति।
कर्मत्वादीनामित्यर्थः। कर्मादिपदे राश्रय एवोच्यत इति न व्यमनेन तु माषाभिन्नसंबंधवद्दशनमिति बो
धः स्यादिति भावः। विवक्षापामित्यनेनन्याय सिद्धमिदमित्यसूचीति भावः। सतामिति। कर्तृत्वसंबंधत्वे-
नाविवक्षितां सर्पिष इति कस्मात्वं। नचैवं ज्ञो विदर्थस्य करणे। अधीगर्थदयेशां कर्मणि। कृत्वः प्रतिपन्नेऽरु
जार्थानां भाववचनानामज्वरेः। आशिषि नाथः। जासिनिप्रहणनाटक्राथपिषां हिंसायां। व्यवहृपणोः
समर्थयोः। कृत्वोर्थप्रयोगे कालेऽधिकरणे इत्यष्टसूत्र्याः शेषषष्ठीविधानार्थापावेयर्थ्यं तस्याः समासनि
वृत्तिमात्रफलकत्वात्। तथाहि। शेषत्वेन करणत्वादौ विवक्षिते षष्ठी वस्याम्नतु तल्लुक्प्रयोजको भूतः समा

सि॰र॰त्र
२६९
269

सत्ऽ इति। न तु लुग्मात्र निषेधः शंक्यः। प्रतिपदविधाना षष्ठी न समस्यत इति वार्त्तिकात् तद्बोधस्तत्त्री सिद्धार्थ
कथं नु परस्मिन्पदे तत्। किंच मातुः स्मृतमित्यत्र समासाभावोपि फलं। निष्ठायोगे कारके निषेधात्। उक्तं चा- षष्ठी २
कारके व्यपदिष्टे च रूपमात्रा। क्रियेयं पुनः। प्रोक्तं प्रतिपदं षष्ठी समासान्निवृत्तये। निष्ठायां कर्मविषय-
षष्ठी च प्रतिषिध्यते। शेषलक्षणाया षष्ठ्या समासस्त्वत्र नेष्यत इति। नन्वेवं सर्पिषो ज्ञानं मातुः स्मरणमि-
त्यादीनाम समस्तानां साधुत्वे हरिस्मरणमिति नासिध्येत। मैवं। हरिसंबंधिस्मरणमिति निमध्यमपदलो-
पि समासाश्रयणात्। षष्ठीनन्युस्तथैव कृदुत्तरपदप्रकृतिस्वरः स्यात्। कर्मधारये तु समासान्तोदा-
त्तत्वमिति स्वरे विशेषः। परन्तु कारकषष्ठ्या समासे हरिस्मरणमिति साधु। कृदुत्तरपदप्रकृतिस्वरेण मध्यो-
दात्तं। शेषषष्ठीसमासे त्वंतोदात्तं स्यादिति स्वरार्थेयमष्टस्त्रीतिपरमतनिष्कर्ष इति नव्याः। तन्न। शेषष-
ष्ठीसमासेपि कृत्स्वरो दुर्वार इति प्राङ्निरूपितत्वात्। न च स्वरे विशेषाभावेपि प्रकारकृतवैलक्षण्यात्पमा राम
दाय षष्ठीसमासो दुर्वारः। तथा त्वेष्टव्याप्तेः। एवं च संबंधप्रकारकबोधविवक्षायां मध्योदात्तानां हरिस्म २६९

रराामित्यादौनामसाधुत्वंज्ञायपितुमियमष्टसत्रीतिपरमानिष्कर्षः॥यदद्यीयमष्टसत्रीसमासनिवृत्तिफलकत्वा
न्नेह व्याख्यातेतिप्रत्यत्राप्यिानदपिनाम्रूलेसर्वपुस्तकेपुतस्यादर्शनात॥सर्वनाम्नस्तृतीयाचा॥सर्वनाम्नइति
नपंचमीनष्यासान्निहेतुशब्दात्षष्ठात्तृतीयेनस्याता॥किंतुषष्ठीत्याह॥सर्वनाम्नः॥प्रयोगइति॥निमित्तपर्याये
तिपर्यायग्रहरास्यफलमाह॥एवमित्यादिना॥एवंचषष्ठीहेतुप्रयोगे॥सर्वनाम्नइतिसूत्रद्वयस्यफलंचिंत्या
असर्वनाम्नइति॥वृत्तिकृतापयपिसर्वनाम्नस्तृतीयाचेत्यत्रेदंवार्त्तिकंपठितंतथापिभाष्येहेता॥वित्यत्रेदंपठि
तमितिभावः॥षष्ठ्यतसर्थपंचम्या॥अपवादइति॥ततःपश्चात्संस्पृतेध्वंस्यतेचेतिभाष्यप्रयोगान्मपाछरयोगे
पंचम्यपिसाधुः॥एनपा॥तत्रागारंधनपतिंग्रहात्तुत्तरेरास्मदीयमित्यत्रउत्तरेरोत्येतत्तृतीयांतंनत्वेनवंतं
तत्त्वतो॥रराोनेत्यनेनसमानाधिकरणानातस्तत्रद्वितीयाप्रसंगः॥दूरांतिकार्थेः॥पंचमी[redacted]चेति॥अन्यतु
स्यांग्रहराासमुच्चयार्थी॥तेनदूरस्थापिपंचम्येवसमुच्चीयते॥व्याख्यानात॥ननुसंनिहितौपिद्वितीयातृतीये
इतिभावः॥यत्तुनतुषष्ठ्याद्वितीयातृतीयाइत्तिनश्वेतत्कं[illegible]॥षष्ठीग्रहरास्यसत्त्वएवभावात्तत्समुच्चयपनि

सि॰र॰त्त धायोगात् रजार्थो वक्तीति वचनः । वाकुलकात्कर्त्तरि ल्युट् प्रहृत्यर्थस्त्वविवक्षितः । तथा च भावो वचनः क
१७० र्तृयियां तदुक्त्वाशयेन व्याचष्टे । भावकर्तृकाणामिति । चौरस्य रोगस्येति । चौराद्वेषषष्ठी । रोगानुरूपयोगलक्षणा
270 रोगो हि चौरनिष्ठो रोगात्तरोत्पादकत्वेन कर्त्ता समासाभावः फलमिति स्पष्टत्वनापष्टस्योदाहरणा प्रत्युदाहरणो ८३
तु समासः फलमित्याह । चौरज्वर इति । भावकर्तृकाणामिति किं । भ्रेषम्ना पुरुषरूडजातीति प्रत्युदाहरणम् । अङ्कः के पदाद
यः । तत्र शेषत्वविवक्षायां षष्ठ्या अङ्गुन्दीरत्वात् । तस्मात् [illegible] भ्रमराः पुरुषरूडजेति प्रत्युदाहरणाय । दिवसस्तत्पूर्वस्रत्वेन
हि द्विष्ठौ वक्ष्यमाणेन यदि तयोरर्थ इत्यर्थो यस्येत्याशयेन व्याचष्टे । घ तेनेति । कुर्मतीति । इत्
शेषषष्ठीति न संबध्यते इत्युत्तरसूत्रद्वयारंभादिति न व्याप्तः । तच्चिन्त्यं यत्नेन समासार्थित्वेन द्वितीयाविधानार्थत्वे
न चोत्तरसूत्रद्वयस्यापि साफल्यात् । तस्मात् योगविभागादत्र शेषषष्ठीति न संबध्यते । अन्यथा पूर्वेण वैव दिवा यह
सां कुर्यात् न तदर्थस्येति न कर्तव्यमिति लाघवं । न चोत्तरार्थत्वात् योगविभागस्य नोक्तार्थज्ञापकत्वमिति वाच्यं । राम
। संकोचेमानाभावेन फलद्वयस्यापि स्वकेवलात् । प्रेष्यन्त्यवे । इत्यते दैवादिकस्य लोट मध्यमपुरुषैकवचनस्य १७०

ग्रहणं प्रेष्येति न त्वाहृवर्यात्तथा भूतस्यैव वक्तुवेरपि। अत एवेह शेष इति न संबध्यते नेति ङे नेन समासाप्रसंगा
दित्याहुः। कर्तृकर्मणोः। इह शेष इति निवृत्तं। कर्तरि च कृती निकृते पिचकारेण। कर्मग्रहणानुकर्षणासंभवे
पुनः कर्मग्रहणादित्याहुः। तच्चिन्त्यं। संनिहितस्याधिकरणग्रहणास्येवानुकर्षणाप्रसंगात्। तस्मात्स्फुघोगाव
षष्ठी समस्यत इति वार्त्तिकमेवेह प्रमाणं। तत्राप्यत एव न्यायसिद्धं। कृतीति किमिति। कर्तृकर्मण्योः क्रियाप
दमाक्षिप्तं न च तिङ्। तेहृदंतं वा। तत्रौदनं पचमान इत्याद्यर्थमावश्यके न लयोगे नेति निषेधेन तिङ्
नेप्यप्रसंगात्। पारिशेष्यात्कृत्येव पर्यवस्यतीति प्रश्नः। उत्तरं कृदंतोपस्थाप्यक्रियायायेकर्तृकर्मणी त
त्रैव षष्ठी यथा स्यात्तद्धितां तोपस्थाप्यक्रियायायेकर्तृकर्मणी तत्र माभूदित्याशयेन प्रत्युदाहरति। कृ
ते सर्वीकृतमिति। कृतं सर्वमनेनेति विग्रहे सुप्सुपेति समासो न तु विशेषणं विशेष्येणेति। वैशब्दस्य
क्रियाविशेषणत्वेन सामानाधिकरण्याभावात्। ततः सर्वादिनिः सपूर्वाच्चेति कर्तरि इनिः। नदुपदिकृ
तमिति कर्मणि कस्तर्हि केनकर्मणा उक्तत्वादिहाप्यनभिहिताधिकारान्न षष्ठी। तुल्य भाः। अथ भावे एकमप

 ८१

४ हरदत्त ॥ नतु तद्धितार्थे नैकार्थीभूतस्य कृतशब्दस्य निष्कृष्य कटेन संबन्धो नास्त्येव । क्रियया गुणभूतयापि कटः कृतवानित्यौविवका
रकाणां संबन्धाङ्गीकारात्करोतिक्रियामात्रापेक्षं कर्मत्वमन मिहितमित्युक्तार्थस्या नवकाशः । तथा न कृतानां
पिनिष्ठयेति षष्ठी स्यात्तन्निवृत्तये कटङ्कहराणामित्याह । तन्नु स्यो मू १ तंत्रान्यविरुद्धत्वादयुक्तमित्यनुपदमेव वक्ष्यामः । ४

सि-रू-स्र कर्मकत्वादेवा अतएव कटमित्यत्र द्वितीयापि स्वतरां किंच कृतशब्दस्य कटसापेक्षत्वेन समासतद्धिता
२७१ वप्यनुपपन्नाविति चेन्मैवं आश्रयेणावदलौकिके विग्रहे कटशब्दासंनिधानात्कर्मसामान्यवाचिना कृ
२७१ तशब्देन समासे वृत्तावर्थान्तरस्यैव प्रादुर्भावात्तेन कर्मत्वं नैवाभिधीयतेऽतः कर्मत्वस्यानभिधानाद्द्वि
तीयापवादः षष्ठीप्राप्तेर्वाऽनन्यपि हत्यनंतरं करोतिनाकर्तृनिष्ठव्यापारस्योपादानात्स कर्मकत्वमस्त्ये
वातद्धिते नैव कृते लक्षणोपादानात्तैवं कटमित्यस्यान्वयइत्यपरे । तथा च कटं पूर्वं कृतवानित्यर्थे
कृतपूर्वी कटमिति व्यत्याद्युतेगुणभूतक्रियायामपि कारकान्वयांगीकारात्कटमिति द्वितीयानानुपप
द्राष्येष न्नास्य षष्ठी चेत्तत्रैकपदीयोऽनैवमपि निष्ठायोगे षष्ठीनिषेधात्कटङ्कहराणां व्यर्थं कटङ्कहराणामप्र
सि द्धोदाहरणात्तैकार्थीभावानापन्ननिष्ठादियोगेन निषे [redacted] राम २७१
तादृगर्थकल्पनायांपक्ष ४ भावः । कर्तव्यपूर्वी इति भाष्यनिकृष्ट इति वन्दमारात्वात् । न वै
कटं भोक्तव्यपूर्वी ग्रादनमित्येव षष्ठ्युदाहरणासं १

यद्यपि कृत्त्वेवं यथास्यात्तद्धिताधिक्ये [redacted] माभूदिति कृद्ग्रहणम् । प्रजानातीति प्रज्ञः स
एव प्राज्ञः । स्वार्थे ण । व्याकरणं प्राज्ञः । ननु सत्यपि कृद्ग्रहणेऽत्र षष्ठी प्राप्नोति । कृ
दन्तेन योगस्य सत्त्वात् । न ह्येतत्कृक्यतेव न कृतम् । प्रत्ययार्थेनैकार्थीभूतकृदन्तस्य
निष्कृष्य व्याकरणेन संबन्धो न भविष्यतीति । प्रत्ययस्य स्वार्थिकत्वेनार्थान्तराभा
वात् । नैष दोषः । कृद्ग्रहणसामर्थ्यात्कृदन्तेनैव षष्ठी विज्ञास्यते । इह तु कृत्ता
तद्धितेन चैकरूपः संबन्ध इति षष्ठी न भविष्यतीति हरदत्तेन प्रयोजनान्तरमुक्तम् ।
तदपि चिन्त्यम् । व्याकरणं प्राज्ञः । ओदनं पाचकिः पुत्रं वैन्द्रमारितारित्या
दावपत्ये इञि कृदन्तस्य प्रत्ययार्थेनैकार्थीभूतस्य निष्कृष्य व्याकरणादिना
संबन्धाभावे षष्ठ्या दुर्वारत्वात् । उभययोगसंभव एवानियमप्रवृत्त्यौचित्यात् । न

वेष्टापत्तिः। कृतपूर्वीकटमित्यत्र सत्यप्येकार्थीभावे नियमार्थं कृदुग्रहणान्न षष्ठीति
भाष्यैकोपात्। अन्यथा न लोकेति निषेधाद्भाष्योक्तप्रत्युदाहरणमयुक्तमिति भव
दुक्तमसंबद्धं स्यात्। तस्मादविशेषेण कृद्योगाङ्गीकारो न्याय्य इत्यवधेयम्। किं च
कृदन्तेनैवेत्यस्य कोर्थोभिमतः। कृदन्तप्रकृतिकतद्धितेन तिङन्ततद्धितान्तेपदेवट
कतया कृदन्तं यत्र प्रविशति तत्र नेति आहोस्विदुभयत्र नेति। नाद्यः। कृतपूर्वीकटमित्या
दिभाष्योक्तप्रत्युदाहरणस्यद्धाङ्गविकल्पनापत्तेर्भोक्तव्यपूर्वीओदनं कर्तव्यपू
र्वीकटमित्यादिकौ स्तुभोदाहृतेऽस्मत्कल्पिते वाभिहितानाभिहितशङ्कारहिते कारण
पूर्वीकटं भोजनपूर्वीओदनमित्यादौ षष्ठीप्रसङ्गाच्च। नियमार्थं कृद्ग्रहणमिति वृद्धता
वाक्यभेदेन कर्तृकर्मणोरित्यस्यापूर्वविधेरवश्याङ्गीकार्यत्वात्। न द्वितीयः। प्रत्ययार्थेने

कार्थीभूतस्य निष्कुष्यकटादिना संबन्धाभावे भवदपि मतनियमायोगात्। न तृतीयः।
वाक्यभेदापत्तेः। तस्माद्धरदत्तोक्तं फलान्तरमुपेक्ष्यमेवेति भाष्यप्रत्युदाहरणबलेन
निषेधसंकोचो ज्ञाप्यते। प्रत्ययार्थेनोत्तरपदार्थेन वा लादेशादीनां यत्रैकार्थीभावस्तत्र
न लोकेति प्रतिषेधो नेष्यत इति भाष्योदाहरणात् घकारपुरस्परेफस्य द्वित्वनिषेधो ने
ति यथा कल्प्यते तद्वत्। विधेस्तु संकोचे मानाभावादविशेषेण षष्ठी भवति। तत्र त्वयं विशे
षः। तद्धितेनैकार्थीभावे कृद्ग्रहणात् षष्ठी न भवति। तद्भिन्नेकार्थीभावे तु कृद्ग्रहणे सत्यपि नि
षेधाप्रवृत्तेरविशेषेण ज्ञापनात् षष्ठी भवत्येव। तेन भाष्यमते यथा कृतपूर्वी कटमित्य=
त्र निषेधाप्रवृत्तावपि कृद्ग्रहणादेव षष्ठी न भवति तथा कुर्वतोपत्यं कौर्वतिः कटं कौर्वतिः कौ
र्वाणिर्वेत्यादावपि। तथा स्वार्थिकेष्वपि न सा। व्याकरणं प्राज्ञ इत्यत्रैव स्त्रौदनं पचन्तरः प

सि·र·स्तु·

(शोधपत्रद्वयमनङ्कः ९९२)　　　　　　　लि:२　　　　　　　लि:१

२७२ २७२ कवत्तरःपाचकतमइत्यादौ किंतुद्वितीयैव। इहतु स्यादेव षष्ठी। कटस्य कुर्व[redacted]द्वैं कुर्वाणा भक्तिक
वी[redacted]। कृतवतो भक्तिः कृतवद्वैं कटस्येत्राभस्य गतभक्तिरोदनस्य पानकागहाभि
त्यादौ। अत्रायसंग्रहः। तद्धितान्तानुपस्थाप्यकृदुपस्थाप्यभावना। तत्कर्तृकर्मणोः षष्ठी
भवेदेवाविशेषतः॥१॥ एकार्थीभावाविषयनिष्ठादौ सा निषिध्यते। कृतः कटो सौ मैत्रेण कृत
वांस्तेमन्तुयथा॥२॥ अतादृशे तु निष्ठादौ निषेधो न प्रवर्तते। कुर्वद्भक्तिः कटस्येति कृत
वद्भक्तिरित्यपि॥३॥ कृतपूर्वी कटमिति भाष्यान्निर्णयईदृशः। भयाकारिस्वरोम्नुष्या
सहस्रास्यात्रतत्त्ववित॥४॥ यत्तु भाष्ये कृतोऽथवेत्याद्युपक्रम्य· गुणभूतेपि कर्तरि
वाक्यभेदेन षष्ठीविधानोर्थः कुहराणाम्। रायन्तात्यपीयादौ भेदिकादेवदत्तस्य यज्ञदत्तस्य
काष्ठानामित्यत्रेत्युक्तम्। अत्रकैयटः। एतत्त्वविशेषापेक्षायां प्रयोजनमुक्तम्। यत्तु
पाचितऔदनो मैत्रेण चैत्रेणस्यादौ तत्र पाचककुणभूतेपि कर्त्तरि षष्ठीस्यात्प्राप्तै। नदाभिन्नराद्वा स्यपोः व्यानाव्यानयोः कर्त्रीरेकराद्दा २२८
अभावादितो भाभावात्षष्ठीस्थितीतिनेदं कृक्ष्रहणस्य प्रयोजनम्। तद्धितनिवृत्तिस्त्वप्रयोजनमेवेत्यवोचद्वरदत्तोप्येवमिति दिक्॥॥१



रावुसि४

भवादितिवा १

यम। नत्कनस्यवक्ष्यमाणात्वात्। [redacted]

सिनि वो चित्तयपाच तु [redacted]

[redacted] याप दपि श्रोदनं पच्यनेतरामि [redacted] तिस्यादितिकौस्तुभेक्तान दष्यातिश

यिकानीस्वार्थिकत्वेनैकार्थीभावाभावाङ्कुराीभूतलड्यांनिवृत्तेश्व लटातद्वितेनबाकमेणो

भिहितत्वात्तत्र यमाभविष्यतीत्यपेक्ष्यायदपिनलोकेतिनिषेधसम्भपेत्यक्तत एवेति भाष्योद

हरणांहरदत्तेन दूषितं। पत्रे कौस्तुभकृतानातद्भयमपिचिन्त्यं। [redacted] रीत्यानिषेधस्याप्राप्तेश्च [redacted] अत्र शोधः पत्रद्वयम्

[redacted]

५ नव्हतायोगेनापिनिषेधपेति एवं नित्ततदीयव्याख्याविरोधः

सिर॰ गु
२७२
२७२

[redacted] नस्माज्झाप्यो दाहरस्यास्य मां समर्थन संभवाद्दुरद
तादीनाम्महद्नामपि महानयंप्रमाद इतिप्युक्तमुन्यघ्या मध्न्यास्तातावत्तायन्तुवा ड्येपाधिकरस्यौका
रकारांाधात्वर्थान्वर्यागीकारेकाष्टेः पाकइत्यपिस्यादित्य्क्तं पार्थसारथिना। तन्नाकर्त्तकमरोगरित्या राम
घन्नुशासनादर्शनमूलकत्वात्। अनित्यमवायविधिं नदहीमितिनिर्दृशात्। तेनधयेरामोदमितिभट्टिरूप १७२

पन्नः॥ उभयप्राप्तौ कृतीत्यनुवर्तनादन्यपदार्थस्य शब्देनोपादानादुभयप्राप्ताविति बहुव्रीहिरिति व्या
चष्टे॥ उभयोरिति॥ तेनाश्चर्यं नामस्त्रोदनस्य पाको ब्राह्मणानां च प्रादुर्भाव इत्यत्र नायं नियम इति भावः
॥ स्त्रीप्रत्यययोरिति॥ स्तुद्वितीयोरिति॥ सूत्रे स्तुदायास्तुदो बाधनेन निहति स्कृ कर्तृकः करणस्य विवक्षया बोध्या॥
भेदिकेति॥ पर्यायाहरणीत्यनिष्ठितिवृचात्स्त्रीप्रत्यय इत्येक इति॥ अकाकारभिन्ने स्त्रीप्रत्यये पनियमः॥ पा
ह्निक इत्यर्थः॥ अविशेषेणेति॥ अकाकारभिन्ने कृन्मात्र इत्यर्थः॥ राज्ञां मत इति॥ मतिबुद्धिपूजार्थेभ्यश्चे
ति वर्तमाने क्तः॥ कथं तर्हि इडिनोपस्तुरास्तुरे स्त्वयाज्ञातो मयाद्वा न इत्यादि॥ अत्र ते क्तो भविष्यति॥ न च म
तिबुद्धीत्यनेन भूते क्तस्य बाधः शक्यः॥ तेनेत्यधिकारे उपज्ञातेति लिङ्गेनाबाधज्ञापनात्॥ अधिकर
णा॥ वाचिय इह रांसस्त्रोपलक्षणामि कृत्यर्थी तेनाधिकरणवाचित्वे सत्येव षष्ठी नान्यत्र इहेमि रासितमि
त्यादौ॥ एषामासितमिति॥ आस्यतेऽस्मिन्नित्यासितं॥ क्तोऽधिकरणे चेति क्तः॥ न लोकाव्ययनिष्ठाखलर्थतृ
कौ॥ लप्वकौ चेति विग्रहः॥ उकारेणानुबन्धविशिष्यते तेन न तदन्तविधिरित्याह॥ हृदित्युत्तरलक रिह्वदिति॥

२१

सि·र·म सर्वेषामिति। अनंतरस्येति न्यायादिति शेषः। शेषषष्ठी त्विति प्रकारः कृतवेलत्वाद्यसञ्ज्ञावादिति भावः।
२७३ अकेनोः। इह भाष्यकृद्व्याख्यानाद्यथासंख्यं नेष्यत इत्याह। भविष्यतीत्यादिना। भविष्यतीति स्वर्यत इति
तदधिकारविहितस्य नुमुन्नाबुलावित्यकस्य ग्रहणमित्याशयेनोदाहरति। सतः पालक इति। यस्क
273 कालसामान्ये राबुलून्नच्चाविति राबुलुक सूत्रनिषेधः। ओदनस्य पाचक इतीति भावः। ग्रंजगा
मीति। भविष्यति गम्यादय इत्यनेन भविष्यतीनिः। ननु गत्यर्थकर्मणि चतुर्थी च वेत्येव सिद्धे द्वितीयाग्रह
णमपवादविषयेपि तत्प्रवृत्त्यर्थमिति कथमिदं संगच्छतां सत्यां इहैव सूत्रे ग्रामं गामीति षष्ठ्युदाहरणा
तन्नांगीक्रियते नेनयाप्रमस्पष्टंतेत्येवं साध्विति कैयटादयः। दायीति। आवश्यकाधमर्ण्ययोरिति णि
निः। योगो विभज्यत इति भाष्यकारैरिति शेषः। तुल्यार्थैः। बहुवचननिर्देशेनापि पर्यायग्रहणे सिद्धे
र्थग्रहणं पदांतरनिरपेक्षार्थं तुल्यार्थीस्तेषां ग्रहणार्थं तेन गोरिव गवय इत्यादौ न। इह मंडूकप्लुत्या शे राम
षइतिसंबध्यत इति हरदत्तः। तुलोपदारोहति दत्त वाससा। स्फुटो यम स्मतिविशिनष्टि शमुनेत्यादि कथमिति २७३

केश्चिद्व्याख्यातमिति ५

चेत्तानुलोपमाशङ्क्य यौगिकत्वाद्दार्थ्यप्रतिकरणत्वात्तृतीयेति हरदत्तादयः ॥ अप्रधानत्तृतीया वा ॥ तिना वि
नयोगमित्युक्तत्वात् ॥ हितमिति ॥ हितयोगे चेत्यनाशिषि चरितार्थमित्याशिष्यपि विकल्प इति भावः ॥ व्याख्या
नादिति ॥ सूत्रेऽर्थग्रहणाद्विभक्त्यन्तेऽपि षष्ठ्यन्तमिति भावः ॥ ॥ इति षष्ठी ॥ ॥ आधार ४ आधियंतेऽस्मिन्नि
त्याधारः स च कस्येत्याकांक्षायां कारकाधिकारात्क्रियाया इति लभ्यते तत्र साक्षात्क्रियाश्रयस्य कर्तृकर्मसं
ज्ञाभ्यां परत्वान्निरवकाशत्वाच्च बाधात्तद्द्वारा क्रियाधारोऽत्र गृह्यते ॥ तथा च कर्तृकर्मान्यतरघटितपरंपरा
संबंधेन यत्क्रियाश्रयत्वेन यो विवक्षितं सत्क्रियाधिकरणमिति फलितमित्याशयेन व्याचष्टे ॥ कर्तृ
कर्मद्वारेति ॥ उक्तं च हरिणा ॥ कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां ॥ उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिक
रणं स्मृतमिति ॥ त्रिधेति ॥ एतच्च संहितायामिति सूत्रे भाष्ये हैव सूत्रे हरदत्तग्रंथे च स्पष्टं नघामास्वभ्या
घर्थं सामीपिकमधिकरणं चतुर्थमपि केचिदिच्छंति ॥ कट इति ॥ चैत्रकर्तृकं कटाधारकमासनमित्यर्थ
॥ स्थाल्यामिति ॥ ओदनकर्मकं स्थाल्यधिकरणकं पचनमित्यर्थः ॥ यत्तु भूतले घटो नास्तीत्यत्राधेयत्व

सि॰र॰स्त्र भाववान्घटइतिबोधइतिनैय्यायिकाः॥नञ्ञासमभ्यर्थस्यनञर्थान्वयेकारकविभक्त्यनुपपत्तेः॥अपितु
२७५ कालसंबंधाभावोऽस्यार्थः॥नञस्तुद्योतकत्वात्तात्पर्यग्राहकः॥तथाचभूतलइतिवर्त्तमानकालसंबंधा
२७५ भावोघटरूपाश्रयइतिरितिबोधः॥अभावस्यापिधात्वर्थत्वेनसमभ्यंतस्याक्रियान्वयोनिर्बाधइत्या
हुः॥अपरेतुभूतलाधिकरणिकाचैत्रकर्तृकासत्ताऽभावप्रतियोगिनीतिसत्ताविशेष्यकमेवबो
धमाहुः॥चनस्वद्रुति॥प्रातिपदिकार्थमात्रइत्यर्थः॥हरीतिकार्थेसप्तम्यस्येहानुवर्त्तनादधिकरणे
य्यताबोध्याः॥कस्मिन्विषयस्येतिद्वन्नंतोविषयोवर्त्तनभूमिर्यस्यतस्येत्यर्थः॥यद्वाविषयशब्द
नप्रकृतिरत्यंतेऽनोविषयइतिषष्ठीसमासः॥साध्वसाधुप्रयोगेचेति॥यत्राचीनविवादितना॥किंतुम
त्वकथनमात्रंनञ्प्रतिनायोगेपिसमभ्यर्थवार्त्तिकेसाधुग्रहणं॥आचार्यांतुविवादितनायाप्रतियो
गेसमभिव्याहृतस्येसाधुग्रहणमित्युवधेयं॥चर्मणीति॥चर्मद्वीप्यादीनांसमवायसंबंधः॥सीमे
त्यादि॥तथाच सीमाघाटस्थितिहेत्रेषंडकोशेषुचस्त्रियामिति॥अथयुधकोगंधमगेहापत॥ राम २७५

कीलयोरितिचेति मेदिनीकोशः। हरदत्तस्तु पुष्कलकः शंकुः। सीम्नि सीमन्तानार्थे निहतो निखातः। इ
त्याह। अस्मिंश्च पक्षे संयोगसंबंधः। पस्पच। अप्रसिद्धकालाहि क्रियाऽप्रसिद्धकालायालक्षणा।
तत्र प्रसिद्धक्रियाश्रययोः कर्तृकर्मणोर्वाचकाल्लक्ष्यलक्षणाभावसंबंधे षष्ठ्यपवादभूतेयं स
प्तमी। लक्षकत्वं च क्रियायाः साक्षादपस्पृक्तत्वादिति बोध्यं। ब्राह्मणेषु धीयानेषु गत इति क
र्तृकर्मदाहरणं। कर्मणः पृष्ठाह गोषु दुह्यमानास्विति। अहिलाभाव लक्षणाभाव विवक्षायां सप्तम्यर्थ
मिदमन्यथानुस्तत्रैवं सिद्धमिति कैयटादयः। व्यर्थमेवेति तु तत्त्वं मे दय एवेति। विभक्त्यग्रहणा
द्वधारणालक्ष्ये लिङ्गशब्दोपात्तसंधारणा धर्मवैशिष्ट्येन भवतीत्यर्थः। मध्यरात्रिति। न घटनिरू
पणावधेर्निर्धार्यस्य च गवां कृष्णेत्यत्रेव साधारणा धर्मवैशिष्ट्य [illegible]
मस्ति किं तु शब्दोपात्तक्रिया धर्मवैशिष्ट्यमिति भावः। साधुनिपुणाभ्यां। यत्तु अर्चायिग्रहणं निपु
णशब्दस्यैव विशेषणं न तु साधुशब्दस्यानुयोगेऽनर्चायामपि वाक्ये न सप्तमी विधानादिति

न्द्य५

पञ्चै १

सि॰र॰सु कैय्यटहरदत्तादयस्त्वाक्षे[…]तमेवार्थम्मनसि निधाय वार्त्तिकं दृष्टवन्तस्तत्र हलोऽन्त्यमित्यत्र सूत्रे साधु
२७५ ग्रहणामिति कौस्तुभ उक्तः। ननु भयं चिन्त्यं। द्वंद्वनिर्देशे एकदेशान्वयायोगात्। साधुग्रहणा
275 वैयर्थ्यापत्तेश्च। न चेष्टापत्तिः। भाष्यकृताप्रत्याख्यातत्वान्नाश्रुचीयामप्रतेरिति निषेधार्थं तदा
वश्यकत्वाच्च। न चाप्रतेरिति निषेधबाधनार्थमेव वार्त्तिके साधुग्रहणात्र बाधेनोपप
८३ त्तेर्बाधायोगात्साधुमीनरं प्रति पर्यनुयुक्तेति भाष्ये तत्प्रत्युदाहरणाविरोधाच्च। तस्मादर्चायग्र
णमुभयोर्विशेषणमिति बोध्यं। वार्त्तिकस्थं तु साधुग्रहणमनर्चीविषयकमेवेत्यवधेयं। निपु
णो राज्ञ इति। यत्तु वृत्तिकृता साधुर्भृत्यो राज्ञ इति प्रत्युदाहृतं। तन्न। वार्त्तिकेन सप्तम्याः दुर्वारत्वात्। प
दपि राज्ञो भृत्येन सह शाब्दोऽन्वयः साधुना त्वाऽर्थ इति तदाशय इति हरदत्तेनोक्तं नद[…] पृत्वा साधु
[…]ये ष्वमिति भावः। अप्रत्यादिभिरिति। लक्षणोऽन्यमिति सूत्रोपात्ताः प्रत्यादयः प्रसितो[…]त राम
त्यादेः प्रसितात्सको वित्यपरः। उत्सुकसाहचर्यात्प्रसितोऽपि तत्परएव गृह्यते। नेन प्रकर्षेण सितः। २७५

सुक २

कः प्रसितइत्यर्थेन अथ कथं निद्रावशेन भवताप्यनवेक्ष्य समारोपणाय युक्तकत्वमवलानिशिखं
डितेवतिकालिदासोक्तौ भवतीत्यत्रानेनन्तृतीयेतिव्याख्यानवचः संगच्छतां । नह्यत्र तदंतावि
धिरस्ति । विशेषणसंनिधानात् । सत्यां व्याख्यानवचः प्राप्तादि कर्मेवानुतीपान कर्तरि । अनवे
क्ष्य मारोपितिकर्मेवं डेनमेवेतिपुक्तं । पुतु इत्यम्भूत लक्षणो इति सूत्रेल क्षणोना पृथग्भावादिति
भाष्यमादाय कैयटेनोक्तं एवं च विभक्तिस्तृतीयेति । तच्चिंत्यं । उक्तयुक्तेः । अप्रधानत्व तीययाप्यक्तः ८
निर्देशोपपत्तेः । अत एव साधुसाधुप्रयोगे चेत्यत्रासाधुग्रहं सार्थकं । न च नियमार्थं ननु । विधिनियमयो रां ६
र्विधिरेव ज्यायस्त्वात् । अथ वा तत्र छन्दप्रयोगे सा सा विभक्तिर्न विहितं तत्त्वं विध्यर्थं होतिसमाधेय
मिति दिक् । न तत्रेचालुरश हो ऽर्थविशेषे लाहारीक इति ध्वनयन्नाह । योऽनुपदं यथादिना ऽर्थे
इत्यंतेन । अधिकरणाद् इतिनश्च सर्वोऽपि करणोचेत्यनो मंडकच्छ्राप्यानुवर्तन्त इति भावः । तेन मूलंपु
नाहतेइत्यादौ नातिप्रसंगः । मूले नेतिनिति न त्रेणायुक्तेः का लइत्यरोऽस्तु वविशेषइत्यनेन लु

मा २

सि. र. स्तु २७६ 276

शानह्यत्र इति किं । पंचालेषु निष्ठितो जनपदेषु बिति । सुशायस्मादधिकं । अपपरार्द्धे इति । अपोऽधिके
चेत्यत्र यस्य कर्मप्रवचनीयसंज्ञा यस्य चेश्वरवचनमित्यस्य तत्रादिनार्थद्वयं [illegible] वस्थितं । तथा हि ।
यस्येत्यनेन स्वं निर्दिश्यते यस्य स्वस्य संबंधी ईश्वर उच्यते ततः सप्तमीति व्याख्याने स्वात्सप्तमी स्यादित्येको
र्थः । ईश्वरशब्दो भावप्रधानः । यत्स्वमेव तमीश्वरत्वमुच्यते ततः सप्तमीति व्याख्याने स्वामिवाचकात्सप्तमी स्या
दित्यपरः । एवं स्थिते फलितमाह । स्वस्वामिभ्यां पर्यायेणेति । युगपत्तु भाभ्यां नाशंक्या । अन्यतरस्मादुत्प
न्नयैव सप्तम्यान्तरनिष्ठसंबंधस्यावगतत्वादिति भावः । यत्तु अधिभुवि रामः अधि रामे भूरित्यत्र स्थानादि
क्रियापेक्षयाऽधिकरणत्वविवक्षायां सप्तमी सिद्धेति नार्थो यस्य चेश्वरवचनमित्यनेन । नाप्यधिरीश्व
र इत्यनेन । न च गत्युपसर्गसंज्ञाबाधार्थं तत् । ऐश्वर्यविषयस्याधेः शब्दशक्तिस्वाभाव्येन क्रियायोगा
भावात्तस्मादुभयं न कर्तव्यमिति हरदत्तेनोक्तं । यत्तु कौस्तुभे [illegible] तानदुभयमपि चिंत्यं । यस्य चेश्वरवच राम
नमित्यस्यावश्यकतेति व्याख्यानं भाष्यकृता यद्यपि नांगीकृतं तथापि प्रथमव्याख्यानस्यांगीकारात्तत्वेन स्वेष्टं २७६

मी४ तं१

पायस्मात्ख्यानायोगात्।भाष्येहिअधिरीश्वरइत्यपनीयाधिःस्वंप्रतिकर्मप्रवचनीयसंज्ञइतिवक्तव्यमितिसिद्धं
तितं।स्वाम्नसप्तमीविधानार्थंयस्यचेश्वरवचनमित्यपीयंगीकृतं।किमर्थमेवमंगीकारिभाष्यकृतेतिचेन्नश्रू
णुयथान्यासेशेषत्वविवक्षायामप्यभाभ्यांसप्तम्येवप्राप्तानविध्यतेकिंतर्हिस्वाच्छेषत्वविवक्षायामं
पिसप्तम्येवेष्यतेस्वामिन्नस्कविवक्षाभेदेनषष्ठीसप्तम्यावुभेअपीति।एतच्चेहस्त्रेकैयटेनध्वनितमधि
रीश्वरइत्यत्रस्पष्टीकृतं।नहीदृशफलभेदंप्रत्याख्यानेसंभवतीतिभाष्यकैयटपरिशीलनशालिभिर्वि
भावनीयमितिदिक्।नचैवंभाष्यमतेस्वामिनोधिकरणत्वविवक्षायांपदासप्तमीनदास्यात्कर्मप्रवच
नीयस्तुतेद्वितीयाकिंनस्यादितिवाच्यं।कारकविभक्तेःप्रथमायाएवन्याय्यत्वात्।कर्मप्रवचनीयसंज्ञात्व
धिमुविरामइत्यत्रसप्तम्यर्थतयासावकाशेतिभावः।यदत्रमामिति॥निपातैर्यद्यदीतिति।डंनानिघातप्रति
षेधार्थंयच्छष्ठेयादानं।तेनकरिष्यतीत्यस्यविकरणास्वरेणोदात्तत्वंसिद्धं॥ ॥श्री॥ ॥इतिश्रीनि
ऋमलभहात्मजरामकृष्णभट्टकृतौसिद्धांतरत्नाकरेविभक्त्यर्थाःसमाप्ताः॥ ॥श्री॥ ॥श्रीगुरुभ्योनमः॥

सि·र·स्व
२२७
270

तेक्र

ॐ मराद्यासंगिकविभक्त्यर्थमुक्त्वा विभक्त्यंतनाश्रितसमासान्वक्तुमारभते। समर्थेति। यदविधिविषयापरिभाषे
यं। पदविधिग्रहणान्नासमर्थाश्रितः। इति। अनेन सूत्रे समर्थपदं माक्रमिति सूचितं। यद्वाय दविधिः समासा
दिः समर्थो भवतीत्यनेन समर्थपदाश्रितत्वमार्थिकं बोध्यं। समर्थेति। किं। पश्य चैत्रकष्टं श्रितो गुरुकु
लं मैत्रः। पदेति। किं। तिष्ठतु दध्यशान त्वमित्यादिवर्णविधावतिप्रसंगो मा भूदिति प्राञ्चः। विधिग्र
हणान्नेकविभक्त्यंतसमासार्थं अन्यथोपपदमतिङिति त्यादावेवास्यायं स्थितिः स्यात्। नव्यास्तु नन्वत्र किमि
दं सामर्थ्यं नाम न तावत्कृतसंधिकार्यत्वं प्रातिपदिकांशे समासविधौ फलाभावाद्विभक्त्या सहतत्सि
द्धौ तेपि संधेरनित्यमात्वान्नद्धितविधावविकारांतरसत्वाच्चानापि व्यपेक्षारूपं तस्यो रित्यत्र सामर्थ्य
ग्रहणावैयर्थ्यापत्तेः। न चास्मात्तस्य वैयर्थ्यं व्यपेक्षापां समासाद्यनुपगमेनाद्यवाद्यत्तद्धिते त्यत्र
समासग्रहणं विध्यर्थमेवास्त्वकृ एवं पदे लक्षणांगीकाराच्च न नव्योक्तं विशेषणसंबंधादिदूषणमिति वा। राम
स्याम्रलकैनोपदं शमित्रं दोषस्योक्तत्वान्नोकान्मुक्तः इत्याद्यलुक् समासे कर्मधारये त्वपरमतेलक्षणा २२७

तम १

नं १

गीकाराद्विशेषणान्वयस्यदुर्वारत्वाच्च। किंच राज्ञः पुरुषो देवदत्तस्य चेतिवद्राजपुरुषो देवदत्तस्य
चेत्यपि स्यात्। न च पुरुषपदेऽपि विशिष्टलक्षणाङ्गीकारान्निस्तारः। अपसिद्धान्तादिदोषापत्तेश्च।
पङ्क्तिराजपुरुषस्सुंदर इतिवन्नाहक्त प्रयोगोऽपीष्ट एवेति नव्यानुसारी कश्चिन्न। हरदत्तादिविरो
धात्तु भवविरोधाच्च। सुंदर इति विशेषणस्य पूर्वपदार्थविशेषणो नाविरुद्धतया दोषत्वाच्चेति
चेत्। न। यद्यपि व्यपेक्षावादिभिः प्रातिपदिकसंज्ञार्थं यावद्कुचस्थं वा वाक्यस्यैनेति सविशेषणानामि
ति सामान्यतो वचनान्तरं चेति वचनत्रयं कर्तव्यं तथापि दुस्सोऽरित्यत्र सामर्थ्यग्रहणं विभक्ति
विधावन्तरंतरेण न्यायादितरेत्यादो प्रत्ययग्रहणानि च न कर्तव्यानीति तुल्यत्वात्। मतान्तरे तु वृत्ता
वेवैकार्थीभावाभ्युपगमेनान्यत्रास्योपस्थित्यभावात्तेषामावश्यकत्वात्। अथ वा तन्त्रार्थवत्त्वेना
स्त्वत्र हि समर्थं किंतु ह इति मत्यदकत्वमेवं च समासग्रहणस्य नियमार्थत्वात्तते बद्धुचस्यैव वाक्यस्येने
ति च न कार्या पा[illegible] पाचकस्यादावपि ताहशागर्थवत्त्वं स्त्यपादं। अन्यथा त्रिबुलत्वे चाविन्यादेः यद

सि॰ र॰ स्त
११८
118

संबंधिविधित्वाभावादेकार्थीभावाभावादर्थवत्वानुपपत्तिः। हृद्रास्य मित्र[illegible]दित्याद्यर्थत्वा
त्तान्नचैवं प्राप्तोदक इत्याद्यषष्ठ्यर्थवद्बहुव्रीहौ व्यक्षस्य तिभंगापत्तिरिति नव्योक्तिः साधुः। उदककर्तृत्व
उदकशब्दस्य प्राप्ति शब्दस्य च प्राप्तिमात्रे चरमपदस्य वा विवक्षितेर्थे लक्षणाङ्गीकारात्। अवयवा
र्थप्रतीतौ तु विशिष्टशक्तिरेवाभ्युपेयते। ऽश्वकर्णादि इत्यादौ लक्षणावत्। उच्चा अ उच्च इत्यादावप्येवं वाऽ
त्र चलिंगं दध्यायास्स्व्रत्यत्र दध्युते त्रिहरां। अर्थवद्ग्रहणे नात्यप्यतएवायपन्नं एवं च षष्ठ्यर्थ्यपदार्थप्रधाने
ऽव्ययीभाव इत्यादि व्यवहारोपि नानुपपन्न इति भाष्याभ्रू। व्यपेक्षावादिमतेनिष्कर्षसंक्षेपः। अन्येतु
सूत्रभंगापत्तेः। क्वाचिद्रूप्यंगीकारावश्यकत्वे सर्वत्र तदङ्गीकारौचित्यादेकार्थीभावरूपमेव हि सामर्थ्य
तच्च वृत्तावेव वाक्ये तु व्यपेक्षारूपमेवेत्याहुः। तत्र यद्यप्युभयमपि शक्तिरूपमेव तथापि वृत्तिघट
कीभूतपदसमुदायस्य पंचास्त्रदकवद्विशिष्टार्थप्रतिपादकत्वेनैकार्थीभावः। वाक्यस्य तु एकद्वित्र राम ०
द्विविशेषणाविशिष्टप्रधानपदार्थे शक्तिसत्वेपि तद्घटितपदानां मिलि[illegible]र्थप्रत्यायकत्वमप्यस्ति। ११८

त्येतावता व्यपेक्षेति तयोर्भेदः। अत एव वाक्ये विशेषणान्वयो वृत्तौ नेति व्यवस्थापि संगच्छते। एतादृ
शकल्पनायां समासग्रहणं नियमार्थमिति भाष्यमेव मानं। न च नैयायिकाभिमतव्यपेक्षायामेव तत्संभ
वति। एवं सुप्तिङन्तादिस्थलेपि पारिभाषिकव्यपेक्षैव बोध्या। अत्र लिंगमर्थवत्सूत्रे प्रत्ययांतपर्युदासए
वावृत्तिमत्पदकत्वपक्षे समासग्रहणस्य नियमार्थत्वसंभवेप्यकृत्तद्धितेभ्यां वृत्तौ विशिष्टशक्तिरंगीकार्या
वावृत्तेर्वपदार्थप्राधान्याद्यकृत्तद्धितेष्वपि मतत्पूर्वकत्वात् नेयः। न चैवं लक्षणोच्छेदापत्तिः। दृष्टापत्तेः। सर्वे सर्वार्थ
वाचका इत्यभ्युपगमात्। गौणत्वमुख्यत्वव्यवहारस्तु प्रसिद्ध्यप्रसिद्धिभ्यां नेयः। न चैवं ग्रामं गत इत्यादौ का
रकान्वयानापत्तिः। सविशेषणानामिति निषेधस्यमनवकाशेपि तुल्यत्वादिति वाच्यं। द्वितीयाश्रितेति लिंगेन
तत्र तदन्वयांगीकारान्नायं तु वृत्तिवाक्ययोर्भिन्नविष[redacted]पत्वेन विकल्पस्यार्थसिद्धत्वया वाव
चनानर्थक्यं स्वस्वभावसिद्धत्वादिति वाग्रहणं भाष्यकृता प्रत्याख्यातं। तत्रोक्तिवाद मात्रं लक्षणैकचक्षुष्का
णां तेन नवीनानि त्यानित्यविवेका[redacted]योगात्। इत्थमार्षवचस्सम्प्रदायानामेका

सि॰स्तु यो भाववाहिनाम्मनस्यनिष्कर्षः। नत्राघेऽजहत्स्वार्था वृत्तिर्द्वितीये तु जहत्स्वार्थेति विवेक इत्यासां तावत्।
२७६ नेन्वनन्वर्थत्वात्समाससंज्ञायाः प्रत्येकमप्रसंगात्सहग्रहणं व्यर्थमित्याशंक्याह। योगइति। सुबामं त्रि
२२१ नइत्यतः सुबित्यनुवर्त्तत इत्याह। सुबंतमिति। कतिपये तु। नन्वनित्याधिकारे उदात्तवनागतिमताय
निङागतेः समासविधानान्नेदं युक्तमिति वाच्यं। अभिप्रभरद्धृषेत्यादौ समासादर्शनाद्धान्तिकार्थस्यमाभ्य
हरनैवयोगविभागेन साधितत्वाद्बाह्यस्यानित्यत्वस्यावश्यंगीकार्यत्वात्। न च वेदे षष्ठीयुक्तश्छंदसात्यत्र
वेति योगं विभज्य सर्वविधीनां वैकल्पिकत्वांगीकारेणादोषत्वात्। भाष्यांनित्यार्थन्तदस्त्विति भ्रमितव्य
मित्याह। सघ छंदस्येवेति। लौकिकत्वे तु घस्यवनप्रैधनैप्रैधेरन्नित्यादौ स्वाधत्यन्निन युसकम्स्यत्व नलोपा
दयः स्युः। स्पष्टं चैतत्कर्मरायमिति सूत्रे हरदत्तग्रंथे। अनुव्यचलदिति। सुबित्येकत्वस्य विवक्षितत्वात्प
र्यायेणसमासो बोध्यः। समासानोदात्तत्वे शेषनिघातश्च न स्यात्। कुगतीति सूत्रे कैय्यटः। एवं च देवो देवान्क्रतु राम
नापर्यभरूषदिति मंत्रे समासस्वरादर्शनात्स्वरव्यत्ययोऽद्भ्यः। सुप्सुपेति लक्षणानां चाधिकारस्त्वाद्युपोधा २७६

कार्यान्तरविधानार्थमारब्धस्यास्य वनस्पतिपुरोडाशवत् तुर्धकिरराण्न्यायेनोपसंहारकत्वेन ५

त्ता पंचम्यास्तोकादिभ्य इत्यादिना अलुक्समासविधानात्तत्पद इति प्रत्याहारग्रहणं॥ निर्दिष्टशादि॥ इतरथा
हि अप्रधानार्थत्वात् वृशश्चेत्ये वस्त्वे निपातः स्यात्॥ प्रथमानिर्दिष्टत्वान्निश्चये यथान्वर्थत्वादुपसर्जनसं
ज्ञायाइति भावः॥ इवेनेति॥ अयमपि पूर्ववत्क्वचित्क एव तेन जीमूतस्येवेत्यस्य बहूनामेकपद्येनत्वेन निरी
पारां पृथक्पदत्वेन च पाठः उद्धाकुरिव वर्द्धमन इत्यादौ व्यस्तप्रयोगश्च संगच्छते॥ इति न च यास्तन्नाभाष्यक
५ समासमात्र तायोगविभागेन स्वसाधितत्वेपि नित्याधिकारपठितस्येवेन समास इति वार्त्तिकस्य फलभेदप्रत्या
ख्यानायोगात्सर्ववाक्यादसन्नानभ्युपगमात् तृणकरीत्यावेद्यवैकल्पिकत्वस्यन्याय्यत्वेपि भाषायां वैकल्पि
कत्वे मानाभावात्॥ अव्ययं विभक्ति॥ अव्ययीभावश्च गंभीराच्च इति सूत्रद्वये व्यासकारोक्तमाह॥ अव्यप
मिति योग इति॥ प्रथमा॥ अत्र समासपदं न हि धायके मात्रमन्यथाचिकीर्षितेन समासे यत्प्रथमान्तमिति व्याख्या
ने षष्ठीतादिष्वतिप्रसंग इत्याशयेनाह॥ समासशास्त्रेति॥ एकविभक्ति॥ एकविभक्तिचद्भुत्वेइत्येवस्तवं चाविग्रह
इति॥ समास इत्यनुवर्तमानेन विग्रहोलस्स तइतिभावः॥ ननु राजकुमारीत्यादावेकविभक्तिसत्त्वादतिप्रसं

सि॰र॰स्त
२८०
280

गइत्याशंक्याह नियतेति कुमारीशब्देनु क्लिश्यहे सर्वविमतयं तत्त्वसंभवइति भावः। न कुत स्येति प्रसज्य
प्रतिषेधाश्रयणां दोषांतराभावस्य ध्वनार्थ। न च कुमारीश्रितइत्यादौ पूर्वस्य त्रस्याप्यनिषेधापत्तिः। अ
नंतरस्येति न्यायादिति भावः। गोस्त्रियोः। प्रत्येकाभिप्रायेरौकव च नांतमुपसर्जनस्येति तच्च गोस्त्रियो
विशेषणं। ताभ्यां प्रातिपदिकं विशेष्यमेति न तदंतविधिरित्याह। उपसर्जनमिति। स्त्रीप्रत्ययांतमिति॥
स्याधिकारो त्कृष्टवा घंतमित्यर्थः। तेनातिलक्ष्मीरित्यादौ नातिव्याप्तिरिति भावः। यत्तु गोनस्त्रीप्रत्ययांत
[redacted] योरुपसर्जनयोरिति प्राचोक्तं। ननु चित्रगुरित्यादौ गोशब्द
स्योपसर्जनत्वेपि गोंतस्यातथात्वेनाव्याप्तिः गौरीपतिरित्यत्रातिव्याप्तिश्चेत्तेति न व्यात्तत्वात्। चित्रगुरि
त्यत्र गोशब्दस्य व्यपदेशिवद्भावागीकारेण हल्भ्याहोरीपतिरित्यत्र लिंगविशिष्टपरिभाषया व्यपदेशि
वद्भावेन च स्वव्याख्यानेष्यति व्याप्तेरुद्धरत्वात्। ननु एवं गोपुत्रइत्यादावति व्याप्तिः। व्यपदेशिवद्भावे राम
प्रातिपदिकेनेति भाष्योक्तसमाधानं तु घृभिःसज्जरित्यसिद्ध्या तत्त्व विधौ प्रौढिवादमात्रमित्युक्तत्वात्। एव २८०

वा ३

राजकुमारीपुत्र इत्यादावपीति चेत् न । उपसर्जनपदार्थस्य संबंधिकतया यस्य प्रातिपदिकस्य ह्रस्ववि
विधिस्तदर्थप्रतिपन्नपरपदभूतयोर्गोस्त्रियोरुपसर्जनत्वे एव तत्प्रवृत्त्येगोकारादिनि भाष्योक्तेः । कृत्तद्धि
तेत्यतः समासपदमनुवर्तनमिति तदाशयः । स्त्रीप्रत्यये चानुपसर्जने नेति नदादिनियमप्रतिषेधादुत्तर
पदस्य स्त्रीप्रत्ययान्तत्वादिति राजकुमारिरित्यादौ न दोषः । यत्तु अत्र स्त्रीप्रत्ययान्तस्योपसर्जनत्वात्त
चतस्रादिनियमसत्त्वाद्भाष्यमनुपपन्नमित्याशंक्य निष्कौशांबिरित्यादावतिव्याप्तिवारणार्थाद्दल
आबितिसूत्रस्थाद्दीर्घग्रहणान्क्वचिदुपसर्जनेपि तदादिनियमाभा[illegible]वइति ज्ञापनान्न दोष इति
कैयटः समादधौ । तन्न । यस्मिन्समुदाये यस्य स्त्रीप्रत्ययान्तस्य स्वार्थद्वारा प्राधान्यं तत्र नदादिनि
यमो नेति स्त्रीप्रत्यये चेत्यस्य व्याख्यानात् । प्रकृते च लब्धनदादिनियमनिषेधस्य राजकुमोत्यस्यातिना २१३
समासइतिन किंचिद्बाधकं । किंच दीर्घग्रहणं ज्ञापकमिति वक्तुमेवशक्यं नाहि हि नन्वमुमिमं तमुत्तरप
रत्वमात्रं । नाचः । यासेत्यसिद्धान्तः । दीर्घग्रहणस्य ज्ञापकत्वायोगात् । एतेनैव यसस्त्रेनिस्सृत्येवं य

सि॰र॰ख रः। केयं रोनिरस्ताः। नन्वेवमपि समासमात्रापेक्षत्वेन कस्वत्वस्यान्तरंगत्वान्नघन्तरपदसमासविशेषापेक्षं
२८१ कयं बाधित्वा नङ्कुमारीक इत्यादौ कस्वः स्यादिति चेन्न। असमासान्ताद्इत्यत्र त्यान यह गोनान्तरंगेभ्यः समासा
281 न्ता नां बलवत्त्वं ज्ञाप्यत इति ज्ञापनात्। अप्राप्ति पदं ति तस्य नेत्युक्तत्वात्। भाष्ये तु समासान्ता इत्यत्र लक्षणाया समास
पदेन प्रक्रियावाक्यमुपस्थाप्यते तेनान्तरंगत्वेन कविति समाहितं तत्तु प्रौढ्येति तत्रैव स्पष्टं नेत्युक्तं। नन्वे
तत्समाधानान्तरमस्तु। नन्वपूलं तु नङ्कुचर्मकेतीव विरहोपीति वाच्यं। समासस्योत्तरपदस्य वा समासान्त इति
भाष्यारूढपक्षद्वयेबङ्कुमारिकइत्यप्यापत्तेः। तस्मात्पक्षद्वयेकल्प्यायास्मदुक्तसमाधानस्यैवांगी
कार्यत्वाद्द्वरुचर्मकेत्यसाध्वेवेत्यास्तां तावत्। विभक्तीत्यादेरिति विभज्यते ऽनयाप्राति पदिकार्थ इ
ति व्युत्पत्त्या विभक्तिरिह कारकशक्तिः। विभक्त्यादि समानाधिकरणो वचनशब्दः कर्मसाधनः। प्रत्येकं सं
बध्यते। कारकशक्त्या उच्यमानायां पदव्ययं वर्तते। विन्त्याद्यर्थद्योतकं पदव्ययमिति पाठ व्वरतदेन दाहृ। राम
विभक्त्यर्थ्यादिष्विति। समस्यत इति। वक्ष्यमाणारीत्या स्व प्रत्ययेन्त्यस्यानित्यत्वाद व्ययं विभक्तीत्यादिपंच २८१

सत्याः समासविधावपि तात्पर्यं वाच्यं तत्र प्राक्कडारादित्यत्र विभाषादिकं समास इत्यादिलिंगात्स्वा
गितिलब्धे पुनः प्राग्ग्रहणात् संज्ञासमावेशार्थं तेन प्राक्कृ समाससंज्ञं सत् संज्ञान्तरं लभत इत्यर्थ इत्याशये
नाह सहेति। अभिहितेऽपीति द्योतितेऽपीत्यर्थः। वचनं सामर्थ्यादिति निपातानां द्योतकत्वोद्धे। यादित्य
र्थः। एतेन पक्षेन त्वयं तेन समासस्य द्वयवस्तु वर्थद्योतकाद्यप स्याद्विभक्तीत्यनेन समासविधाना
त्यर्थ इति निरस्तं। वाचकासन्निधाने द्योतकत्वानुपपत्तेः। यत्तु प्रथमान्तेन षष्ठ्यन्तेन वा पंसमास इति परिशि
ष्टादावुक्तं तन्न भग्नधेः समन्यपि द्योतकत्वानुपपत्तेः। वाचकत्वाभिप्रायेणा तन्नासंगतमिति चेन्न आग्रात
यदि कार्यमात्रे प्रथमापाठ एवन्यायप्यत्वेन षष्ठ्यन्तेनत्यस्यासंबद्धत्वात्। यत्तु इतेनो स्त्रीषष्ठिधिकृत्वेति वि
ग्रहीतं यद्ग्रहणावधिकृत्वेति प्राचां तन्नाहप्यर्थलेशमप्यबोधयतस्तस्य विग्रहत्वायोगात्। अन्तर
वनितासमासत्वेनायमस्य पदविग्रह इत्यपि निरस्तं। यदपि हरो अधि इति स्थिति प्रदर्शनं। यत्त्व
समासप्रकृतिभूतं वाक्यान्तरं दर्शयतीत्यवतारितं तन्न उभयमप्यसत्। लुम्विषये संघे लभते

सि॰र॰म महरिइअधिहृत्यस्येवतत्वहृतिन्वातापन्नहरदन्तः। हृन्तस्य कथाहृत्यकथाकर्त्तव्यकथेत्यर्थः। स
२८१ स्त्रीषधिप्रवर्त्तनेन। स्त्रीषधीतिचप्रक्रियाना वाक्यं न तु प्रयोगार्हं नित्यसमासत्वादित्याह। तत्राप्रक्रिया
282 वाक्ये लौकिकस्यांशां नरस्य प्रवेशायोगात्। वक्तन्तक्त अध्याः कृ ठो हृन्त्यकथाः धिहृन्त्यकथा वा
प्रहत्नेति हृत्तेंवाक्यं लौकिकमेवेतिदिक्। इह घटस्योपरि। घटस्योपरि इत्यत्र न समासः। दिग्देशका ग॰४
लवाचित्वेन विभक्त्यर्थमात्रवाचित्वाभावात्। अमुं नारद इतीत्यत्र न विभक्त्यर्थद्योतक इतिरित्यवो
चाम। यत्तु परिशिष्टे अधिकरणाइत्येव सूत्रितत्वाद्विभक्तिपदमपि तत्रैव पर्यवसन्नमिति कौस्तुभेऽ
क्तं। तन्न। मुनित्रयानुक्तत्वेन यासंकोचे मानाभावात्। यदपि अधिकरणाइत्येव वक्तव्ये विभक्तिग्र
हणं मात्रालाघवाय इति पारिशेषिणे राशमवर्णितं। तदपि ना ङिसमीपेति न्यासस्य ततोपि लघुत
रत्वे नाप्रयोजकत्वात्। न तनश्च कर्मनमात्रद्योतकतायामिति नारदमिति समासो भवेदेवेतिदि राम
क्। अराद्धनादिति। रहितं यथा तु रोधादेवमुक्तं। वक्तनसो अराद्दूरसमीपयोरिति कोशात् साम २८१

प्यऽव्ययी भावो दुर्वारः। अर्थान्तरे पंचमी विधेः साफल्यात्। समयालंका। नित्य त्वाव्ययीभावास
मर्थत्व स्य समीपमध्य रूपार्थद्वयवाचकत्वात्। द्वितीयापंचम्योरिति समयाग्राम अग्नेरुत्त्या
दिष्वांकियावाक्ये पदिसमासः स्यान्न हि तयोधात्वि तितस्य लुकि पुनरूपयद विभक्तीति
नस्यां। नास हनत्त्वप्रकृत्यत्वात्। किं चैक वचनमुत्सर्गः करिष्यनइ तिसर्व विभक्तीनामेकवचना
नि स्युरिति नयोर्विधानं व्यर्थमिति भावः। यत्तु मैत्रस्य ग्राम समयेत्यादौ सापेक्षत्वेन साफल्या नद्
[redacted] विधि सामर्थ्यं नास्तीति दुर्घटं स्यादाव क्तौ नन्। नित्यसमास विषयीभूत पदानां विशे
षणान्वयानहि त्वेन स विशेषणानां वृत्तिर्नेतिनिषेध स्या नित्य समास विषयत्वात्। अन्यथा
महतः कुंभस्या येत्यपि स्यादिति भावः। केचित्तु वचनग्रहणात्सामीप्य मात्रघोतकाव्ययस्याव्यय्यी
भावः। समीपे प्रधाने तूपहशाऽत्यादौ वक्रुव्रीहिरिति राद्धान्तः। ग्रामं समया। राघनादित्यत्र च समी
पि प्राधान्यान्न दोषइत्याङुः। अत्यय इति। स्पष्टार्थमेतत्। अर्थाभावेन कृतत्वात्। अर्थाभावप

वर्तमानकालः सन्निषिध्यत इति प्रसादकृतोक्तम् । तत्र अधिकरणशक्तिप्रधानस्य क्रियायैवान्वयाद्धस्यनञ
र्थेन्वयायोग्य ।

सि॰र॰स्तु २८३ 283 देनसंसर्गाभावो विवक्षितो नान्योन्याभावः घटः पटो नेत्यत्रातिप्रसंगादिति भावः संप्रतिनेतीदानी
मित्यर्थकस्य संप्रतीत्यस्य सुप्सुपेति समासः । निषेधो यतिक्रियायाएवेति व्याचष्टे । नन्वु
क्तं तदपि । यत्तु असंप्रति संप्रत्यभाव इत्यर्थः । अनेनोपभोग्यवस्तुनो योगात् इदानीं घटो नास्तीत्यत्र
कालनिषेधस्य सर्वतंत्रसिद्धत्वादप्रतीतेश्च । प्रत्यर्थमिति । वृत्तौ वीप्सातः भावात् द्विर्वचनं प्रतिश
ब्दस्येति । एतच्च प्रसादकृतोक्तं । यत्तु यामस्यादृष्टं दृष्टमित्यत्र द्वितीयाविधानं सावकाशमिति केचि
त्तन्न । नित्यसमासे सविशेषणानामिति न यवत्तत्रस्यानन्वितत्वात् तद्दत्तस्य अर्थमर्थं प्रतीत्यत्र प्रतेः
कर्मप्रवचनीयत्वात् संबंधविशेषद्योतकोन वीप्सायां तस्याद्विर्वचनेनेव द्योतितत्वादित्याहुः । तन्न
नित्यसमासस्यन्याय्यत्वे तादृग्वाक्यस्यैवानुपपत्तेः । यद्वा अर्थमर्थं प्रतीति भाष्यप्रयोगात् साधुत्वे नितदृ
पिनाम्लोकरीत्यैव भाष्यमुपपन्नो ज्ञापकत्वानुपपत्तेः । स्यादेतत् । यथार्थे यदव्ययं तत्समस्यत इति शा रामः
स्त्रस्यार्थांतरे सावकाशत्वाद्वीप्सायामनुर्लक्षणे इत्यत्रास्माकं तु करीत्यादिर्विकाशेन कर्मप्रवचनीयसंज्ञा २८३

विधानेनसमासबाधोदुर्वारः।किंचवीप्साद्योतकत्वस्याभ्यांतिपानाभ्यांयदृक्षंतंवृक्षमित्यत्रसमासेविधा
यशास्त्रेहलनार्था।अपिचलक्षणेत्थमित्यत्रनव्योक्करीत्याहवृक्षंवृक्षंप्रतिसिंचतीत्यत्रषत्वनिवर्तकतयाकर्म
प्रवचनीयसंज्ञापिसावकाशेवेतिवाक्यंदत्तजलांजल्यैवेतिमूलमसंगतमितिचेत्।प्रसादस्यैवैपत्त्ववृ
त्तिरिर्दृष्टरीत्यादेनंतद्वृद्धार्थमात्रेमूलकृतस्तात्पर्यात्।कथंतर्हिप्रत्यर्थमित्यस्यसाधुत्वेतिचेत्।प्रत्यर्थ
शब्दनिवेशादितिभाष्यप्रयोगादेवासमर्थसमासेनव्यमनेनकार्यकालत्वेद्विनीयाविधौकर्मप्रवचनीयसंज्ञा
यास्थितिर्निरवकाशेतिबोध्यं।दीक्षापांप्रतिशब्दविषयकसमासोपिनिरवकाशइतिचेत्तेपज्ञानंतरेणभाष्य
प्रयोगाद्वाक्यंसाधितितत्त्वमित्याशयेनावत।वक्षेणायुगपदितिअन्वत्रसमासेनभाव्यमितिचेत्सत्यं।
अल्पाच्तरस्यवृद्धिशब्दस्यपूर्वनियातताकरणादिस्यकचिदप्रवृत्तिज्ञापनान्नदोषइतिभावः।गुणाम्
तेयीभावचनग्रहणाद्यथार्थप्राधान्यएवसमासप्रवृत्तेर्गुणभूतसादृश्येऽप्राप्तेनकृहणमितिभावः।अंतइति
इदानीमेतावानध्येतव्यइतिपावनोग्रंथस्यपरिग्रहःकृतस्तदयेत्नैवेहसमाप्तिर्विवक्षितानान्नत्वासकलस्य

सि॰र॰स्त्र ध्मापनेभवतीतिसाकल्यान्त्रेणउयादानं।सायीति।अभिप्रतिपादकग्रंथे।अभिशब्दोवर्त्ततेसचवत्ती
२८४ यांततःसमस्यते।नचैवमग्निनासहेतिप्रयोगानायत्तिः।अतत्वविवक्षायांसमासस्यनित्यत्वेपिसाहित्य
284 मात्रविवक्षायांनद्रुययन्नेः।अतएववाग्निग्रंथपर्यन्तमित्यस्वपदविग्रहहोदाहृतिः।अत्रेदमवधेयं।वचनग्रह
णाचिंत्यप्रयोजनं।साहचर्यग्रहणेनैवतदर्थज्ञापनान्नापत्तुयोगविभागार्थंवचनग्रहणंतेनायदिशामितिसिद्धं
कारादेवसिद्धौसूत्रंमुधेतिचेन्न। असतिसूत्रेऽनंतरस्त्वत्राणांविधेयनिर्देशेननिराकांक्षत्वात्त्वतलो
रधिकारस्यसंदिग्धत्वात्तात्सूत्रस्यप्रयोजनंनानंतरमप्याहाकर्मणिविधानार्थंचेति। अन्यथाभावेसा
वकाशयोस्त्वतलोः कर्मणिगुणवचनादिभ्योविशेषविहितेष्यञाबाधप्रसंगः। नन्वेतेनब्यामम
पीतिद्ध्यतरथाप्राग्भवनादितिविशिष्टावधिपरिगृहीताभ्यांप्रकृतिविशेषपुरस्कृत्यष्वकृत्यर्थावि
शेषेविहिताभ्यांभावेप्रकृत्यंतरेचाचरितार्थाभ्यांस्वतलोर्बाधोऽनुवीरइतिभावः। ननुपृथ्व्यादिभ्यइत्या राम
दौग्रहणाद्वनेतितिनिषेधाद्याद्यपितदंतविधिर्नास्तिनथाप्यत एवनिषेधात्तदंतविधिरिहास्तीतिज्ञाप्यतेपु ४२५

रोहिनादौ राजासेश्चेयेनत्सामान्यायेद्वंवा ज्ञापकं बोध्यं। इदं च सूत्रं भाष्ये प्रत्याख्यानं। न थाहित्वनलोसूत्र
निषेधो नेष्यते। इतजन्तरोभावप्रत्ययस्तु नत्र पूर्वान्नस्तु रुषाद्वक्ष्ऊर्वी हेरनत्र पूर्वान्नस्तु रुषाद्ध नेष्यतइवे
ति। अचतुरसंगतादौ योनत्रसमासाएवाकृतिगणात्वाद्ब्राह्मणादिषु बोध्याइति कैयटः। एवं चदृहस्पति
त्वमित्येवसाधुनबार्हस्पत्यमिति। अपटुशब्दाद्ध्ऊर्वी हे रपि अपटुत्वमपटुतेत्येव सोनत्वापटवमि
ति। यथोत्तरं मुनीनां प्रामाण्यपातादृथ्यादि। अमादीति। इह येद्युगंतालघु पूर्वां मृदुप्रभृतयस्तेषुशणाः समावे
वरा३ दि६ शः। पंडखंडादिषु गुणवाचिषु ष्यञः। बालवत्सादिषु वयो वचनेषञः। त्वनलौतत्पूर्वे [illegible] रासि
द्धौ। वर्णाहृढ। गुणवचनत्वादेवसिद्धाविमञर्थं वचनं। औचितीति। ब्राह्मणादेराकृतिगणात्वान्नष्य
ञ। षित्वान्ङीषिहलस्तद्धितस्येतिपलोपः। एवं याथाकामीत्यादि। इह गणसूत्रं। वेयातलाभमतिमनः
शारदानां। विशब्दात्परे ययातादयः पंचतद्दंतात्समासानांतष्यञ्स्यात्। वियातत्वं वियातता। वि
यातिमावैयात्यं। एवं विलाभत्वमित्यादि समवेषां चत्वारिज्ञेयानि। विमतिशब्दे तुइगंतत्वादुदा।

सिरस्व
४२५
425

वैमनतमितियंचमंबोध्यंासमोमामतिमनसोःसंमतित्वंसंमति तिम्यादिपूर्ववत्पं चरूपी।संमनस्वमिन्या
दिवत्तरूपी॥गुणावचनात्क्रिया कार्यंचेह कर्मा॥आकृतिगणाइति केषांचित्पाठः कार्यान्तरार्थः।तद्यथा॥
अर्हतो नुम् चेतिनुमर्थः पाठ इतिन्यासः।भाष्ये तस्य पाठाद्वार्त्तिकमितितु साम्प्रदायः।एकभाव त्रिभाव अ
न्यभाव एषां पाठः स्वार्थविधानार्थः।आन्यभाव्यं काल शब्द व्यवायादिति वार्त्तिककृदपि प्रायुङ्क्त।स
र्ववेद इति पूर्वकालैक इतिसमासः।उभयपद वृद्धिश्चेति केचित्।सर्वशब्दस्य तु शतिकादेराकृतिगणत्वादि अ५
त्याहुः।चतुर्वेद इति।तद्धितार्थे द्विगौ द्विगोर्लुगनपत्ये इत्यणो लुक्।आचवर्विध इति विधाल त्रराकल्पस
त्रानादकल्पादेरितिठञ् तस्य लुक्।सधानग्रहणामिति वर्तायग्रहणोपस्पेति चेन्प कारलोपेन तस्प
ष्ठानिवद्भावादयादेशः स्यादितिभावः। [illegible] ।आरंभसामर्थ्यात्तानर्थक इतिनिषेधाद्यासि
द्धेनेलोत्यस्प नाकपिन्नात्पोऽहकपिन्नातिशब्दौ द्वौ अर्थैर्द्वौ।तत्रपयासख्यनुष्यतेऽ एवंयत्यंतयु राम
रोहिनादिभ्यः।र्हेयनानयुवादिभ्यः।द्वंद्वमनोज्ञा [illegible] दिभ्यइत्यत्रापिराजासेइतिग्रहणावतेतितद ४२५

त्य५

त विधिनिषेधात्समासेप्रसक्तिविरहादसइतिव्यर्थमेवं। अत्तत्रराजशब्देन दंतविधिरितिज्ञापना
र्थत्वात्‌। तेनब्राह्मणादिषुपठितस्यराजन्शब्दस्य तदंतेष्यञ्ःकृतार्थतया केवलेयत्कृप्रत्ययेनबा
धोयुक्तएवेत्याशयेनाह। राज्यमिति। अनेनाद्दांतमिदं ष्यञ्जिलघदांतेस्यादितिभावः। ब्राह्मणादौ
त्वसइतिनिषेधाभावस्योक्तत्वात्तदंतेष्यञित्याह। समासेविति। यत्त्वेष्वाधिकरणोराज्ञः कर्मराज्य
त्र५ मितिब्राह्मणादित्वात्ष्यञितिशाब्दरभाष्यं। तन्न। उक्तरीत्यायकएवन्याय्यत्वादितिभट्टपादाः। वस्तुत
स्तुब्राह्मणादेराकृतिगणत्वादेवतदंतात्ष्यञिसिद्धेराजन्शब्दस्यतत्रपाठोऽयकासमासेशार्थइ
तिनकश्चिद्दोषइतिध्येयं। प्राणभृन्नाइहप्राणिजानीत्येवस्वचमितिनव्याः। तच्चिन्त्यं। पर्यायस्वशब्द
ग्रहणेलाघवत्वादन्त्यमितिविभाषायाऽन्यतरस्यांग्रहणेनज्ञापितत्वात्‌। प्राग्भादितिकिं। कुड्यत्वं।
जानीतिकिं। डित्थत्वं। श्रोत्रमिति। इहहोत्रादिगणोपकल्पितेत्वाचिनस्तेभ्योहोत्राभ्यश्छइतिप्रा
प्तेडुष्टुस्त्वष्टुशब्दाभ्यांगुणवचनत्वात्ष्यञिप्राप्तेवध्वूशब्दादिगंनलक्षणोगोत्रचप्राप्ते ऽस्मिन्विधीयते। श्रो

सि॰स्त॰
४२६
426

स्य

त्रियतीति। वक्तव्यमिति शेषः। श्रोत्रियंश्छंदोधीत इति छंदसः श्रोत्रादेशो घनप्रत्ययश्च निपात्यत इति यद्वे
घलोपश्चेति यथाश्रुतं साधु वा कथं श्रोत्रियदवचनमिति यद्वेनु घशब्दस्य यशब्दे लक्षणा। क्वचिद्घलोपश्चे
तिपाठः। तत्र येति संघातग्रहणात् इ। यादृगन्तानां। लघुः पूर्वो वयवो यस्य तत्प्रातिपदिकं। पूर्वत्वं च संनिधाना
दिगवधिक ... मेवालघुपूर्वी किं। यादृत्वं। कथं काव्यमिति। कवेः कर्मेति विग्रहे काव्यमित्येव न्याय्यमि
ति प्रश्नः। कुधातोर्ण्यन्ति काव्यमिति सुष्ठु। अभिधानीयकमिति। अभिधेयस्य भावः कर्म वेत्यर्थः। गो
त्रचरणात्। अयन्याधिकारादन्यत्र लौकिकं गोत्रं अपत्यप्रत्ययान्तेभ्य इत्यावता प्रवराध्याये पठि
तेभ्य इत्यन्ये। गोत्रचरणाद्योऽजीति न्यात्प्रागाभ्रञ्ज्यातीत्य जिप्राप्तेवुञ्ज्ञाय्याधीनि। श्लाघादिषु विषयभू
तेषु। प्राप्त इति। इणः प्राप्तिवचनत्वात्। अवगतवानिति। अवपूर्वस्य गोः ज्ञाने प्रचुरप्रयोगात्। गा
र्गिकयेति। आपत्यस्येति यलोपः। स्वभावात्स्त्रीत्वं। हौत्राशब्द इति। कृयामाश्रम सिध्यत्वेन्निति त्वन्ताप्य राम
ब्रह्मरामत्वः। नेति वाच्य इति। विमतयत्वनुच्चारणं चापरं लाघवमिति भावः। हौत्राशब्दात्तु इन्नेः फलमाहाद्वा। ४२६

सरागपर्यायादिति॥ ॥इति श्रीमद्वैयाकरणसिद्धान्तरत्नाकरे नञ्सुजोरवधिः पूर्णः॥ ॥भवनायेत्यत्र
कर्तरि षष्ठी भवति रिहोत्पत्तिवाची॥ अलौकिके तु वाक्ये तद्धितविधावनुवादसमर्थ्यात्षष्ठीति तन्न व्याख्य
ःवस्तुनः कल्पनीयां तावत्प्रत्ययोरर्थरूपस्वरेषु विशेषाभावादिति नोध्यां वीहिशाल्योः आन
न्तर्ये षष्ठ्यत्याद्यं नोदकितावितिसूत्रे कैयटः यत्तु निर्देशादेव षष्ठी समर्थविभक्तिः सा च भवनापेक्ष
या कर्मणि रीत्या क्रमितिन व्याः तन्नु यदि निर्देशादेव तर्हि भवनायेत्यत्र पेत्याद्यनुपपन्नं यदि भवना
येत्यत्र पेत्याद्युच्यते न तर्हि निर्देशादेव षष्ठ्युपपन्नमिति परस्परं व्याहतत्वात् उपेयत्यात्र अलौकिके वा
क्ये षष्ठ्यां तादेव प्रत्यय इत्याग्रहे वीजाभावाच्च विभाषा तिलयवजिघ्राम्नेव चन्द्रनं विभाषाग्रहण
स्य फलमाह पद्रोव जितिउमाभंगयोरपि शणसप्तदशानि धान्यानीति स्मृतौ सप्तदशमध्ये ग
णनाद्धान्यत्वे विवादाभावदिति भाष्यकृतः सर्वचर्मसर्वस्मृर्मणः खञ् इति सर्वशब्दार्थस्य प्रकृत्यंश प्र
त्ययार्थेनान्वयात्तु तत्र पदार्थेनानन्वयात्कर्थं समासः इत्याशंक्याह निपातनादिति सर्वचर्मणा कृतो

स्ता।५

सिर·सु निक्रियायेहयाचर्मणः करणात्वात्कस्येत्ततीयासैवसमर्थाविभक्तिः। यथामुखसंमुखस्य दर्शनोऽस्मिन्नि
४२७ तिदर्शनोदर्पणा दिः। असादृश्यइतिप्रतिषेधान्नकथंसमासइत्याशंक्याह। निपातनादिति। एतच्चवृत्ति
427 मतं। अन्येतुयदार्थानतिवृत्तौयथाशब्दमाश्रित्यानिपातनंनाश्रयंति। तथाचभट्टिः। यथामुखीनःसीताया
पुप्लुवेवद्बुलोभयाञ्चितिमुखमनतिक्रम्यदृश्यमानोमायामृगइत्यर्थः। कर्मणिल्युट्। संमुखमिति। निपा
त्यमानप्रकृतिस्वरूपदर्शनार्थमेतत्। नत्विदंलोकेसाधु। अंत्यलोपस्यप्रत्ययसन्नियोगशिष्टत्वा
त्। निपातनस्यसंप्रत्याहृत्य संमुखोभवेत्यादावभिमुखोभवेत्यर्थप्रतीत्यासर्वार्थकत्वाभावात्। समि
त्युपसर्गपूर्वात्तुप्रत्ययोनेष्यते। अनभिधानादितिभावः। यथामुखं दर्शनइति। कृद्योगेकर्मणिषष्ठ्या
नाव्ययीभावादित्यम्। अव्ययीभावसमाससंज्ञकानांसत्ववचनत्वेनकर्मत्वादिशक्तियोगावश्यंभा
वात्। सर्वस्यमुखस्येति। संमुखस्येतितुनोक्तं। प्रत्ययसन्नियोगशिष्टस्यलोपस्यनदभावेऽप्रवृत्तिरित्यु राम
क्तत्वात्। संमुखीनादर्शादिसादृश्याच्चान्येप्यभिमुखावस्थानःसंमुखीनउच्यतेइतिकैयटःहरद ४२७

वा३

नौ।एतेनसंयुगेसंमुखीनंतमुङ्दंप्रसहेतकइतिमहिर्व्याख्यानः।सर्वांगीणाइति।असान्नमनेरषाम्पामि
तिराः।निमित्तनिमित्तिनो।र्भिन्नप्रानियदिकास्यत्वेसन्पेक्षसमुदायस्यत्वंसमानपदस्यत्वमित्पक्षा
ञुनरेनिस्प्त्रेऽमिहितन्वात्।अउपदसर्वा॥बद्धामहन्नयतिनेयेष्विनिनियात नातिङंनेनापिद्वंद्वः।अनुरायामे
ति।यस्यचापामइतिवापथार्थेपदव्यपमितिवाव्ययीभावइतिभावः।एवंचपादसंबधिदैर्घ्या पलक्षितायापा पो ४
दसंबंधिसादृश्यंपवेत्पर्थः।तत्र द्वितीयेअनुपदीनाउपानदितिसामाधिकरण्यंलक्षणयाबोध्यं।यद्वासा
दृश्यपदव्ययमित्पव्ययीभावोबोध्यः।अयानयइति।एकद्वन्दयेत्पाशारस्यप्रदर्शितागमनमयः
द्वितीयायेत्तपाप्रसव्यवासंगमनमनयोःरूढिवशात्प्रम्पतेतत्रायःसहितेऽनयइत्पुनरपदलोपीतत्पुरु
षः।समाहारद्वंद्वोवास्यत्वविशेष्यइतिरूढिमाश्रित्येवमुक्ता।भाष्यकैय्यटरीत्यानुगतिविशेषएवसइ
तिद्रष्टव्यं।अनयइतिनयतेर्द्विकर्मकत्वादयानयमित्पप्रधानेकर्मणिद्वितीयाप्रधानेकर्मणिकृत्यप्रत्य
याःससहायस्यशारस्यपरेर्नाक्रम्पनेपदं।असहायस्यशारेणापरकीयेणवा ध्यानइतिसंक्षेपनोध्यत

सि॰र॰स्त्र ४२८ 428 प्रकारेणायं विस्तरस्तु कैय्यटमनोरमादौ बोध्यः। शारद इति। शृणांत्यनेन घ्नन्त कारा: परस्परमिति शारः करणो
घञ्। नाकुलकातायरोवरा। अवरस्येति। आदेरिति शेषः। उत्लेक्कृते। आकुराः। एतच्च नियानन्तं सामान्येन के
चिदिच्छन्ति। तेन खप्रत्ययाभावेपि पारावर्यवदिति सुपपन्नं पारंपर्यमिति च। तत्र च रमन्तप्रकारांतरेणासम
र्थयते। परं पराशब्दस्त्विति। आद्यं भन्तद्द्षयति। असाधुरेवेति। परोवरेत्यस्यास्यन्न नास्ति मानाभावादितिभा
वः। एतच्च कैय्यटे व्यक्तं। अवारपारगामीति। गमेरिनिः। अत्रैव नियानं नाडुपधावृद्धिः। भविष्यतीति गम्या
दयश्चेति भविष्यत्कालत्वं। आवश्यके णिनिः। सोपि भविष्यत्येवेति न्यासकृतान्तभयत्राप्यकेनोरिति कृद्यो
गे षष्ठी निषेधाद्द्वितीयैवेत्याशयेन विग्रहमाह॥ अवारपारं गामीति। राष्ट्रावारेत्यत्रावारपाराद्द्विषट्हीनादपि
विपरीताच्चेति वक्तव्यमित्युक्तं तदिहाप्याश्रीयते। तस्त्थैवोदाहरति। अवारीणः इत्यादि। गामीत्यस्य तत्र ज्ञा
न इत्यादि षष्ठे [illegible] ष्ठभावादिहावारपारस्य ग्रहणं। अघस्त्वी। सोत्वमतं त्रं। अघस्त्वीनो गोसम्महइत्यादा ववाष्ट राम
त्वात्। आसन्नमिति। अवष्टभ्यो ऽवाच्चेत्याविह पेयस्य विधेरवष्टब्धशब्द आसन्नवाचीत्यर्थः। अघस्थो वेति वा ४२८

र्थे निपातनात्समासोपि। आगवीं गोशब्दो गोः प्रतिदाने भक्त्या वर्त्तते। तत्राङ्मर्यादाभिविध्योरित्याङोव्य
यीभावे गोस्त्रियोरिति ह्रस्वत्वे च कृते रव प्रत्ययः। ततश्चोर्गुरपः। तदाहा प्रत्यर्पणापर्यन्तमिति। अत्र यापश्चादर्थे
ऽव्ययीभावोयमिति दर्शयति। गोः पश्चादिति। द्वितीयांतादिह प्रत्ययः। क्रियाविशेषणत्वात्। न च स्वप्पजाता
विति रीनायोगे कर्मणि षष्ठीशंक्या। क्रियाविशेषणान्न दप्रवृत्तेः। शोभनं याचकइत्यादौ षष्ठ्यदर्शनादिति
हरदत्तः। कत्पृ कृत्यर्थप्रतिहि कर्मत्वं न भावनामात्रं प्रति। तत्कर्मणो विक्लित्त्यादेः प्रातिपदिकार्थत्वाभावा
त्संकोचे मानाभावाच्च। किं तु विक्लित्त्यनुकूलव्यापाररूपधर्ममपि प्रकृत्यर्थं प्रति कर्मणाः तंडुलादेरेव षष्ठी
तिन स्याप्राप्नुनिन व्याः। अत्र देवदत्तव्योलिंगसंख्यानन्वयिनीया भावनातन्मात्रान्वयिनः कारकत्वं
कर्मत्वादिकं च निर्विवादं तथा च तंडुलादेरिवोत्पत्तिरूपफलशालित्वं विक्लित्त्यादेरप्यस्तीति न भावना
मात्रं प्रतीत्यप्युक्तं वैलक्षण्यापस्यङ्रूपपादनात्। किं च तत्कर्मणो विक्लित्त्यादेरित्यादि हेतूपन्यासोप्यु
नन्वितरएवात्र अपिचनेनहेतुना विक्लित्तेः कर्मत्वमेवनेत्सुच्यतेऽनाम्नीति। नाघः। शोभनं पचतीत्यादौ

सि२-स्त्र
४२९
५२१

कर्मत्वाभावेनतद्विशेषणोद्वितीयानापत्तेः।कर्मणोविवक्षितत्वादेरिक्तक्रियाविरोधाच्चानद्वितीयः।पश्यमृगोधा
वतीत्यादौप्रातिपदिकार्थत्वाभावेपिकर्मत्वस्वीकारात्तेनत्याश्रयवर्णनंनसम्यगितिविभावनीयाहृद
न्तमनेहृदयंगान्तराद्द्वितीयाकारकेप्रतिपादितानीतिदिक्।नव्यास्तुप्रथमांतादेवप्रत्ययः।पश्चाद
र्थेव्ययीभावोपपश्चादितिचासान्तपर्थेनियात्मनेतस्यविभक्तित्रयसाधारणमयोहयोगपनावशान्त्स
मभ्यर्थहन्ति।अन्ततस्तस्यकर्मत्वायोगात्कर्मषष्ठ्याःशंकाप्याएवाभावादित्याहुः।पर्यायप्रमितौ।क्रियाविशे
षणं।अध्वानगच्छतीतितत्रयलक्षणामेततराअध्वनोअलंगामीतिविग्रहीतमुचितत्वात्।कर्मयोगे द
कर्मणिषष्ठ्याएवन्याय्यत्वादलौकिकविग्रहेनद्योगाभावेपिषष्ठ्यंतादेवप्रत्ययइत्यवधेयं।अभ्यामित्र
तालक्षणेनाभिप्रतीइत्यव्ययीभावः।क्रियाविशेषणत्वाद्द्वितीयान्तात्प्रत्ययः।गोष्ठंगावस्तिष्ठंत्य
स्मिन्नित्यधिकरणेघञर्थेकः।अबाबेतिप्रिया।एकाहेनगम्यतइति।कर्मत्वापत्तेर्निपातनादेवनतुग्रह राम
इहनिष्प्रियगमस्त्वित्यनेन।परिमाणाख्यायांसर्वेभ्यइतिघञ्बाधान्तएकाहेनेत्यनेनपरिमाणास्पबु ४२९

तभविष्यदाधमर्ण्यार्थभावेनाकेनोरितिनिषेधाभावा४ उपस्थिततत्यागेमानाभावात्४

ध्यमानत्वात्तादृशस्येति॥ कृघोगल ह्यणा कर्त्तरिषष्ठी॥ शालीनकौपीने॥ रूढिशब्दावेतौ। तत्रशालाकूपश
ब्दाभ्यांमुख्यवृत्तिभ्यांप्रत्ययोनेष्यतेऽनभिधानात्। किंतुवृत्तिविषयेशालाकूपशब्दौलक्षणयोस्व
कर्मिकायांक्रियायांवर्त्ततेइतिगम्यमानार्थत्वात्प्रवेशयतनशब्दयोरप्रयोगएवलोपः।तदुक्तं
भाष्येउत्तरपदलोपोत्रद्रष्टव्यइति।तदाह।शालाप्रवेशमिति।अप्रागल्भ्यादन्यत्रगंतुमशक्तःशा
लामेवप्रवेष्टुमर्हतीत्यर्थः।कूपपतनमिति।यदकार्यंतदाच्छादनीयत्वात्कूपपतनमेवार्हतीत्यर्थ न५
।ततस्साधनत्वादिति।अकार्यहेतुत्वात्तत्संबंधादिति।पुरुषलिंगसंबंधेवस्त्रखंडस्यास्पृश्यत्वादि
तिभावः।व्रातेन।संघेरूढोपिव्रातशब्दःप्रकृतेभाष्यानुरोधाद्विशेषपरइत्याह।शारीरायासेनेति।भा
रवाहनादिनेत्यर्थः।सप्तमिरिति।तद्धितार्थद्विगावेवाप्यतेइत्यर्थः।खञ्।हैयंपादोहइति।गोदोहइतिषष्ठी
तत्पुरुषः।ह्यसशब्देनसुप्सुपेतिसमासः।ननु।विकारेऽनुदात्तादित्वादञिप्राप्तेखञ्।ह्यसशब्दः
कालप्रत्यासत्तिंसूचयतितेनाविकृतरूपगंधमेवघृतंहैयंगवीनमितिभाष्यकैय्यटौ।अमरोप्य

सि॰र॰स्तु
४३०
430

हातन्तु हैयंगवीनं यद्धोगोदोहोद्भवं घृतमिति। एवं भाष्यादिप्रसिद्धमर्थं तु ये त्वसहरदत्तोक्तमाहान
वनीतमिति। तस्य पाक मूलो ऽश्वादिशब्द हृद्यं स्पष्टार्थी। पाकः परिणामः। मूलमारंभः। इति रिति। प
ह्विरांपद्ममूलं प्रति पद्यते न विना वित्तं प्रसिद्धाः सर्वेषां ज्ञापनविषय इत्यर्थः। विन्नो भोगप्रत्यययो।
रिति निपातितः। विद्यावुंचुरिति उकारद्वयगभोसौ प्रत्ययः। विन भ्यां। नानोञ्नकारः स्वरार्थो द्व
ध्यर्थश्च। नानाच क्रान्तेयमपेतिश्कृतो नथादर्शनाच्चावेःशाच। क्रियाविशिष्टेति। पचपि भाष्ये। पत्रक्रि शि॰५
यावाचीशब्दो न प्रयुज्यमेतत्र ससाधनां क्रियामाहुः प्रादे शब्दशक्तिस्वाभाव्यादित्युक्तेः। तथा
पि साधनविशेष्यकबोधानुसारेण क्रियोपसर्जनसाधनमाहुरित्यर्थ इति कैयटेन व्याख्यान
त्वान्न विरोध इति भावः। विशालादयो रूढाः। न तु यौगिकाः। विशालेषु शृङ्गेष्विति गव्यभिधेये मत्वर्थी
यो ऽच् मतु ब्लानभवत्यनभिधानादिति कैयटः। संप्रोदश्च। अत्रापि पूर्ववक्रियाविशिष्टसाधन राम
वाचिभ्यः प्रत्यया इष्याः। इह चाष्टौ वार्त्तिकान्याह। अलाबूतिलेति। भंगा। पृष्टाबंतः। ननः स्यात्। अधा ४३०

पं॰५ अ॰२

न्यानां चक्षुषामित्याद्य। घृदानत्वादृङ्णासिकटङ्क्षिष्ठिः। विकारप्रत्ययापवादोयं रजसो विकारस्त्वाल्लाद्य
लाद्रूकटमिति। ओरञ्मयट्वैतयोरिति मयट् इहप्राप्तः। तिलोमाषशब्दाभ्यां घृतादित्वादञ्नौ दानाभ्या
मञ्दानादेश्चत्वादञ्मयट्प्राप्तः। गोमोर्गायोर्वे तिवुच्चा। असंज्ञायां तिलयवाभ्यामिति मयट्बैतिहृद
न्तःनञ्तिलशब्दस्य घृतादित्वेनान्तोदात्तत्वकै प्पाट्हरदन्नाभ्यामुक्तौ। तच्चिंत्यं तत्राधान्यानां चक्षु
षामिति पितृस्त्वेराग घृदानस्य युक्तत्वात् तिलाश्च मइति वेदेनाथो [redacted] वदर्शना
च्चा। गवां स्थानमिति। तच्छेदमित्यर्थे सर्वत्र गोरजादि प्रसंगे यत्प्राप्तः। संघातइति। अप्रस्तुतावयवः स
मूहः संघातः प्रस्तुतावयवस्तु विस्तारः। सामस्त्येहि कानामयर्वेदीकस्य च्छौ द्विवेइति प्रकृत्यर्थस्याद्वि
त्वे घोत्येइत्यर्थः। उष्ट्रगोयुगमिति। अवयवसंघातप्राधान्यादेकवचनं त्र्ययं पंचकमिति वत्। एव
मुत्तरत्रापि तत्र गोष्ठजादयश्चत्वारो नियद्धार्थिकानि भाष्ये उपमानाद्यश्च गोष्ठादिसिद्धिमाश्रित्य प्रत्या
ख्यातानि। भवने क्षेत्रेशाकट शाकिनौ स्वतंत्रौ वक्तव्यावेव न कस्यचिदपवादौ विमुक्ते। अवटीठमि

सि॰स्तु ति॥ नासिकासाधनेन मनेर्वर्त्तमानात्स्वार्थे प्रत्ययः। क्लिन्नस्याक्लिन्नं नु शब्दस्य चिल्पिल् एतावादेशौ
४२१ लच्प्रत्ययश्च वाच्य इत्यर्थः। भाष्ये तु अस्य ग्रहणं प्रत्याख्याय तेन चिल्ले चक्षुषी इति प्रयोगसिद्धार्थं
चिल्लः पिल्ल इत्यत्र तु मत्वर्थीयो ऽजर्बोध्य इत्यप्युक्तं स्युः। क्लिन्नाक्षे चिल्लचुल्लपिल्लाः। क्लिन्ने ऽक्ष्णि चाप्य न्द्रि॥३
431 ३४ मीत्यमरः। प्रमाणे द्वयसच्। प्रमाणे वर्त्तमानात्प्रथमान्तादस्येति षष्ठ्यर्थे परिच्छेदे वाच्ये त्रयः
प्रत्ययाः स्युः। प्रमाणमिह परिच्छेदकमात्रं गृह्यते न त्वायाम एव व्याख्यानात्। तत्र मात्रच् भव
ति। द्वयसज्दघ्नचोरूर्ध्वमाने विधीयेते। प्रथमश्च द्वितीयश्चोर्ध्वमाने मतौ ममेति भाष्यात्। एत
च्च वचनं नियमार्थं। तत्र ऊर्ध्वावच्छिन्ने नये न मीयते तदूर्ध्वमानम्। वादिते नायामादौ न भवत
:। प्रमाणे लः इति। लः इति लुक इयं संज्ञा पूर्वेषां। प्रमाणवाचित्वेन ये प्रसिद्धा दिष्टिवितस्त्यादयस्तेभ्य
:परस्यैवायं लुग्विधीयते। शमो दिष्टिर्वितस्तिरिति एभ्यो मात्रचो लुक्। न तु रयोः शमादीनामूर्ध्व राम
मानत्वाभावात्। द्विगोर्नित्यमिति। द्विगोरप्रमाणत्वान्न दनविध्यभावाद्वाच्च पूर्वेणाप्राप्तो लुग्विधी ४२१

यतो विकल्पस्याप्रकृतत्वेपि नित्ययहरां संज्ञायेविधास्यमानस्य मात्रचो लुगर्थो द्वैशमो स्याता
न वाद्विशम इति। अन्यथाश्मः प्रमाणामस्य स्यान्भवाश्मममात्र [redacted] मित्यत्र यथालुङ् भव
तिप्रमाणो लङ्त्यस्य सोत्रपा प्नि मात्रविषयत्वात्तासंशये मात्रचोपि लुकि विधानवैयर्थ्यात्तत
थेहापि न स्यात् तातस्मान्नित्ययहणं बाधकबाधनार्थमेव। अत एव लिंगात्तदंतविधिः। द्विश
मइत्यादौ प्रकरणादिवशात्संशयनिश्चयविषयप्रयोगावधारणं। अत्रवार्त्तिकानि। डट्स्तोमे
वक्तव्यः। परिच्छेदोपाधिकसंख्यावाचकात्स्तोमे अभिधेये डट् वाच्यः स्वार्थेः। पंचदश मंत्राः परि
माणमस्य पंचदशः स्तोमः। पदानुसाहचर्यात् लुकृताया पंचदश शब्दो रात्रिमाहतद्दाडी बंधीर
त्वां पंचदशी रात्रिरिति। यत्तु संख्यायाः संज्ञासंघेत्यत्र स्तोमे डविधिः पंचदशाद्यर्थमिति डविधा
नं तद्दीर्घ यदि प्रयोगो स्ति नो चेत्स्व पंचार्थात् तथाशत्शनो डिनि वाच्यः। त्रिशिनो मासाः पंचदश
नोर्द्धमासाः। अभयत्रा नेनेवडाविप्रत्यये सिद्धे शन्शतो डिनिं छंदासिवक्तव्यइति वचनं च व्यर्थमि त्प६

सिरसत निकैय्यप्रत्ययविंशतेश्च डिनिर्वक्तव्यः। विंशिनो अंगिरसः। तिविंशतेरिति लोपे यस्येति चेत्यल्लोपः।
४३२ तस्मिन्कर्तव्ये ऽसिद्धवदत्रेतिति लोपस्यासिद्धत्वं विंशिन इति भाष्योदाहरणाद॰ नित्यत्वा
432 दीप्रमाणे परिमाणाभ्यामिति रूढिशब्दावेतौ भेदेनोपात्तौ। पुरुषहस्तिभ्यामण्च। अत्र यद्वक्तव्यं तस्व
रूपात्प्रमाणे इति सूत्र एव प्रपंचितं तत्र तत एवावधार्यं। ग्रहणवता प्रातिपदिकेन तिन्तदंतविधि
६५ प्रतिषेधाद्विगोर्नित्यं प्राप्तेभ्यः। पूर्वाचार्यैर्डावतुप्रत्यये विहितवत्तस्तन्मते त्वावतः पुरुष
सोयइ विप्रस्य मावत इत्यादाववग्रहो नस्यादतो वतुबेवन्याय्य इत्याशयेनोदाहरतीया
वानिति। आ सर्वनाम्न इत्यात्वं। ननु विह परिमाणे। किं परिच्छेदकमात्रमुत परिमाणं तु सर्वत
इति साकांक्षे नाद्यः। प्रमाणे इत्यत्र त्वस्यैव सिद्धेः परिमाणग्रहणवैयर्थ्यापत्तेः। न द्वितीयः।
यावती भार्या यावती बुद्धिः यावान्ध्वायावती रज्जुरित्याद्यसिद्ध्यापत्तेः। आपामादीनां परिमाण राम
त्वाभावात्। पद्घ्नद्वये विशेषविहितेन वतुयामात्रजादीनां बाधात्तन्मात्रं यन्मात्रमित्याद्यसिद्धेः। ४३२

पन्नेश्वात्राश्रीच्यनेतासांकेतिकमेवेहपरिमाणांगृह्यतेसामर्थ्यात्तायावान्धान्यराशिरित्यादिर्कंमुख्यमु
दाहरणं।प्रावतीभार्य्यत्यादीनांलक्षणायासाधुत्वंबोध्यं।एवंचप्रमाणइत्यनुवृत्त्याप्रमाणोपाधि
केभ्यःपदादिभ्योवत्वत्विधीयतेतदावतुविशेषविहिततयासामान्यविहितान्मात्रादीन्बाधेतापर
रिमाणाग्रहणेतुसतिभिन्नोपाधिविषयत्वात् बाध्यबाधकभावाभावः।तेनतन्मात्रंयन्मात्रमित्यादि
प्रमाणोपाधौप्रकृत्यर्थेसिध्यतितत्परिमाणमस्यधान्यस्यतावद्धान्यंराशीकृतंतावत्प्रमाणमस्यकु
ड्यादेस्तावन्मात्रंयादृग्राशीकृतस्यधान्यस्यदैर्घ्यंतादृगस्यापीत्यर्थः।एकविषयत्वेतुवतुपैवोक्त
त्वा।द्विशिष्टस्यप्रमेयस्यतदंतान्मात्रादयोनस्युः।यस्यहितावत्प्रमाणांतस्यतत्प्रमाणंभवत्येवेति
तावच्छिष्टस्यैवतत्रापिप्रयोगःस्यात्।अन्यथामात्रजादिप्रत्ययमालास्यादितिकैयटः।नव्यास्त्वत्रय्य
वांत्र्यत्रेदंवक्तव्यं।परिमाणाग्रहणेनुसतिभिन्नोपाधिविषयत्वा द्बाध्यबाधकभावाभावइतिवक्तं
स्वकोथोभिमनस्थकिंशद्वाधिकोत्सुनयोक्तिकएवसोर्थः।नाघः।भिन्नोपाधिविषयत्वादित्यादिप्रा

दर्थाधिक्य२

योपन्यासवै॰ पर्थ्यातानद्वितीयःप्रक्रमात्रमित्यादिसिद्धये हि परिच्छेदकमात्रं प्रमाणशब्देन गृह्यत इत्यु॰
क्तेसवैरपि इह च सांकेतिकं परिमाणं गृह्यत इत्यपि तथा च प्रकृतिविशेषमर्थविशेषं चोपजीव्य
प्रवृत्तस्य वतुपो निरवकाशतया मात्रादिबाधकत्वं दुर्वारमेवेति तन्मात्राद्यसिद्धिः प्रमाणशब्दभेदमात्रे
णाबाध्यबाधकभावानङ्गीकारे यद्दघ्नमादावपि न न स्यादिति सर्वोपप्लवापत्तेश्च तस्मात्कैयट
कृतं भाष्यव्याख्यानमयुक्तमेव। कथं तर्हि यन्मात्रं तन्मात्रमित्यादिसिद्धिरिति चेत् योगविभागे
नेति गृहाण। तथा यत्तदेतेभ्यः प्रमाणे इयसज्जित्यादिसूत्रमिहानुवर्त्तते। ततः परिमाणे वतुप्
। यत्तदेतेभ्य इत्येवानुवर्त्तते नान्यद्वितीयं भाष्यं व्याख्येयमिति सर्वमनवद्यमिति दिक्॥ किमि
दंभ्यां सामर्थ्याद्योगविभागं वा भित्त्वा व्याचष्टे। आभ्यां वतुप् स्यादिति। कियानिति इदंकिमोरी
त्कीर्यस्येति चेत्यघलोपः इयानिति प्रत्ययमात्रमवशिष्टं। किमः संख्यापरिमाणे। संख्यायाः परिमाणम
वपरिच्छेदस्तस्मिन्कर्त्तव्ये पः प्रश्नस्तत्रवर्त्तमानात्किमो स्येतिषष्ठ्यर्थे डतिः स्यात्। संख्यापरिमाणे। ४३३

किंतर्हि पेमा भूल्लोके यमेषां दशानां संख्या। अवयवानाममेषां गोणानाम् मात्रोपजीविनां। सहस्रशः समे
तानां परिमाणेन विघात इत्येवं संख्येयपदद्वारेरोहसंख्यायामिदं द्रष्टव्या। संख्याया अवयवे तयप्। अवयवे वर्त्तमा
नायाः संख्येयतद्वाचकेद्वयवयविनि वाच्ये तयप् स्यात्। अस्येत्यधिकारादवयवी प्रत्ययार्थः। उभादुदात्तो। उ पा ३
होदात्तश्च प्रत्ययस्यादेरेव विधानसामर्थ्यात्। न च सर्वस्योदात्तत्वसंभवः। अनुदात्तं पदमेकं वर्जमिति १४
वचनात्। तदंतस्य पत्नु चित्त्वात् सिद्धं शतसहस्रयोरेवेति। अधिके समानजातौ। विंशंशतसहस्रयोः।
यस्य संख्या तदाधिक्ये डः कर्त्तव्यो मतो ममेति भाष्यात्। शदंतविंशतेश्च। प्रत्ययग्रहणपरिभाष
यानुदादिनियमे प्राप्ते तं वारयितुमंतग्रहणं। तेन एकत्रिंशं शतं। एकचत्वारिंशं शतमित्यादि सि
ध्यति। इह च संख्यायाश्च अवयव इत्यतः संख्याया इत्यनुवर्त्तते। तेन गोत्रिंशदधिका अस्मिन् गोशते
इत्यादौ नातिप्रसंगः। अंतग्रहणं विंशतिशब्दान्नं तदंतेयं ग्रहणाचेन निषेधं बाधितुं। तेनैकविंशं
शतमित्यादि सिद्धं। संख्याया गुणस्य निमाने मयट्। जातमित्यत्र तस्य दस्योनिवर्त्तते। मेढ्रू प्रतिदानदम

सि॰ र॰ स्त॰ तः करणो त्रुटि निमानशब्दः सच मूल्यवाची प्रकृतपर्यविशेषणमेन ता गुणशब्दो भागवाचीत्याश
४३४ येनाह। भागस्य मूल्यमित्यादिना संख्यावाचिन इति। अनेकत्व संख्यावाचिन इत्यर्थः। भूयस इति
434 वक्तव्यमिति वार्त्तिकात्। नत्र भूयस्शब्देनानेकत्व संख्या लक्ष्यते। न चात्र मानाभावः। निमेयसं
ख्याया एकत्वे सत्येव प्रत्ययइत्येवं परमेकस्माद् दन्यतरइति वार्त्तिकमुपन्यस्य इत्यमाभूत् द्वौ यवा
नां त्रय उदश्वित इति भाष्यकृत प्रत्युदाहरणस्यैवमानत्वानापत्तेः कैयटेन एतदेव प्रतीकं गृ
हीत्वा नन्वत्र भूयस्त्वाभावान्न भविष्यति। एवं तर्हि उदाहरणा दिगियं द्वित्वेनोदाहरणात्र योय
वानां द्वा उदश्वित इति अथ वा द्वौ यवानां निमेयौ त्रय उदश्विद्भागा निमानमिति विवक्षायामु
दाहरणमिति भङ्ग्यो व्याख्येयमित्युक्तं। तद्भिन्नाशंका समाधानपोर्द्वयोरपि स्वोक्तोदाहर
णाप्रतिसंधानाभाव मूलकत्वात्। यवानां द्वौ भागौ निमानमस्य उदश्विद्भागस्य द्विमयमुदश्विद्य राम
३ नुभवतीति वानामिति तित्रोदाहरणत्वेन स्वयमेवोपन्यासात्। न हि द्विशब्दो भूयस्त्ववाची। तस्मात्कैयटो ४३४

किं च भूयस्त्वाभावोऽत्र कुत्स्तव कोऽर्थोऽभिमतः। किं मुख्यं भूयस्त्वमुत लन्दरणायानिमेयभागसंख्यापेक्षया निमानभागसंख्या वा
ऽऽधिक्यमात्रम्। नाद्यः। द्विमयमुदश्विद्यवानामिति त्वदुदाहरणासंगतेरुक्तत्वात्। न द्वितीयः। एकस्माद् दन्यतरइति [illegible] र्तिको
क्तेः। प्राग्भूयस इत्यस्यतादृग्विवक्षाय निर्मल [illegible] दस्य सं [illegible] मानाभावात् संदर्भो [illegible]

कं भाष्यतात्पर्यज्ञानमूलकमेवेत्यस्मद्व्याख्यानमेवयुक्तमिति दिक्। द्विमयस्तु दश्विपवानामि
ति। भागविशेषयुतिपत्यर्थंपवादः प्रवृत्तत्वं तु विशेषणस्योपादानं। नित्यसापेक्षत्वेन वृत्तिर्भवति
।एवं संबंधिभागद्वयरूपसाधनप्राप्य दश्विज्ञागइतिशब्दबोधः। निमानस्य निमेयापेक्षत्वा त्ति
मेयं प्रत्यपार्थः संपद्यते निमानस्य च गुणत्वं विना निमेयस्य गुणत्वं नोपपद्यत इति सामर्थ्यान्निमा
नस्यापि गुणत्वं लभ्यते। संख्यायाः किं। पवभागो निमानमस्याः दश्विज्ञागस्या। अनेकत्वेति
किं। एकोपवानां भागो निमानमस्याः दश्विज्ञागस्येत्यत्र मा भूत्। निमेयसंख्यापेक्षयानिमान
संख्यापदाधिका भवतीति तदेव पुनरपि तात्पर्यार्थं भूत्। स इति वार्त्तिकमित्युक्तत्वात्। गुणस्येति
किं। द्वौ कार्षापणौ निमानमस्य व्रीहेः द्विमयो व्रीहिः कार्षापणाभ्यो रिति मा भूत्। गुणस्येत्यत्र
चैकत्वं विवक्षितं तेनेह न द्वौ पवानां त्रयं उदश्वितः षष्ठ्यर्थ इति किं। [illegible] जातमित्यादौ
[illegible] स्वार्थे मा भूत् [illegible] इतरथा पवानां द्वौ भागौ निमानमस्योद

ह१

सि रुस्त श्विड्भागस्य द्विमयोयवानामुदश्वित इति स्यात्। निमेये चापि दृश्यत इति वाच्यं। निमेये विद्यमानाया
४३५ संख्यास्तद्वाचकान्निमाने प्रत्ययेनाभिधानं वैमयड्वा चकारोन्यार्थः। द्विमया यवा इति। उदश्वितो द्वौ भागौ
435 निमेयो येषामेकगुणानां यवानां ते द्विमयाः। नन्विह निमेयस्यापि निमानत्वमस्त्येवेति किं वा तत्त्वि
नेति चेन्नोभयोरपि त्यागविषयत्वाविशेषेणा निमानत्वे निमेयभावस्य वैवक्षिकत्वात्। पूर्वाप्रत्यया
र्थस्य बहुत्वाद्बहिर्नत्वेपि क्वचिन्मयडर्थे वार्त्तिकमित्यलं पल्लवेन। तस्य पूरणे डट्। तस्येत्येकत्वम
तंत्रं। पूर्यतेनेनेति पूरणं करणे ल्युट्। एकादशानामिति। अवयवावयविभेदः समुदायः
या४ पूरणत्यर्थः। अवयवकप्रत्ययार्थः। पूर्वसूत्रात्संख्याया इत्यनुवर्त्तनात्। पंचानामुष्ट्रिकाराणां पूरणोध
र्द्ध इत्यत्र न डट्प्रत्ययः। संख्येयं यया सा वृद्धिः पूरयतीति तत्र यस्मात्संख्यावाचिनः शब्दात्स्वयं तस्तदीय तप 3
प्रवृत्तिनिमित्तस्यैकादशत्वादेर्डट्प्रत्ययो भवति। सन्निधानात्। तथा च मुक्रमेणापि गण्यमाने षष्ठ्या राम
पेषु समर्थः पदविधिरिति द्वितीयोष्टमो भवत्येव। नांतादसंख्यादेर्मट्। इति। नांतादिति पंचमः पाडः ४३५

१२

ग मा २ प्र

तिप्रथमायाः षष्ठीप्रकल्पितेति भावः। वस्कनस्कमटः प्रत्यत्वेपि नत्वनिः। रूपेस्वरे वा विशेषाभावात्।
यत्तु न मटआगमत्वमवश्यमंगीकार्यमौत्तु दात्तत्वार्थं। अन्यथा प्रत्ययाद्युदात्तत्वं स्यात् न चेष्टा
पत्तिः। [redacted]ः शात न मंवेश्यंस र्वनातेन्यत्रानोदात्तविरोधात्। एवं च तदेकरूप्याय मटोप्या
गमत्वं युक्तं। ऊकंच वार्त्तिकहतां मडादिषु यस्यादि सन्निर्देशः कर्त्तव्य इतीति न व्यादयः। मडादिषु विनि
तक्तु गासविज्ञानो बहुव्रीहिरित्याश्रित्यैतेस्य थोक्तं। पन्तानरेख मंडूकप्लुत्याध द्वतीत्यादिसूत्रेषु अनु
वृत्तिर्बोध्या। द्वितीय स्वेसंप्रसारसांचेत्पनयोस्तत्रयोर्डटःसंबंधाभावेन न तदुत्तरत्र तमद्विधौ मंडूकप्लुतेन
भवतोप्यावश्यकत्वात्। घद्वतीति सूत्रे षष्ठीनिर्देशात् षडादीनामागमित्वेनिश्चिते डटस्तदसंभवात्त
न्मध्याविपरिणाम्यत इत्याह। डट्यतीति। डट एव षष्ठुट न हतः। षष्ठश्चतुर्थ इत्येतनयोर्डस्य विसर्गाप्रसं र्ज ३
गात्। पंचमः। सप्तमहत्यादौ न लोपार्थं परादिमिदूहतः। आधद्वेरीति। अत्र सहितं व्यंडुनमहेरः। असं
हितस्यादेर्व्यंडनस्येत्यर्थः। द्वितीयः। आगमलिंगाभावात् प्रत्यय एवेत्याशयेनाह। डटोपवादइति। डटो
वकुप्रगालिङ्गविशिष्टपरिभाषया बह्वीनां पूरणीत्यतिथीड् इत्य पि सिध्यति। भस्याढइति पुंटिविवन्हि ते
पुं वद्भावः। ततः प्रत्ययागमोस्त्त्ः। एवं कतिपयानां तरशापि बोध्यम्। १

सि॰ र॰ स्त्र द्विशब्दस्य वानाप्यमादेशः। विभाषाद्वितीयात्तृतीयाभ्यामिति निर्देशात्तृतीय इतीह लइति दीर्घस्तु न।
४३६ अराद्युत्पन्नवृत्तेः प्रत्ययन्न भ्रमं वार्थयितुं अस्तु चेति नोक्तं त्वापकाश्रयरोतु प्रतिपत्तिगौरवं स्यादिति भा
436 कः। विकृतरणा लिंगविशिष्टपरिभाषया बव्हीनां स्त्रसीबहु निषीदन्त्यपि सिध्यति भस्य ढे इति अद्वितिवन्हिते
सुवन्नावः। ततः प्रत्ययाग्रमौत्सः। एवं कतिपयवर्णनयोरपि बोध्यं॥ विंशत्यादिष्विह सन्निहितत्वात्त्व
ष्ट्रादिसूत्रे नियान्तिता विंशत्यादयः शतान्ताः शब्दात्त्रान्त्वोग्रह्यते तेन लोकप्रसिद्धाः। विप्रकृष्टत्वादिति कैय
टः। भाष्यमतमिति तु न वाः। भाष्यकृतेह प्रघेह केविशिष्यानुक्तत्वाद्भाष्यमतमिति कथं प्रमितमि
ति तएवपृष्टव्याः। लौकिकानां तावद्दशानां ग्रहणमिति वृत्तिमतं। एकविंशतितमइति। आगमविधे
ः प्रत्ययविधित्वाभावाद्ग्रहणावतेत्यप्रवृत्तौ संख्याविशेषणत्वेन विंशत्यादेस्तदंतविधिः। हलभइ
तिभावः। स्यादेतत्। षष्ठ्यादेश्च संख्यादेरिति सूत्रे षष्ट्यादिशब्दात्प्रत्ययो विधीयत इत्यादि वदता भा राम
ष्यकृता यहणावतेति न दंतविधिनिषेधमप्याशंक्यासंख्यादेरिति पर्युदासेनेह प्रकरणे तदंतवि ४३६

धिंज्ञापयित्वात्तत्प्रयोजनं चैकविंशतितमइति सिद्धिरित्युक्तं तत्र स्वमिति चेन्नाप्रत्ययमतस्यापि प्रत्य
पूर्वस्वीकृत्य तथोक्तत्वात्। एतच्च केय्यटे स्पष्टं। एवं चैकोनविंशतितमइति सिध्यति। वृत्तिमते त्वनेन
सिध्येत्। विंशेः प्राग्भावित्वादस्याः संख्यापाशनिके य्यटहरदत्तादयः। तस्मिंत्स्य। विंशतित्वादिसंख्या
याः प्रत्ययागमयोः कर्तुमशक्यत्वेन तद्वाचकानां विंशत्यादीनां ग्रहणं स्यावश्यकतया तेभ्य
तदं न विधावेकोनविंशतितमइत्यस्यापि निर्बाधत्वात्। स्वरूपमित्यस्य बाधेमानाभावाच्चेत्तां त्याप
तावत्। नित्यंशतादिमाससंख्यादेरित्यस्य बाधनार्थमिह शतादिग्रहणमिति सूचयन्नुदाहरति।
एकशततमइति। अन एवेति। मासादेः संख्यावाचित्वाभावेपि डट्स्तमड्विधानसमर्थ्यादित्यर्थः।
स्वरानुरोधेन केवलस्तमड्विधाव मशक्यइति भावः। मतो। मत्वर्थेइति। मतोर्विषयइत्यर्थः। तेन सम
र्थविभक्तिः प्रकृतिविशेषणं प्रत्ययार्थश्चेति सर्वं लभ्यते। इह चास्य वामीयं कया शुभीयस्तक्तमित्यत्रा
पि छो भवत्येव। द्वितीयविभक्तिग्राग्भागानुकरणात्स्या प्रातिपदिकत्वात्। प्रकृतिवदित्यस्यानित्यत

सि॰स्॰वृ याऽप्रवृत्तावनुकरणं।ानगीतस्यङमादेर्नलुङ्।आकर्षादिष्ट्दनेभ्योवुनाकृपासिद्धिप्रसंगात्कन्वि
४३७ धीयते।अशनिकः।इशकुनिकः।स्मरुकः।सुख्य इति।हरदत्तस्वरसात्।धनाहिरण्यात्।कामएवप्र
४३७ त्ययोन्तु कामवति।अनभिधानात्।अतोभेदसंबंधेकाम्निनःषष्ठ्यैवेत्याह।धनकोदेवदत्त
स्येति।अविजिगीषाविनि।दिवो विजिगीषायामितित्रैवनिष्ठानत्वविधानात्।सस्यनक
र्मरित्व तापियं।अतएवेति।अकेनोरितिप्रतिषेधादितिभावः।तंत्रात्।नंत्रं।तंतुवायश्लाकः
।तन्यंनेतंतवोऽस्मिन्निति ह्युत्पत्तेः।अचिरःकालःअपहृतस्यकालः।परिमाण।तोनेतिसमासः।
ब्राह्मणकः।ब्राह्मणाश्रद्दादायुध जीविन्नोपाधिकात्प्रथमांतात्समर्थ्यैकन्नियात्पत्तेः।अशहान्तेत्र
ल्यत्वोपाधिकात्कन्नातदाह।आयुधेत्यादि।शीनोह्मभ्यां।शीतमिवशीलं।सतिशीनेकार्यकरणोप
युत्वाभावात्।उष्णमिव उसंशीघ्रमित्यर्थः।क्रियाविशेषणत्वेनह्रितीयांताभ्यांप्रत्ययः।क्रियाविशे राम
षणात्।हयोगषष्ठीनेत्युक्तत्वात्।अधिकं।अध्यारूढेति।गत्यर्थाकर्मकेत्यादिनारुहेःकर्तरिकर्मणीव ४३७

कोऽविहितः। आद्ये अध्यास्तोऽद्रोणः खारीमिति भवति। अनभिहिते कर्मणि द्वितीया। द्वितीये तु आधिका
खारी द्रोणेन। अनभिहिते कर्तरि तृतीया। एवं चाद्येऽधिकशब्देनाधियोगे द्वितीयायां प्राप्तायां यस्मादू
धिकं न दस्मिन्नाधिकमिति निर्देशाद्य बलात्पंचमीसप्तम्यौ स्तः। द्वितीये तु कर्मणि। अभिनत्वात्प्र
थमा। आधिका खारी द्रोणेन। कर्माधिधिकशब्दयोगे भाष्यप्रामाण्यात्कर्तृत्वे तृतीयैव न पंचमी
सप्तम्यौ। विनिश्चये। अत्र तु कास माहार द्वन्द्वे सौत्रं पुंस्त्वम्। अन्ये त्विभ्यामिति प्रादीनां वृत्तिविषये शब्द
शक्तिस्वाभाव्यात् क्रियाविशिष्टसाधनवाचित्वमस्तीत्युक्तं देशकाल कर्त्वा चावित्यत्रापि अत्रापि
ताहृशाभ्यामेव स्वार्थे कृतनिपात्यते। पार्श्वेनान्विच्छति पार्श्वकः उपायैरन्विच्छति मानसाधुर्यायी
पि एवमृश्यपयः शूलदंडाजिनशब्देभ्यां केऽत्र शीतोष्णपार्श्वेयिः शूलदंडाजिनशब्देभ्यामुखार्थेभ्य
ःप्रत्ययोऽन्वेष्यते। अनभिधानात्। नावनिथ। यथा तस्येदमित्यत्र तस्येति षष्ठ्यन्तानामुपलक्षणत्वेन सा
मान्यनिर्देशस्थेहापि नावनिथमिति पूरणप्रत्ययान्तानां सामान्यनिर्देशः कस्मादिति। अस्वरितत्वा

हि

पोर

सि॰ स्तु त्संनिहिता यिठकुठजोर्नानुवृत्तिरितिभावः। कनोलुकि लुग्वाग्रहणं व्यर्थं महाविभाषयैव पंचमं पंचम
४३८ कमिति रूपद्वयसिद्धेरतस्तत्सार्थक्याय सूत्रमतमाहाऽऽहरणात्प्रत्ययस्येति। हृन्नि कृतायामेवं व्याख्या
438 नमुपादितार्थं च व्याख्यानमनुदाहृतं वार्तिककृता तु कनएव लुकं स्वीकृत्य लुग्वाग्रहणं प्रत्या
ख्यातं। लुग्वानर्थकं विभाषाप्रकरणादिति। एवं च द्वितीयकं द्वितीयमित्येव साधु न तु द्विकमिति। यथो
त्तरं मुनीनां प्रामाण्यात् श्रोत्रियंश्छंदो धीते वा। वाक्यार्थे श्रोत्रियन् पदं निपात्यते। नित्यं स्वरार्थो वा
क्ये क्रियाप्राधान्येऽपि सत्वप्रधानानि नामानीति निरुक्तात् प्रातीत्यनुरोधाद्वा क्रियाश्रयस्य कर्तुः प्राधान्यं
बोध्यं। अथ वा छंदःशब्दस्य श्रोत्रादेशो घन्प्रत्ययश्च छंदःकर्मकाध्ययनकर्तरि निपात्यते इति श्रोत्रिका
यांतरं। आद्यमनेनाकमेरिति प्रसिद्धोऽपि श्राद्धशब्दोऽलंकारणायानन्तसाधनंद्रव्यमाहामुख्यार्थस्य भोज
नकर्मत्वासंभवादिति। श्राद्धीति। अघभुक्तवत्वेवायं प्रयोगः। अघभुक्तेऽपि। श्राद्धी श्राद्धिक इति कथं न प्रयो राम
गः। अनभिधानात्। पूर्वादिनिः पूर्वमिति क्रियाविशेषणाद्द्वितीयान्तात्प्रत्ययः। छंदसि परिशत्रुवाचकात्सर्पिवच्छा। ४३८

नी५ इति६

६१

न्यशब्दौ स्वार्थे इनिप्रत्ययः। प्रकृते स्वपरिपंथपरि पर इत्येतावादेशौ निपात्येते। अपत्यं परिपंथिनं मान्वाय
िपरी विद्न्ता उभयत्र परिशब्दे स्वग्रहः। इदं च सूत्रं वैदिकप्रक्रियामेव वक्तुं प्रवृत्तमित्याशयेनाह। लोकेति
त्यादिना। परिपंथिनशब्द इति। उपलक्षणमेतत्पारिपरितश्च स्य। अपि तेन द्वावपि लोके असाधू इत्यव
धेयं। अनुपदमिति। पदस्य पश्चात्। पश्चादर्थे व्ययीभावः। अनुपदीग वामिति। पदोपेक्षया षष्ठी। गोपदात्प
श्चादन्वेषणं। तावामेवा तेन रज्जनादावन्वेष्येन भवतीति वृत्तिव्याख्यातारः। साक्षात्। साक्षादित्यव्यय
। साक्षीति। अव्ययानामभमात्रे टिलोपः। त्रयीत्र द्रष्टुमो भवेति यश्च ददाति यस्मै च दीयते। पश्चाद्य
द्रष्टा। सर्वत्र प्राप्नोति। संज्ञाग्रहणं। सामर्थ्याद्धु निकांते वासिनो न भवति। क्षेत्रिय च। स परम्यं तात्पर
क्षेत्रशब्दाघच्परं शब्दलोपश्च निपात्यते। क्षेत्रियो व्याधिरिति। किं च क्षेत्रियपादीतरानि। यानि सस्यानां
नाशार्थं क्षेत्रे जातानि तानि चिकित्स्यानि नाशयितव्यानीत्यर्थः। अपि च क्षेत्रियं विषं परशरीरे संबंध
चिकित्स्यते। अन्य च क्षेत्रियः पारदारिकः। परदाराः परक्षेत्रं तत्र चिकित्स्यो निग्रहीतव्यः। इन्द्रियमिंद्र। इत्येवं

दृस्योति ३

सि·स·तु द्वाक्यार्थे पदवचनं। पद्वाइंडशाद्वानघ च निपात्यते। इंद्रस्य लिंगमित्यादिष्वर्थेषु। इंद्रेणादृष्टं इंद्रानां मम
४३९ चक्षुर्मे मद्याराां श्रोत्रमित्यादिक्रमेता स्कष्टं श्रद्दृष्टद्वाराद्रुष्टं सेवितं प्रीणितं वा दत्तं यथायथं विषयेभ्य
स्य३ ॥ तदस्यास्त्यस्मिन्निति मतुप्॥ तदिति प्रथमासमर्थादस्तु उपाधिका[...] षष्ठ्यर्थे विशेष्यसप्तम्यर्थे च मतुप् स्यात्।
439 अस्तीत्यत्र पुरुषवचने अतंत्रे। कालस्तत्रमेव। अतिशहो विषयविशेषसमर्पकः। स च विशेषो वार्ति
ककृतोक्तस्तमाह भूमेत्यादिना। अस्ति विवक्षायां मतुबादयस्ते भूमादिषु विषयेषु भवन्तीति वा
र्तिकार्थः। भूमा बहुत्वं नन्वायेक्षिकः। यस्य हि या बाह्यकं ततोपि यत्किंचिदाधिक्ये भूमा भवति। यथा
पंचभिरपि गोभिर्द्दं वदन्नस्य बहुयो गावः इति व्यवहरंति सहस्रगोरपि राज्ञो गावोल्पा इति। गोमान्। यवमा
न्। इह च यवमतीभिरद्भिर्यूपं प्रोक्षतीत्यादौ जातिमात्रसंबंधस्य विवक्षितत्वाद्भूमाभावेपि मतुप्। भूमादिग्रहणा
न्नियमार्थं प्राप्ते। भूमादिष्वतीतिः स्मीत्येवंपरं। निंदायां ककुदावर्तिनी कन्या। प्रशंसायां रूपवान्। नित्य राम
योगे क्षीरिणो वृक्षाः। अतिशायने उदरिणी कन्या। संसर्गे दंडी। संसर्गः संयोगः। तेन संयुक्तदंड एवैवं कथ्यते न ४३९

त३

न्तु गृहस्थितदंडोपि । अत एव सामीप्यानंतर्यादिविवक्षायामपि न प्रत्ययः । चित्रागावोऽस्यानंतराः चि
त्रागावः अस्य समीपे इति विग्रहेपि न तत्रावयवात्प्रत्यय आपाद्यतेऽन समुदायात् । नाद्यः सापेक्ष
त्वेनासामर्थ्यात् । नान द्वितीयः अप्रातिपदिकत्वात् । इत्थं च भाष्यादौ सामीप्यादेः षष्ठ्यर्थत्वमंगीकृ
त्यैव तद्धितबहुव्रीहिनिरस [illegible] इत्युक्तं । एतेन सामीप्यादिकं षष्ठ्यर्थ एव न भवतीति हलंत्यसूत्रे
न्यासोक्तं निरस्तं । भाष्यकैयटादिग्रंथविरोधात् । तापत्तेर्नैयायिक [illegible] व क्रिमद्वानिति प्रयुंजते
तन्नाशौचिकान्मत्वर्थीयादिति निषेधस्य वक्ष्यमाणत्वात् । ततो मत्वर्थ इति मत्वाज्ञास्त्वप्रहस्य सम
वाद्यं । गुरावचने भ्यष्टति गुरोतद्धितिच येप्रसिद्धाः स्पृक्कादयस्त एव गृह्यंते । नन्वरूपादयो गुरौशोन्यप्रसि
द्धाः रूपाद्यध्यतय प्रयोगात् । माष्ट्य यामश्च आश्च मांसमाहारे द्वंद्वः तद्व मत्वे वा द्विगप्रातिपदिकस्य निष्ठ्रा
षणांतदाह । भवणांविणांतादिति । उपधापाप्रवृत्तिनाकर्यात रांउपधा संज्ञकोन्मात्परस्य मनोरिंदु
के येन नाव्यवधानन्यायेनैकवर्णव्यवहिते एव भवतीत्याशयेन फलितार्थमाह । भवणाविर्णोपधा

सिर-स्व दिनि। अयः।३। एर्वं वदेवनर्दं नविधिरित्याह। अगंतादिनि। रसादिभ्यश्चा। अन्यमनवर्थीयनिक्तपथीमि
४४० ति। भाष्यकृत्तु अन्येषामपि मत्वर्थीयानामिष्टत्वान्न चेंप्रत्याख्यातम्। रसिकोनटः। उर्वशी वेरू पि
४४० रात्रिप्रसर्सोस्पर्शिकोवायुरित्युदाहरन्। शिखावाद्दीपइति। ननु शिखाशब्दस्य ब्रीह्यादौ पाठ
ल्लब्धेऽप्रसंगादिदंप्रत्युदाहरणीनयुक्तमितिचेन्न स्पीष्टूडावान् हहइतिप्रत्युदाहार्यो प्रारोयेगा
द्वैति। एतच्च वार्त्तिकं भाष्यकृतानभिधानमाश्रित्य प्रत्याख्यातं इति कररणां लब्धामिति
ल्याः। सिध्मादिभ्यः।२। वैसत्वाद न्यतरस्यामित्यनुवर्त्तते तत्र समुच्चयार्थेनापात्तानामने
कार्थत्वादित्याशयेनाह। लज्वेति। वाशब्दोपि समुच्चयार्थकः। वा स्याद्विकल्पोपमयोरेवार्थे
पि समुच्चयइति कोशात्। तेन लच् मतुप् चद्वावेव प्रत्ययौ भवतो न त्विनिठनाविति भावः। एवं
व्याख्याने मानं तु लजन्यतरस्यामिति समुच्चयइति वार्त्तिकमेव। एवं च सिध्मा। निष्पावा। मां राम
सेन्यादयोपि। दंताश्च इति ठनो न भवत एवेत्यवधेयं। लिंगमप्यत्रास्ति। पिछादिभ्यो मतुबिलचौ ४५०

४४१

चेव विधीयेनेनान्विनिष्ठनौ तुंदादिभ्यस्तु चत्वारः प्रत्यया भवंति श्लजिनिठन्मतुपः तत्र पिच्छा
दिषु केचिदिंदताः पठितास्तुंदादिषु पिच्छेत्य चेदमन्यतरस्यांग्रहणं विकल्पार्थं स्यात्तर्हि पिच्छादिभ्यो
पिच्छत्वास्त्यत्ययांसिद्धा एवेति गणद्वयेपि पृथग्दंतानां पाठो व्यर्थः सन्नज्ञापयति समुच्चया
४ क र्थमेवेदं न विकल्पार्थकमिति । पक्तु नव्याः केशाद्व इत्यत्रान्यतरस्यांग्रहणं लिंगं तद्धि वइनिठनोः
दर्थ प्राप्त्यर्थं क्रियते । प्रकृते तस्यान्यतरस्यांग्रहणस्य विकल्पार्थत्वे तु तदनुवृत्त्यैव सिद्धौ किं तेनान
क्रियमाणं तु पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थतां ज्ञापयतीति नमाकद्दत्याडुः । तत्र भाष्य
कृते वोत्तरत्रापि दूषितत्वात्तथा च भाष्यघट्टभ्यां नित्यार्थमेकेऽन्यतरस्यांग्रहणमिच्छंति
कथं विभाषामध्ये योगः क्रियते विभाषामध्ये ये विधयस्ते नित्या भवंतीति कैयटः असति प्रयोज
नेज्ञापकं नेति पूर्वोक्तमेव ज्ञापकमाश्रयणीयमिति व्याख्यातारो वा नेत्यादिसिद्धा घंतगणास्तु
त्वं ऊङ् चेति । डित्वादंतादेशः । वात्त्लइति चित्वादंतोदात्तो पा । पक्तु बलाद्धलइति प्रोक्तं । तत्राप्रत्य

सि॰स्व
४४१
५५१

पस्वरेण मध्योदात्तता । पत्नेः गणास्तत्र द्वंद्वं वान्यतरस्यां पार्ष्णिधमन्यो दीर्घश्च । पार्ष्णीलः । धमनीलः । हनुड जंतु
य तायास्त्रायाः कालः । मल्लिकालः । उपतायो रोगः । विपादिकालः इत्यादि वत्सासा । इति विषये वत्सांसोऽ
ह बलव च नौ । कामबलशद्वावपिला । हारिका । विन्याह । कामवती [illegible] तिनन्तु मत्वर्थसमुच्चायकान्युत
स्यां यहरास्यानुवृत्तेर्मतुबोभ्यां प्राप्नोति । सत्यं । विवक्षितार्थलाभान्मतुपो प्रवृत्तेः । वत्सवतीगौः ।
अंसवान् दुर्बलः । लोमादि । आदिशब्दाद्द्वंद्वं व्यर्थं । चरमादिशब्देन गतत्वात् । वृत्ता शुभादिस्त्वव श
अंगादिति । अंग कल्याण इति गणसूत्रे तदर्थतः पठितं लक्ष्म्याद्यपि गणास्त्रं । न प्रकरणे शाकीपलु
६४ लीर्द्राडस्वत्वं चेति वक्तव्यं । महच्छाकं शाकी । नाना जानीय शाकसमाहारो वा शाकी तद्वत्शाकिनं । भि
ह्नानि शालिकोद्रवादिपलानि पलालीति केयटः । महत्पलालं पलालीति वामनः । पलालिनं । दद्रूल
ग्रोग विशेषः तद्वान् दद्रुणः । विषुणानीत्यपि वार्त्तिकं । विषुनाना अंचंतीति विषूचीनानि अस्य संतीति वि राम
षुणः । विषुवदाख्यः कालः । तस्य हि नानागतानि दिनानि संति । तन्निमित्तत्वात् दिवसांतराणां न्यूनाधिकत्व ४४१

ला २ ला ३

स्यान्यथा वायुर्मन्युश्च विषुणाः। अनवस्थितप्रकृतिर्मनुष्यादिरपि विषुणाः। एषु सर्वत्र नानाविध
गमनसंभवाद्योगिकत्वं वायौ रूढत्वेन नित्यं। विष्वगिति माभूत्। नापरा। देशान्तरमुत्तरपदलोपे लौंव्या के
ऽशितिवलोपप्रसंगात्। इत्थं समर्थानामित्यस्यायं वादो। प्रज्ञा अज्ञा प्राज्ञो व्याकरणमिति। प्र
ज्ञाशब्दात्स्वार्थे णो विहितेऽनुपसर्जनज्ञानक्रियानिरूपितकर्मत्वेन द्वितीयायाद्योगलक्षणा षष्ठी
तेन तद्योगाभावात्कृतः एवं किं रूपमिति वक्तामत्वर्थे णो विधीयमाने प्रत्ययार्थप्राधान्यादुपसर्जन
क्रियया कर्मादिभिः संबंधाभावः। केचित्तत्रापि गुणाभूतक्रियया कारकसंबंधमिच्छन्तः प्राज्ञो व्या
करणमिति भाष्यमेवेत्याहुरिति कैय्यटे स्थितं विषयत्वविवक्षायां तु प्राज्ञो व्याकरणे इति सप्तम्य
पि भवतीत्यपि तत्रैवावृत्ते श्रोत्रेति वार्त्तिका वृत्तिशज्ञो विच्छेदप्रतिविधादिषु वर्त्तते। ज्योत्स्नादि ॥३
। कौंडलः कौतपः। वैपादिकः इत्यनेनेपित्रय श्रादिशब्देयाद्यः। ज्योत्स्नेति शुक्लपक्षे नामि सक्त
स्मपक्षेऽन रक विशिष्यन्नातमः समूहस्तमिस्रा ज्योत्स्ना तमिस्रेत्यत्र निपातनान्मत्वर्थीयो रः। स्वीन्व मन्

ता।

सि.र.रा
४४२
५५२

त्रमिति वक्ष्यते। तत्र घवयवक्षूलानि तनमांसि सिविघं तेन दस्मिन्नस्तीति रां। तान्मत्वर्थे॥ स्त्रियां तु ङीपि
नामिस्त्री॥ सिकतादेशोऽन्तरयोगेनैव सिद्धत्वादाह। घट इति। इह द्वयोः स्त्रत्रयोरुदाहरणं॥ मम रे
णासंग्रहीतं। स्त्री शर्करा शर्करिलः शार्करः शर्करावति। देश एवादिमाविवक्षुनैयांसिकतावतिश्
ति ऊषस्तु षिं तु षादि रिणायां सवः। स्त्रिषिष्ठि उ माधुर्यमिति। सवाच्यैव मधुशब्दो गुणे तेन तु द्र
व्यवाचीति न मध्वम घमस्मिन्नस्तीति मधुरो घट इति न प्रयोग इति भाष्ये। महत्कोठविवरं खं तन्दान्र
वरः। गर्दभयं कूपः॥ नगरमिति। नगाः पर्वताः नाश्वा अयमपि रूढः। जातिलक्षणो ङीष् नगरी। अश्रुतत्र
एवेति तु रीतु रीनि च रूढ इति भावः। कच्छुरुदिति स्त्रुनोरोगविशेषः। घटस्तु भ्यां क्वम इति। दिवादि स्तुतं।
अन्ये तु अक्ष्णो वाचकं घशब्दं मन्त्रुमन्त्रामिष्ठं तितु हं। सोऽस्यास्तीति जनकात्वेन तु मोऽपि हृत्स्व एवास्त्र
मरोऽपि यलाशाडुडुमागमा इत्याह। अत्र रूढिशब्दे पुनमनुपाश्चनमिधानात्। द्रपनशति। वश इतिशि राम
श्रमः। हिरण्यायवशति। विबिं वावं कुररावमः उष्टकावमित्यादीन्यपि दर्शियहरणा। त्संयाह्यातिः॥ अग्रासीक्षिति ४४२

दृन्ना: ५

शियहरास्यापंप्रयंचा॥ अरोर्गोडालं॥ अर्णेर स्वमुद्धा॥ आस्वनीवलइति॥ आस्तेतिरमिषवः॥ भुज्ञ आभि
षवेक्लिन्ना॥ यरिषद्वलइति॥ परिनः सीदनि॥ परिषत्‌सत्सृ द्विषेमि क्विप्‌॥ सदिरप्रतेरिति षत्वं॥ याठांनरामि
नियापि इह ऊतिरेषा॥ नत्र भवनामिति भाष्यात्‌साधुत्वं॥ आन्दवलइति॥ वलइत्यत्र॥ राङ्‌इत्यनुवृत्ते र्न दीर्घः॥
सं ज्ञायामित्यनुवृत्ते रिति॥ वनगिर्योरित्यत्र इति नाकः॥ ज्योत्स्ना॥ चंद्रप्रभा॥ तत्रा॥ वयवीभूतं ज्योतिरस्मिन्
तिमत्वर्थीनानुपपन्न इति भावः॥ स्त्रीत्वमिति॥ व्याख्यानमतं त्रा॥ कथं नमिस्वतिनि रेनमङ्‌निस्
म्रहसम्भूहि नोरभेदोपचारा॥ दित्याङ्ग॥ ऊर्डास्विनगो॥ मिना॥ अनयोर्नीतत्तां स्पष्टयितुं नलोपोन
कृनः॥ अतइनिठनौ॥ एकाहत्वरादिनिठनौ॥ ने निवाच्यं॥ स्ववान्॥ खवान्॥ कृदंतोपोज्जातिवाचीन तेन
पिनेनिवाच्यां॥ हृद्भवान्‌॥ सह्वान्॥ व्याघ्रवान्‌॥ सिंहवान्‌॥ कृदंनोपइत्यादिविशिष्टोपादानात्‌कार्या
कार्यिक इत्यादौ निषेधो न॥ जातिवाचित्वाभावात्॥ तेडुलीनं डुलिक इत्यत्रापि न निषेधः॥ अव्युत्पत्ति
पक्षे कृदंतत्वाभावात्‌॥ तर्हि कारकवानित्यत्रे निठनावपि स्यातामिति चेन्नाअनभिधानात्‌॥ सप्तम्यर्थे

आत्मनविषतत्त्वनबदनिवृत ८

सि॰ र॰ प्र

४४३

443

व२

नेति वाच्यं दंडा अस्यां शालायां संतीति भाष्ये स्पष्टं इष्टत्वेनेति । शिखादिभ्य इनिर्वाच्यः । इकन्यव
४४३ खदादिषु इति व्यवस्थाबोधकवार्त्तिकनञ्ज्ञाप्याभ्यामिति भावः । खंदादि । मत्वर्थ इति । मत्वर्थमुखापका
न्यतरस्यामित्यनुवृत्तेः । इह च स्वांगाद्धि हृद्वाविति गरास्तत्रैव पठ्यते । विवृद्ध्युपाधिकात्स्वांगवाचिन
इलजादयस्तु । विवृद्धी करीवस्य करीलः करीकरीकः । करीवान् । एकगो । एकशतिक इति
एकं च तच्छतं च पूर्वं कालैकेत्यादिना कर्मधारयः । षष्ठीतत्पुरुषाद् बहुव्रीहेर्द्वंद्वाच्च न । अनभिधा
नादिति न्यासः । भाष्ये तु नेतद् दृष्टम् । नित्ययुग्रहणं मतुपो बाधनार्थं कथमेकद्रव्यवानिति । असाधुरे
वायं । एकेन द्रव्यवानिति विग्रहे साधुरित्यन्ये । एकदंडीनि तु एकदेशिनैकाधिकरण्यादिति निर्देशा
दिनेः क्वचित्स्वीकारात्साधुः । इह अत इतिनि ठनौ तेन गोशतिक इति सिद्धं । गोविंशतिरस्यास्तीति
त्र च न अभिधानान्नेति भाष्ये स्थितं । अत एव अर्थवत्सूत्रे गोमदिं नगरमित्यत्र मत्वं नान्तमत्वर्थीयो लुप्यत राम
तेति भाष्यमादाय कैयट आह एकगोपूर्वादिति ठञो भाष्यकृद्वचनाल्लोपः । अत इनि च न तत्र निर्दिष्टं ४४३

द्५

गोत्रिकादिसिद्ध्यर्थं गवां समूहो गोत्रा साऽस्मिन्नसीति गोत्रिकमिति। यत्तु न व्याः कैयटेन भाष्याभिप्राय
वर्णनमात्रं कृतं न तु नात्रिकं। अत इत्यत्र तु वृत्तेरेव न्याय्यत्वादन्यथा एकविंशतिरेकचत्वारिंशद्वा अस्या
स्तीत्यत्रातिप्रसंगात्। अत एवापरितोषात्पक्षान्तरमाह। अथ वेति। अस्मिंश्च पक्षे गोत्रिकमित्यनभि
मतं लक्ष्यते अभिमतत्वे तु प्रागिवोक्तादात इत्यतो नो मंडूकप्लुत्याऽत इत्यनुवर्त्यसमाधेयमित्याकूतं
न। उक्तभाष्यपर्यालोचनया कैयटोक्तो विरोधलेशस्याप्यभावात्। अथ वेत्यादिपक्षांतरस्य कैय
टोक्तस्य गोमच्छूत्रस्य तद्धितलक्षणायामुक्तार्थन्यायेन मत्वर्थीयोऽत्र निरवलोपपदार्थ इत्येवं पर
स्यात इत्यत्र तु वृत्तितात्पर्यकत्वाभावात्प्रागिवोक्तादात इत्याद्युक्तेर्नैष्फल्यात् उक्तरीत्या गोत्रिके निसि
द्धावपि गोशकटिके त्वसिद्धे भवदुक्तातिप्रसंगस्यानभिधानादिति वदता भाष्यकृतैव परिहृतत्वाच्चात
स्मादत इनिठनाविति वृत्तिमिति कैयटः सम्यगवोचदिति दिक्। रूपादाहतप्रशंसयोः। विशिष्टेर्थे वर्तमाना
द्रूपशब्दान्मत्वर्थे यप् स्यात्। आहतमिति। आहननमाहतं ताडनं तेन निष्पन्नं रूपमनिप्रशंसनं तद्वान्रूप्यः।

कामि ४

नु ५

सि॰कौ ४४४ गुरायाइति। हविशिग्रहणादिति निरपिपूरणी। अस्मायाया। यशस्वीति। तसौमत्वर्थे इति भत्वाङ्नत्वेन यशस्वा
निति। सर्वस्सूत्रे नित्यग्रहणो न बाधितमप्यन्यतरस्यां ग्रहणं मंडूकगत्या हानुवर्तते। तसौमत्वर्थे इत्यत्र य
शस्वानिति भाष्योक्तेरिति भावः। किं नन्तवादिति। प्राग्वादृशो चोक्तेरिति कृत्वमित्युक्तं। तत्तु फलितार्थपर
तया बोध्यं। अन्यथा तदपवादत्वयावश्रेयत्वप्रसंगात। आमयस्येति। यद्यपि बहुलं छंदसीति सूत्रे आ
मयस्येत्यादि वार्त्तिकानि पठितानि तथापि सर्वत्र आमयस्येति सर्वग्रहणस्य कृतत्वात् लोकवेदसाधा
रणं। एवं शृंगतरत्र वार्त्तिकेष्वपि सर्वत्र ग्रहणमनुवर्त्तनीयं। हृदयात्। वालोश्वस्येत्संज्ञा। अन्यतरस्यां
ग्रहणमिति निठनोः समावेशाय। तेनात्र मत्वर्थे सह चत्वारः प्रत्यया बोध्याः। शीतोष्ण। चालुरनुवर्त्त
नाय तत्तु प्राचात् स्माभ्य आलुः डिति च पठितं तत्तु भाष्यविरोधादुपेक्ष्यं। पुरोडाश इति। न तद्याग्रहवब्
चसमिन्यत्र वेदभाष्ये स्थापितं चीयुगादिसूत्रे च न तथोक्तत्वादिति भावः। हिमाच्चेलुरिति। एकारादिः राम
प्रत्ययः। बलादिति। सिध्मादिषु बलद्रलवान्तलक्षणत्वं नोदात्तो मत्वर्थेषु त्यादिनोदेहत्वधातिरेमध्योदात्तः। ४४४

न्ता विन्यवधेयं। नच पूर्वमसङ्ख्यामिति। यदि दयं प्रत्ययः पूर्वमसङ्ख्यातत्वात्कव्यङ्शनिवार्त्तिकेन नकारस्तु
कः पाठो भाष्ये दृश्यते। हरदत्तोपि नितमाहान नत्रय पूर्वेण शाह्वः स्तामदिपघर्त्तिदृशकिभ्यो वनिप्
इति सूत्रे रावन्नित्याद्युदात्तः न क्षिपयस्यानिसंनस्येति फिट्सूत्रस्यावकाशः ततस्मयितानिवा स्वरे भेदाभा
वाद्धृवासः पूर्वनाइमा पूर्वेण इत्यविचाऽचलिरित्यादावाद्युदात्तस्यैव दर्शनात् स्वयोरुतितिरित्तु
प्रत्यया तो दात्तो मरुच्छब्दस्तत्र विशेषस्वरे सति पित्वमेव न्याय्यमिति निष्कर्षः। वार्त्तिकस्थमरुच्छब्द
प्रत्याख्यानपरात्स्मभाष्यानुरोधात्तान्तउक्तात् द्दादित्वेवापुनरेतद्भविष्यतीमरुद्भिर्दत्तो मरुत्त
इतीति। अयं भावः। उपसर्गसंज्ञायां मरुच्छब्दस्योपसंख्यानमिति वार्त्तिकेनोपसर्गत्वे ऽऽनन्त्वा
भावेपि उपसर्गसंज्ञाविधिसामर्थ्यादचउपसर्गादिति तत्वे मरुत्तशब्दः। तृतीया कर्मेती। तिष्पूर्वप
दप्रकृतिस्वरे प्राप्ते निष्ठांतोमध्योदात्तः। एवं चारम्भप्रत्याख्यानयोः फले कोपि विशेषोऽस्ति। उपसर्गसंज्ञा
वचनत्वे कार्य्यं हि वैयर्थ्यं नेनाङ्किप्रत्ययो नस्तः। मरुत्त यतीत्यत्र तार्बं च नेति प्रथमेध्याये केय्यटः। भा

नै १

त। अत एवमरुद्वृत्त इति भाष्यं प्रक्रियावाक्यमित्यभिप्रायमिति व्याख्या २४

सि॰र॰स्तु ४.४५ 445 षेन कारप्रश्लेषपाठे लेखकप्रमादात्। हरदत्तोक्तिस्तु पूर्वापरस्वग्रंथविरुद्धत्वाद्भाष्यविरुद्धत्वाच्चोपेक्ष्या
। उपसर्गसंज्ञा तु न प्रत्याख्यातुं शक्या। निष्ठायामसद्वृत्तत्वानिष्ठारूपप्रसंगौदिति दिक्। स्वामिन्नैश्वर्ये।
ननु स्वं धनमस्यास्तीति विग्रहेप्यतिप्रसंग इत्याशंक्याह। ऐश्वर्यवाचकादिति। ऐश्वर्य इति न प्रत्ययार्थ
विशेषणं किंतु प्रकृत्यर्थविशेषणं। स्वशब्दस्येतद्वृत्तिविषय एवैश्वर्यवाचित्वमिति नोक्तातिव्याप्ति
रिति भावः। तेन न धनवान्निर्धनो वेशितात्स्वामिशब्दवाच्यः। पृथक्। अर्थाद्वेति। विरोधादसतीति नेह सं
बध्यते। अर्थो ऽसंनिहितो ऽस्यार्थो ऽप्राप्त एव विनिर्विधीयते तत्र कौडिन्यन्यायादस्य पाधिकादिनि
नेति कैयट। प्रत्ययविधौ नदं न विधिप्रतिषेधस्य बाधनार्थमाह। नदं तु वेति। धान्यार्थीति। धान्यम
र्थो धान्यार्थ इति कर्मधारयः। सो ऽसंनिहितो ऽस्येत्यर्थे प्रत्ययः। इदं सर्वं द्व्यर्थशब्दादूठ इत्यं गाहत्योक्ते
अर्थनमर्थ इति भावप्रत्ययमाश्रित्येदं वचनद्वयं प्रत्याख्यातुं भाष्ये। एवं चार्थशब्दादनइनिठनावि राम
तिठन्नपि सिद्ध्यति वार्त्तिकमतेनन्नस्यात् तेनाधिकप्रत्यार्थिको सिद्धो। मनुशब्दक्रियायां दार्थिकादनमि ४४५

धानात्त्वघन बाचिनोप्यनभिधानादि निठनोरभावइति दिक्षाकंत्वांम्यांइहाघः अन्ययोदंतोष्ठ्यादि
र्नेतु यवर्गीयादिः। तदाह। अनुनासिकोवयावितिमूर्धन्योपधइति। कडिनोडनइति धातो॥ इति श्री
मद्दत्ताकरेमन्वर्थीयाः॥ ॥ अथस्वार्थिकाः इति। पंचम्यास्तसिल् इत्यादावर्थनिर्देशविरहात्
अतिशायनेकुत्सितेइत्यादीनांप्रकृतिविशेषणत्वादिति भावः। निवृत्तमिति। तत्रैबीडनुत्र
वृत्तावेवोक्तेनविस्मर्तव्यं। किं सर्वनाम। विधेयानिर्देशादेष्टुस्थ्येशंकायामाह। आद्यादि
यतइति। रेफादावितिपारिमिविधिसत्वादावल्ग्रहराइत्यनयातदादिविधिरितिभावः। ए
तदोनाभाष्यारूढोयंपाठः॥स्थानिवद्भावेनप्रातिपदिकत्वेनलोपः। त्यदाद्यत्वमितितुवक्तुंपुन
मात्रग्रितिपठित्वाशित्वान्सर्वादेशइतिवृत्तिकृता अ इतिप्रश्लिष्टनिर्देशात्सिद्धेनकारो
व्यर्थइतिभाष्याइदंशित्वेपितुल्यं। आद्यादेस्त्विति। सर्वनामत्वेनप्राप्तासतसिलादयोनाद्या
दिभ्यइतिपर्युदासात् नूनंमत्तः परेवंश्याइत्यादौ ननु आद्यादित्वात्तसिः। अन्ययोतरपदयोश्चत्व

सिरःस ४४६ 446

समदो मा देशः । न च सुषुम्द समदोरित्यात्वंशं कथं न सेर्विभक्तिर्नाभावात् । न च तसेश्चेतित
सिला देशः शंक्यः । तत्रापि ह्यादियर्युहासस्य सत्वात् । एतेन न तसेस्तसिला देशमंगीकृत्यप्रो
षेलोयं चाशंक्यस्तस्विभक्तावेव सइतित्वे कुर्येव वदन उर्घटेन्निकारो निरस्तः सम्प्रम्यावल
। इमेत्र न सिलादयः स्वतंत्राः प्रत्ययाः । न तु समममीयं च म्योरादेशाः । तथात्वे कुन स्योयनस्त्यः कु
त्रत्यः यत्रत्यः स्तु पाधान्विति लुकुप्र सङ्येतायदा अनुदानो स्तु प्पिना विति स्वरः प्रामोतिकस्मात्
कुतः घेर्ङितीतिगुणाः स्यात् । तातस्मिंस्तर्हि । अतोदीर्घोयञिस्तुपिचेति दीर्घः स्यात् । तातेष्वु तत्रनेभ्यसतः
ऊ ब॰ व च ने स ल्यदि त्येतत्वस्यादित्याद्यनिष्ट प्रसंग इति भाव्यः । किमथे त्रोकारस्तित्स्वरितमितिस
रार्थः । मकारयरित्राणार्थेन यमोः कारे । न विभक्तावितिनिषेधस्यानित्यत्वज्ञापनार्थ । स्यादेत
तत् । अत्युपर्योविशेषविहितत्वात्पदहोमन्यायेन त्रलं बाधेत । अतएव वामनभाग इति का राम
काराद्योयिभाषायां त्रलं नेष्ठ । नितनन्श्च लोके कुत्रेत्यसाधु स्यात् । न चेष्टापत्तिः । लोके प्रचुरप्रयो ४४६

ल२

गसत्वात्तान्तथा चामरः साहचर्यात्क्वचित् । श्रीहर्षोपि नान्यत्र कुत्रापि च सामिलाषमित्याहेत्याशं
क्याह इहेति । वा ग्रहणमिति । महाकविप्रयोगस्य कथंचित्साधुत्वसंभवे समानकालीनादिवन्नासा
धुत्वं शंक्यमिति भावः । वाह चष्टुं दसि । पूर्वोक्तवाग्रहणायकर्षेणां स्फुटीकर्तुं व्याख्यादसमाये पृ सूत्रमिहोपन्य
स्तं । सर्वैकान्यसञ्ज्ञर्म्य सूत्रलि त्यतोऽनुवृत्तिमभिप्रेत्याह । सप्तम्यन्तेभ्य इति । कथं तर्हि धातुसंबंधे त्यत्र यत्र का
ले ये प्रत्यया इति नवे मूले लिखितं । विशेषविहिते न दाप्रत्यये नत्रलो बाधा तत्संप्रमादय एवार्था । अधुना प्र
त्यय इति । निपातनान्नमध्योदात्तता । भाष्यमते चेदं । वृत्तिमते तु इदमोऽशादेशः । अधुना प्रत्ययः । तदोदा ।
केचिद्दाप्रत्ययं सूत्रकृता विधीयते स्व [illegible] रे च भेदः । दाप्रत्यये तदोदात्तत्वं
अदाप्रत्यये आद्युदात्तमित्याहुः । तन्न । भाष्यविरोधादिति ध्वनयन्नाह । तदोदा वचनमनर्थकमिति । प्र
कारवचने । सामान्यस्य भेदको विशेषः प्रकारः । प्रकारे थाल् । वचनस्येत्यत्र साहृश्यप्रकारो यद्यपि तथा
पि नात्र साहृश्यं गृह्यते । अनभिधानात् । तेन न प्रकारे थालिति । पृच्छ्यमानान्तु न स प्रकारस्तथेति । अनभिधानादे

सि॰स्त्र वानन्तुकिंसर्वनामबहुभ्योविशेषविहितस्यात्जातीयरंबाधेतनामेवंचार्थभेदात्तत्प्रकारेथाल्[illegible]
४५७ तद्धितिजातीयप्रत्ययस्तथाजातीयोयथाजातीयइतिभाष्यप्रयोगात्इदमः।अनेनेत्यादि।द्वितीयांतादपिथ्य
457 मुभेवत्येवइममेतंप्रकारंवापन्नइत्थंस्ततःलघुरोत्थंभ्यस्तास्मानमितिसूत्रनिर्देशोप्यत्रानुकूलः।किम
श्चेत्यत्राप्येवंतेनकथंभूतइतिसिद्धं॥ ॥ ॥इतिश्रीमद्रत्नाकरेप्राग्दिशीयाः॥ – ॥दिक्शब्देभ्यःइ
हस्ववदीनाम्पुरइत्यादयस्त्रेदेशाविधिवत्सितास्तदर्थंचास्तातिचेतिसूत्रंलेख्यंतत्रचस्थानिनामादेशानां
चानुवृत्तिःकुतःइत्यपेक्षायांतत्सर्वंसूत्रमपीहैवलेखनीयमितिदशसूत्र्याव्यवहितमपिसोत्रक्रमोल्लं
घनेनतद्रूपमपीहैवोपन्यस्यातिदिग्वाधराववरारतामितिद्वंद्वेचेत्यसर्वनामत्वात्खडभावः।असीत्पविभक्ति
कोनिर्देशःप्रत्ययसंनियोगशिष्टत्वंद्योतयितुंचशब्दस्तदाहातद्योगेचेति।एकापिषष्ठीविषयभेदाद्भिद्यतेतादृ
तार्थांतरपदसमाहारेत्यत्रसप्तमीवचनेनावधित्वस्यापिसंबंधत्वेनविवक्षायामर्थद्वयबोधकत्वंनानु राम
पपन्नंयद्वागायोष्ठगितिवत्सामीप्यमपिषष्ठ्यर्थइत्यभिप्रायेणाऽर्थद्वयपरेयंषष्ठीतदाहाएषामिति।अस्ताति ४५७

चापूर्वत्रासीतिवदिहापि [illegible] विभक्तिको निर्द्देशः स्तत्रांतरेणास्तातेर्विहितत्वात् किंतु सप्तमी निर्द्देशोयमित्या
ह। अस्तातेति। पुरइति। पुरतइत्यसाधुरेवेति प्रामाणिकाः। प्रयोगास्तु बहवः संति। स्यान्मतं पुरतोऽग्र
तइत्यमरः। पुरतः प्रथमे चाग्रइति विश्वः। नीरसतरोविलसतिपुरतइत्यादयः। केचित्तु विभाषापरावराभ्या
मित्यत्र विभाषेति योगं विभज्य पूर्वशब्दादतसुच् अस्तातिश्चेत्यत्र च स्यानुक्तसमुच्चयार्थेन यापूर्वशब्द
स्य पुरादेशइति कल्पयंति। तन्निर्मूलमिति नव्याः। कुत्र शब्दस्यैव भाष्यादिमूलाभावेपि पुरतइत्यस्यापि प्रचु
रप्रयोगएवमूलमितिस्त्ववधेयपद्यापुरत्नश्रयगमनुहृत्यतो धातोर्घञर्थेकप्रत्ययेनत आघादित्वात्तसिद्धि
तिबोध्यं। दिशिरूढेभ्यः किमिति। शब्दव्यवहारासामर्थ्यादिदृग्गर्थलाभइति भावः। नतूक्तं दर्शयन्ति। संख्या
मिति। दिशियोगिकोनतुरूढः। दिक्शब्देभ्य इत्युक्तेरन्यत्रातिप्रसंगाभावाद्दिगादिवृत्तिभ्यइति सुधीति एव
तिः। दिगादिवृत्तिभ्यः किमिति। तत्र दिशउपलक्षणत्वादतिप्रसंगः स्यादित्याशयेन प्रत्युदाहरति। पूर्वस्मि
न्गुरौवसतीति। अत्रहिदेशसंबंधात्कालसंबंधाद्वा पूर्वशब्दो गुरौ वर्त्तते। तदर्थविशेषणादतं दिग्देशकाले

सि॰र॰सु
४४८
448

षिति। विभक्तीनां सुपाधीनां च सामर्थ्येऽपि न पष्ठ्यासंख्यं अस्वरितत्वात्। ननु दिगादिषु त्रिष्वप्यर्थेषु पूर्वाद
यः परस्परनिरपेक्षाः एव शक्ताः। तथा चार्थभेदाद्भिन्नाः एव न इति दिक्शब्देभ्य इत्यनेनार्थत्रयवाच
कानां पूर्वादीनां कथं संग्रह इति चेन्न। समानानुपूर्वीकत्वेन सादृश्यमाश्रित्य तथा व्यवहारात्। अनिर्दि
ष्टार्थत्वाच्च स्वार्थेऽयं प्रत्ययः। नन्वेवमपि पूर्वस्मिन्देशे वसतीत्यत्रातिप्रसंग इति चेन्मैवं। पूर्वशब्दार्थो
यदा विशेष्यत्वेन विवक्ष्यते देशो विशेषणत्वेन तदा प्रत्ययो भवति। ननु विपरीतविवक्षायामित्यति
प्रसंगाभावादिति दिक्। विस्तरस्तु कैयटादावनुसंधेयः। दक्षिणा। ननु तस्य प्रत्ययस्य एव विधेयत्वात्। अदंतप्र
कृतिभ्यां तस्यापि दक्षिणा न उत्तरेण इति रूपं सिद्धं। प्रत्ययस्वरेणान्तोदात्तसिद्धेश्च स्यापि प्रयोजनाभा
वः। न च टाबन्ताभ्यां तसिप्रत्यये दक्षिणातः इत्यसि[illegible]द्धिः। सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावेन सिद्धत्वादि
ति चेन्न। षष्ठ्यन्तसर्वप्रत्ययेनेत्यत्र विशेषणार्थमकारस्यावश्यकत्वेन च स्याप्यावश्यकत्वात्। षष्ठ्यन्तस राम
र्थप्रत्ययेनेत्युक्तौ हि इतो ग्रामात् इतो ग्रामादित्यत्र षष्ठीप्रसंगः। एवं च नात्र पंचम्या इति प्रागसेईष्ट ४४८

८९

वां द्विरा॥ अन्यारादितरर्त्तेइत्यत्र विशेषणार्थश्चाचश्चकारः संख्याया विधाइह विधानं विधः

घञर्थे कविधानमिति के कृते पुंल्लिंगः स च क्रियाप्रकारवाच्येव न त्वनेकार्थकः॥ विधप्रशब्दस्यार्थो

विधश्चासावर्थश्चेति वा विधार्थ इत्याशयेनाह क्रियाप्रकार इति॥ यदि तु विधाशब्दः स्त्रीलिंगो गृह्येत तत्

दा तस्यानेकार्थत्वादनिष्टेपि विषये एकाग्रो विधा एकाहस्ति विधेत्यादावपि स ड्येत॥ आदनायि ५४

डो विधाशब्दे नोच्यते विधा विधौ प्रकारे चेत्यमरान्नानार्थो विधाशब्दः॥ विधाने प्रकारे च शब्दाद

नमपीत्यर्थ इति तद्व्याख्यातारः॥ तत्र विद्धर्वातद्धाञो भावे कर्मणि वा अङि विधाशब्दः संपन्नः॥

पन्तु विधापामिति वक्तव्योऽर्थग्रहणस्येदं प्रयोजनं यत्रार्थे विधाशब्दः प्रसिद्धतरस्तत्रैव यथा स्यात्

नाह शब्दार्थप्रकार एव स च क्रियाविषयक एव गृह्यत इति नव्याः॥ तान्हितपाङ्क्तकेपशान्तुराधेन सर्वत्र

प्रसिद्धतरत्वात्॥ भाष्यस्वरसभंगापत्तेः कैयटविरोधाच्च अर्थग्रहणान्वर्थमेवासंख्याया विधेधाञ्

सि॰र॰सु ४४६ निसुयपठत्वादाचवर्द्धेतिगच्छतीत्यादिक्रियापदमध्याहार्यं।एकस्याएवगमनक्रियायांशब्देननिव
ृत्तभेदायाःप्रकारलक्षणपृथग्भावप्रतिपत्तिः।नतुधाद्व्यंनवधाप्रुणाइत्यादौत्वस्तीत्यध्याहर्त
४५१ व्यमित्यदोषः।पंचधाम्लोकइत्यत्राप्येवं।एकधाभुङ्क्ते इत्यादावनेकप्रकारस्यभुजिक्रियायेप्येक
प्रकारस्यभुञ्जेरस्येवपृथग्भावः।एकःपाकइत्यादौक्रियाप्रकारस्याविवक्षितत्वान्नप्रत्ययस्य
द्विवक्षायांतुभवत्येव।एकधापाकइति।पंचपाकाइत्यादौभिन्नाएवपाकाः।नत्वेकस्याःक्रियायाः
प्रकारवत्त्वंविवक्षितंतैर्नद्विवक्षायांतुभवन्त्येवपंचधापाकइति।एकस्याएवक्रियायाउत्पत्त्यनेक
त्वविवक्षायांकृत्वसुजितिभेदोवसेयः।स्पृष्टपि।ध्यतेचैतत्तद्द्विधावेवेतिदिशा।एकाद्धोध्यमुञ्।धाय
हरोत्तुवर्त्तमानेपुनर्धाग्रहणंधामात्रस्यादेशार्थं।अन्यथाऽनैनर्यादेधाविकरणविचालएवधमुञ्
स्यात्तद्विधार्थनस्यादेकधांभुङ्क्ते।इनि।पाप्येयाप्राए।प्रवृत्तिनिमित्तकुत्सायामेवेदं।तेननपःशशीरेराकृशः राम
स्कुरच्याकरणाशाखश्वनत्रवैयाकरणपाशइतिनप्रयोगः।पस्त्वधीतविस्मृतव्याकरणस्तत्राधा ४४६

रस्यकुत्सितत्वात्तद्बाधे यस्यशास्त्रेऽस्यकुत्साप्रतीतेर्भवतिवैयाकरणपाशइतिप्रयोगः।कुत्सित
इत्यत्रैवेदंनोक्तमिति।डंनादपिप्रसंगात्।पूरणाद्भागे।पूरणार्थकत्वात्तीयप्रत्ययः।पूरणाशब्दवाच्यःपूरणा
ग्रहणंचोत्तरार्थं।मुखतीय४यार्थवतीयःऊमादावनर्थकत्वात्तातिप्रसंगःत्याकरणः।वस्तुनस्तुअर्थ
वत्त्वपरिभाषयाऽनित्यत्वज्ञापनार्थमिहाप्यावश्यकंनतातीयान्तकरणेऽतिप्रसंगवारणार्थंवाभा
गइतिपुंस्त्वंविवक्षितं।तेनसमानेऽप्यर्थेभक्तौविवक्षितायांद्वितीयाभक्तिरितिसूत्राणिसन्त्यादौदान्तस्या
दिष्यतेत्वाकारस्यदान्तः।एवंप्रागेकादशभ्यइत्युत्तरसूत्रेपिद्वितीयापंचमीत्येवभवति।अत्रप्रत्य
येनतदापिपंचमाइत्येवस्यादितिभावः।एकादाकिनिच्छहेकशब्दोनसंख्यावाचीगृह्यतेकिंत्वस
हायवाची।तेनैकाकिभिःक्षुद्रकैर्जितमित्यत्रबहुवचनेनानुपपन्नोभूतपूर्वे।गोष्ठात्खञित्यत्रैव
तेनोक्तंविशेषविहितेनखञाचरटोबाधामाभूत्।गोरवंस्यादित्यपहारेपाठसामर्थ्यादितिनवाच्यं
ततस्तत्सूत्रद्वयमपीदंगोष्ठादित्यनंप्राक्कर्तव्यं।गोष्ठात्खञ्इत्येवसूत्रमस्त्वातेनेनचशब्दे

सि॰ र॰ ख नचरडेवानुकृष्यतेन तत्कृष्या। अस्वरितत्वात्। एवं चैकं भूतपूर्वंय हणांस्तत्पजामितिषष्ठ्याः। इह भूत
४५० पूर्वइति वर्त्तनेन स्वनषष्ठ्यन्तविशेषणं। अन्योपसर्जनत्वात्। अपितु तदाहितस्य संबंधिनः प्राधा
450 न्यात्। अप्रधानेन रसन्निधौ प्रधाने कार्यसंप्रत्यायत्वादित्याशयेनाह। भूतपूर्वे थे रूप्यः स्यादिति। अ
तिशायने। अतिपूर्वाच्छेतेर्भावे ल्युट्। अतिशायनमेवातिशायनं नाति यातना दीर्घः तेन लोकेपि सा
धुः। अबाधकान्यपि निपातनानीति कस्वमध्येपि साधुः। अतिपूर्वः शेतिः प्रकर्षे नितेस्वभावात्। २५
स चाभिभवो नाधिकंयस कर्मकत्वात्। कालोऽतिशेते कालीमिति माष्याततान्तु अतिशायः अन्य
यार्थः प्रकृत्यर्थो वा। नाघः ल घेरतिशायनं ल घुतममिति स्यात्। प्रत्ययार्थप्राधान्यात् नह्यनी
यः। प्रकर्षातिशयादिभ्य एव प्रत्ययापत्तेः। अपितु प्रकृत्यर्थविशेषणमेवेत्यभिप्रेत्याह। अतिश
यविशिष्टेत्यादि। तमबादिस्वथानकः। जात्यपि यथाह कत्पर्थः। अयमेषामिति। द्वयोरेकस्य निर्धा राम
रणे विवक्षिते तरबीयसुनावपवादौ वक्ष्यते। अत परिशेषात् बहूनामेकस्य निर्धारणेऽस्य प्रवृ ४५०

त्रि ॥ रिति भावः। अतिशयेनाढ्य इति। द्व्यस्य जातेर्वास्वतः प्रकर्षापकर्षयोर्योगो नास्त्येव। अरूपत्वात्
घटतरः इति प्रयोगाभावात्। गुणस्यैव प्रकर्षस्तद्द्वारा तु द्रव्यस्य जातेर्वा प्रकर्षो बोध्यः। आद्यतम
इति। घकालतनेष्वित्यलुग्विधानाल्लिंगात्स्वत्वं। नादेवतद्धिताः। अन्यथा पूर्वाह्णेतमां पूर्वाह्णेतरा
मिति न स्यादित्युक्तं। एतेन प्रातिपदिकात्तमबादय इति वृत्त्यादिस्वरसो निरस्तः। किंप्रकृत्सनादि
भुनतः प्रवर्तनेऽसौ विभक्त्यन्त इति भाष्याच्च। अत्रेदमवधेयं। त्रीतिष्ठुक्तानि वस्तूनि प्रकर्षापक
र्षयुक्तानि तत्र चरमे सुक्तेतरन्तरः इति नरवंतान्तरप्राप्नोति। अनभिधानान्नेत्युक्तरानरवल्व
यि बहूनां प्रकर्षे तरप्याभावितव्यं केन न तर्हि तमपेति भाष्ये नैकस्य। एवं तुल्यन्यायत्वात्तमबंता
त्तमबित्यवधेयं। वेदे तु श्रेष्ठतमाय कर्मणे इत्यत्र श्रेष्ठतेनास्वार्थे तमप्। शब्दसिद्धत्वात्तु विद्धीरिति
न्यायादिति दिक्। अतिङश्च। प्रातिपदिकत्वाभावादप्राप्ते वचनं। नांतमप्पादिति। अजादी गुणवच
नादेवेति नियमादिष्ठन्नोक्तः इति भावः। तरप्तमपौ। आतिशायनिकप्रकरणे लाघवात्तादृशः। प्रियो

सि॰ग्र॰
४५१
451

घइति वाचकत्वेप्र करणांतरे गुरुसूत्र करणां लिंगमत्यंतस्वार्थिकस्वरबस्नीत्यपर्धेतिना
ल्पीचलतरं लोपश्च बलवत्तरइत्यादिसिद्धमित्याहुः ॥ किंमतिड ॥ आमोरुकारो यदिमङ्येत
नहि किंतमामित्यादौ पस्येति लोपं बाधित्वापरत्वाद्वृद्धौ ततलङ्घ्यणोवद्दूप्रसङ्गेनासृति स्वका
रान्तिरनुबंधकपरिभाषयानास्य ग्रहणामित्याहुः ॥ वस्तुत स्तु मकारपरित्राणार्थस्याकार
स्येदमप्यानुषंगिकं ज्ञेयं न चमस्य संज्ञायामिदं चोन्यान्यरइतिपरत्वेप्रत्ययपरत्वे वा विशेषाभा
वात्वेत्संज्ञेतिवाच्यंस्वरेविशेषस्यसत्वात् ॥ अतएवाथापिकथंचिदिन्कार्यस्यादेवमपिनिर्दे
षः क्षिपतेन्यासएवेति भाष्यं संगच्छते ॥ पनु एतद्भाष्यमित्संज्ञा सामर्थ्यादन्यतोपिस्यादनहसनिरा
सायोकारइत्येवं परं व्याख्यातं कैय्यटेनानन्तोभाष्यार्थानववोधात् निरनुबंधकेत्यस्यानित्यत्वं
स्वीकृत्यनक्तुनरभाष्यंघोऽपमितिविभावनीयं तु द्विधिभाष्यमनोनकश्चिद्दूर्दोषः ॥ नन्वत्र मुर्दस्वादि
रेवास्तु अकारोच्चारणासामर्थ्यात् सिद्धरूपमितिचेन्नास्वरेविशेषस्यसत्वादकारोच्चारणासामर्थ्याभा
२ नहि सतिविशेषेपरिभाषावाधोयुक्तः ॥ नचैवमप्युवाऽस्वस्यग्रहणाम् ॥ कोदोषः ॥ उरुपवतिततरां
ल्पीततरामित्यत्रह्रस्वनस्यापइतिनु रूपस [illegible] ग्ररेविसङ्गमितिवाच्यमाशानिरनुबन्धके

राम ४५१

वियस्येतिल्लोपस्यडुर्वारत्वात्।अनोयथान्यासमेवपुक्तमित्यलंपल्लविनेनायचतितुमामितित्र
नएवन्नायकान्तमपःसिद्धोतिङःश्वेतिसूत्रंरूपवादिविधावनुव्यन्पर्थमावश्यकं।तद्धिश्वासर्वेति
आमेतस्याव्ययत्वात्ततःपरस्यस्तुयोलुकुाङ्व्यापुकर्षेनिति।स्वसमवेतगुराद्वारेत्यर्थः।ङ्वं
नामावस्तूपूलद्धशांयत्रसर्वनामप्रयुज्यतोङ्व्यामिस्युच्यतेसोर्थोभेघत्वेनाविवाक्षितस्त्पामि
पुक्तोक्तंबोध्याद्विवचनाद्विवचनंचविभज्यंचेतिसमाहारद्वंद्वेतषतडुपयदंचेतिकर्मधारयः।त
त्रद्वयोरर्थयोर्वचनंद्विवचनंकरसोल्पुट्कर्मणिषष्ठीसमासः।येनयदेनप्राधान्येनगुणत्वेनद्वाव
र्थौनुच्येतेतद्विवचनंत्र्यंपतेनतुद्वाविमाव्याख्यानात्।विभक्तंव्यांविभज्यं।रायणिप्राप्तेऽस्मादे
वनिपातनाघत्।तेनविभाग्यमितिनभवति।स्वतिषुविभाज्यपश्वद्वप्रयोगस्यसाधुत्वंनेतिहृदम्।
मिदृत्तप्रेषणाद्वातोरितिन्यायेनशपनाघनिबोध्यमितिनव्याः।अबाधकाव्ययोत्वाम्रित्यकेव
लादपिशापतिसाधुतानस्तुवच्या।कुन्वापनेः।उपपदंचोपोच्चारितंप [ंदादिनिबोध्यमानिनिन्याः]

सि·र·स्व दमित्यन्वर्थानन्तु कृत्रिमं तद्भिन्नेतदसंभवात्तानत्र विग्रहवाक्ये प्रयुज्यते हन्तो बहुगतार्थत्वात्तावत्तुंप
४५१ प्रयुज्यते। एवं चोपपदग्रहणस्येष्टार्था। तदेतत्सर्वमभिसंधायाह। द्वयोरेकस्येति। द्व्यर्थवाचकस्यापि
452 वचनानां तत्रैवेति नाग्रहा। कृत्रिमे न गृह्यत इत्युक्तत्वात्तर्हि किं न्वेकवचनानां नत्वेपि ने न दत्तोप्यस्य दन्ताः।
(स्निग्धतराः। पाणिनीयादस्य पादौ स्तुकुमारतरावितिसिद्धानि तत्र तिरोहितावयवभेदः समूहः समा
व५ सार्थः परित्यक्तावयवभेदार्थो वर्ण्यपदार्थ इति समासस्यापि द्व्यर्थता बोध्या। अस्मात्कं च देवदत्तस्य
च देवदत्तो अभिरूपतर इत्यपि सिद्धानि। अस्मदो द्वयोश्चेत्येकस्मिन्बहुवचनं वा इति भाष्ये द्विव
नोपपदमुदाहरति। अयमनयोरिति विभज्योपपदमुदाहरति। प्राच्येभ्य इति। निर्द्धारणे षष्ठीसप्त
म्योरपवादभूता पंचमी विभक्तेरिति पंचमी। पटीयांस इति। टेरिति टिलोपः। ननु स्वस्मिन्स्वभेदाभा
वात्पटुवाचान्यपटुरासीत् एषमस्मात्पटुतर इति कथमिति चेत्सत्यम् एकस्यापि धर्मिणो गुणभे राम
देन भेदात्स्वपमात्प्रकर्षसंभवात्प्रत्यय इति। अजादी। एवकारस्तेष्टतोवधारणार्थः। अन्यथा त्वं गु ४५१

नादीगुणावचनान्नस्यातामितिभावः।नुम्छंदसि।सूत्रोक्तिनियमायवादतयाप्रतिप्रसवविधिः।तेनच
याधिसांकर्यन्नाइष्टवदित्यतिदेशेऽस्याप्युपयोगाभावादसमप्याहोपन्यस्तो।नन्वज्झंतादिति।विनिग
मकाभावाद्वयोरपिग्रहणमितिभावः।नुरिष्टमेयस्तात्स्वसंनिहितोपिबिल्वकादिभ्यइत्यनेनोलुक्
नानुवर्त्ततेलुकालुप्तेतद्दृशाद्देनन्निमित्तगुणाप्रसंगात्।किंतुछेलोपोयाकद्रूइत्यनेनलोपएवानुवर्त्त
तेक्रमस्वरितप्रतिज्ञत्वात्।एवंचप्रत्ययलक्षणेनाईधात्तकपरत्वात्करिष्टादोगुणाःसिद्ध्यति
।नचायंलोपोत्यस्यस्यादितिवाच्यं।टेरित्युक्तरस्यत्रेणासिद्धेरतस्थशब्दस्येवसइत्याशयेनाहात्यश
ब्दस्यलोपइति।इहापित्तन्नत्चोर्ग्रहणंपूर्ववत्।अतिशायनेतिः।अनयोरित्यध्याहार्यं।दोहीयसी
।इयमनयोरतिशायेनदोग्ध्रीतिविग्रहेईयसुनिविवक्षितेभस्याढेप्रतिपुंवद्भावेनङीपिनिवृत्ते
त्यशब्दस्यलोपेसतितन्निमित्तयोर्घत्वढत्वयोर्निवृत्तावपिउपधागुणोननिवर्त्ततेप्रत्ययलक्षणेन
प्रत्ययपरत्वानपायात्।तद्वाहेदोहीयसीति।उगित्वान्ङीप्।प्रशस्यस्यश्रः।आदेशापेक्षयाप्रशस्यतिष
सम सम

सिरस्तु ४५२ 453 ष्ठी। अजादी इत्यनुवृत्तं सप्तम्या विपरिणाम्यत इत्याह। अजाद्योरिति। गुणवचनत्वाभावेपि प्रशस्यशब्द
स्यात एव लिंगादिष्ठन्नीयसुनौ भवत इति भावः। वृद्धस्य स्वरूपस्येह ग्रहणं न तु संज्ञायाः। व्याख्या
नात्। प्रियस्थिरेति वर्षीदेशोप्यस्य वक्ष्यते। नच ज्यादेशेन तस्य बाधः शंक्यः इमनिचि सावकाश
त्वादिति वाच्यं। हृद्धृशाद्यादिमनिचोऽभावात्। स्थूलदूरायणादिपरमिति। परंयणादीत्यर्थः। परेरिति किं।
५।८ यविष्ठः। क्सिष्ठयोरा परा आदेर्मा भूत्। सर्वस्येह ग्रहणं व्यर्थं परस्मिन्नु प्रेसामर्थ्यान्न सर्वस्येव गुणलाभादि
इकोगुण तिनव्याः। ननु गुणग्रहणं व्यर्थं मो गुणो न सिद्धत्वात्। मैवं। परपरणादिलोपस्याभीयत्वेनासिद्धत्वात्।
हृद्धीइतिसू ह्रेपिष्ठ ह्रोदिष्ठयोरनन्त्यत्वाच्च इकः परिभाषोपस्थित्यापकारद्वकायोर्न गुणः। यद्यपि सर्वस्येति नि
त्रस्यभाष्य र्दिष्टस्थानिकत्वेन परिभाषोपस्थितिर्दुर्लभा। तथाप्यलोन्त्यपरिभाषाया बाधनये इकः परिभाषोप
कैयटविरु स्थितिरपि स्यात् क्वचात् सर्वस्य ग्रहणस्य प्रत्याख्यानात्वात् एवमीयसीति। ईयसुनीत्यर्थः। बहोर्लोपः। इष्ठनश्च राम
द्धमेतत ६ नस्तत्रेणाकार्यं नरस्य विधेयत्वात्तद्भिन्नाविमनिजीयसुना वेवग्रहणेन। नदाह। इमेयसोरिति। भूया ४५३

दृ
निनान्विहौर्णुरणः प्राप्नोति दीर्घोच्चैरणां भ्रूमेत्यादौ सर्ववकारामितिचेन्नाच्चासिद्धवदत्रेति भ्रूभावस्या
सिद्धत्वात्। प्रागभावदसिद्धत्वेनतस्यान्याख्यानपक्षे वा भ्रूकइत्सकारप्रश्लेषेणानङ्गकारणात्। नच अहृ
त्सार्वधातुकयोरिति दीर्घेणापरेणानस्य बाधः शंक्यः। वायव्यंशंकव्यापिचच इत्यादावपि गुणाबा
धानापत्तेः। अतः पर्युदासबलाद्धातुप्रत्ययएव दीर्घइत्यव धेयं। यत्वं गहत्तपरिभाषाड्यादादीयस
इत्याद्विधानेन ज्ञाप्यतइति भाष्येउक्तं। ननु प्रसज्यप्रतिषेधाभिप्रायेणनेयं। अतएव नव्यैरपिनतुअहृ
त्सार्वधातुकयोरित्युक्तं। तिङन्ते। नतद्वीत्यानुवायव्यमित्यादिसिद्धये पुनः प्रसंगस्यापत्त्याश्रयणीयः। नसकृन
स्कृ भाष्यादिकं प्रौढिमात्रपरं। पर्युदासस्यैव लघुत्वात्। परिभाषायां लिंगात्तरं मृत्यमिति दिक्। कृष्टस्या
पूर्वस्यत्वं दृक्स्नमनुवर्त्तते इत्याहाव हौं परस्येत्यादिना तत्रेष्ठुन आदिलोपे कृते पिशाद्ध आगमः। लोपा
प वादोपकार आगमः। इकारग्रहणात् धिग्भति वा बोध्यं। पुवाल्पयोः पुवेति स्वरूपग्रहणान्नलुवाप
त्यस्य व्याख्यानात्। विन्मतोः। अतएव लिंगाद्विन्मतुभ्यामजादी प्रशंसायां रूपप्। स्त्रीत्वमेकत्वे च न वि

सि·र·सु ४५४ 454

बज्ञितं। प्रकृत्यर्थविशेषणं च। प्रकृत्यर्थस्य परिच्छेदिकेह प्रशंसा। ननु कुत्सितः वृषलरूपोयमध्यायं
पलाण्डुना सुरां पिबेत् तादृग्रूपोयमध्ययं धावतो लोहितं पिबेत्। चोररूपोयमध्ययमस्योपरञ्जनं प्य
हरेत्। गुण्यवस्तु यह हरणादिना चौर्यादि परिच्छिद्यते। अपरिगृहीतायां कर्मप्रवचनीयः॥ ननु तमबादीनां
रूपपश्च कोऽर्थभेदः। यावता अतिशायनमपि प्रज्ञानिंदा विषयं। पटुतमः पापीयानिति। रूपपस्तु प्रशं-
सा विषयः। पटुरूपः। चोररूपः वृषलरूपः इतीति चेत्तामुच्यते। अतिशायनं समानप्रतियोग्यपेक्षं वै-
स्पष्ट्यं तु तन्निरपेक्षमिति स्पष्ट एवार्थभेदः। प्रकृत्यर्थस्तुरीते व वैस्पष्ट्यात्। तच्चातिशायनानिंदासाधा-
रणा। तथा च वार्त्तिकं। प्रकृत्यर्थवैस्पष्ट्ये रूपब्विति। पचतिरूपमिति। तिङन्तेभ्यः सत्त्वभूतक्रियाप्राधा-
न्यात्तत्र च संख्याविशेषाप्रतीतावप्यौत्सर्गिकत्वादेकवचनमेव भवति। तदपि प्रथमायाएवेति वदंति।
पचेत्याद्यपेक्षया पानु द्वितीयाया अप्येकवचनं भवत्येव। लिंगविशेषप्रतीत्यभावे क्लीबता। तेन पच- राम
तोरूपं पचंतिरूपं पचामोरूपमित्यादिप्रयोगाः सिद्धाः। एवं पचतिकल्पं पचतःकल्पमित्यादावपि ज्ञेयं। ४५४

नचरूपबाधं तस्याव्ययत्वं शंक्यं। अव्ययत्वेपरिगणितानां तद्धितानां मध्येरूपबादेरपरिगणनात्। वि
भाषास्त्रेयपःसूत्रेस्त्रेपर्त्यत्रषष्ठ्यंतसमर्थेतिषष्ठी। दृत्तौतुस्पष्टार्थं पंचम्यंतमाह। स्तेबंनादिति। प्रा
गित्यपकृष्यते। अन्यथा राादितरर्जंस्त्यत्रोत्तरपदग्रहणात्षष्ठ्यंतसमर्थेतिषष्ठीबाधनार्थमित्युक्त
त्वात्पंचमीक्रतेतिभावः। प्रागेवेति। सोत्रस्फुरेवार्थकइतिभावः। तस्यव्यावर्त्यमाह। नतुयरतशि
। तथाचविभाषाग्रहणेनपक्षेप्रत्ययपरत्वेप्राप्तेनित्यपूर्वार्थंतुग्रहणमितिप्राञ्चः। भाष्यकार
स्तुउशब्दस्यनेदंफलं किंत्वन्यदेवेत्याह। तथाहि। सोत्रविभाषाग्रहणेननपूर्वत्वंविकल्प्यते
पक्षेपरत्वापिबह्वचःप्रसंगात्। किंतुबहुडेवाप्रधानेनतरसन्निधाविति न्यायात्। नचबहुज्विक
ल्पोमहाविभाषयापिसिद्धइतिकिमनयेतिवाच्यं। महाविभाषयावाक्यस्यासिद्धावपिपक्षेप्रक
तविभाषायाःकल्पबादिसमावेशार्थत्वात्। अन्यथोत्सर्गापवादोमहाविभाषयायत्रविकल्प्यते
इत्यादिन्यायेनकल्पबादेर्नित्यंबाधापत्तेः। नचकल्पवादीनांविधानसामर्थ्यान्नबाधोबहुचेति

॰न्ते तेषां सावकाशत्वात्॥ सुब्रू हरणान्ति उ॰ श्चेतीहसूत्रेन संबध्यते॥ उत्तरत्र तु मरारूक लुत्यासंबध्यत एवेति सिद्धान्तात्॥ वित्वं स्वराधिमि॥ १

सि॰र॰स वाच्यं तिङैते न बङ्कुपट्वड्त्पचट का रा कारउदात्त॥ चितः सप्रकृतेर्बह्वकजर्थमिति वार्त्तिकात्॥ नत्र
४५५ बङ्कुपङ्ग्रसरश्नि सिद्धिनेऽलौकिके वाक्ये अर्थवदिति प्रातिपदिकत्वे सत्युपोधात्विति ङसो लुक्युकार
455 स्योदात्तत्वे कृते पुनर्ङसुक स्वरासिद्धिरित्यर्थवत्त्वे ऽभिहितेतान स्याच्छ्रशङ्कयेदं प्रयोजनं प्रत्यये
यतेनं प्राकृप्रकृतेर्ये लिंगवचने स्तु नस्त्रेपि प्रत्यये नेएवस्यातामिति तेन बङ्कयुडो द्वाद्वा॥ बङ्कौले
प्रसन्ना॥ बङ्कुपर्य्यायवास्॥ लघु बेङ्कुत्वरांनरइत्यादि सिद्धातिा नतु कास्त्रगोशाभ्यांष्ठ रचः षित्वेन
स्वार्थिकाः प्रत्यपाः प्रकृतितो लिंगवचुनान्यनुवर्त्तन्त इति ज्ञापितं नेनैवासिद्धमिति चेन्सत्यं॥ एत
देवतु यहरां लिंग स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्त्तन्तेपीत्यर्थः॥ तेन गुडकल्पा द्राक्षा॥
तैलकल्पा प्रसन्ना॥ पयस्कल्पा यवागूरित्येतत्सिद्धं॥ राज्ञः स्त्रियामित्यत्र स्त्रियां ग्रहणामपि लिं
गवचनातिक्रमो ज्ञायकं ततरं बोध्यं॥ ह नितरुनानु बङ्कुगुडेति स्त्रीलिंगमुदाहृतं तद्भाष्यविरोधादयु राम
क्तं॥ अतिशायने षदसमाप्योऽगुपद्धिक्तापां परत्वात्कल्पबादयो भवंतीति तत्स्तेरप्रमपो॥ पदु ४५५

कल्पतरः मृदुकल्पतर इत्यादि बोध्यमिति दिक्। प्रागिवात्कः। तिङंतान्नायं कः स्वप इत्यनुवृत्तेः। अ
व्ययसर्वातिङश्चेति। मंदूकल्पुत्यतिभावः। आप्रातिपदिकात्स्वप इति चानुवर्तते ए वाकस्य च दः।
कांताव्ययस्येति। तिङः सर्वनामग्रहणं नेह संबध्यते। तयोः कांतत्वासंभवात्। अधीकृ अधेकृ इत्यादा
वसिद्धं कत्वं क्ष्णक्नोतेर्यङ्लुगंताल्लङि तिप्सिपोरक्ष्णकृ इति कांतसंभवेपि यङ्लुकोऽसार्वत्रिकत्वादी
दृशं लक्ष्यं नास्तीत्याहुः। ओकारसकारेति। अकच्विधौ स्वप इत्यनुवर्तते आप्रातिपदिकादिति
चाप्राक्टेरित्यत्र यथा आप्रातिपदिकाभिन्नसर्वनाम्नाच विशेषणे कामचारात् व्यवस्थाप्रसंगे भा
ष्यकारो व्यवस्थामाह। अनोकारसकारभकारादाविति वाच्यमिति तस्य फलितमर्थमाह। ओकारे
त्यादिना। अपंचसंकोचो युष्मदस्मन्मात्रविषयकः। भाष्यकृता नानयोर्वोदाहृतत्वात्। इतरेषां त्ववि
शेषणात्प्रातिपदिकस्यैव टेः प्रागकच न स्वबंतस्यातेन सर्वके राहमके नभवकंतमित्यादि सिद्धं
तित्वयकाम यकेति छह त्वयामयेति स्वबंतयाष्टेः प्रागकच् प्रातिपदिकस्य टेः प्राक् चेत्त्वकयाम

प्रत्यय इति काशिका॥

सि॰र॰स्तु ४५६ 456 कपेति स्यात् ... एवं वृद्धे वपित्वकायिम कपिकेति स्यात् त्वयका मयकेति चेष्यत इति भावः। काम्त
काम्यइति। कामस्यागमो। ... ननु प्रत्ययइत्याह। मित्वादिति। शीलेकइति। शीलं स्वभावो नियमश्च। तू
ष्णीकइति। भा... ष्येदीर्घस्येवोदाहरणात्केराड्डिनिन ह्रस्वः। हिरकुदिनि। हिरूक्त्हल्पव्यपं का
न्ताधानकाइति। धानाशब्दः स्त्रीलिंगः ततः कः। केयाड्डिति ... ह्रस्वः कप्रत्यये
नाहाशब्दस्य भाषितपुंस्कत्वेनेति विकल्पात्यत्वे प्रत्ययस्थादितीत्वाभावः। एतेनेत्वमाशंक्य स्वा
र्थिके पुंलिंगातिदेशान्निंस्त्री कात्यपुंस्त्वमेवेति वदन् हरदत्तः परास्तः। मनोरमाप्येवं। नत्व हि कप्रत्य
यान्नाहा। किंतु स्वार्थिकात्तस्मात्। हरदत्तस्याशयवर्णानार्थयुं स्वसुक्तेनञ्चपरस्मरव्याहतमिति भावः। वञ्चोमनु
ष्याइहसांहितिकः षकारोनेत्संज्ञः। घनिलचौ च। चाद्धग्या प्राप्तमिति वृत्तिः। अत्र तृढ्वेराठ्डिविहितः
वावचनात्कोपि चकारेणाकृष्यताभ्यनुज्ञेति चिंत्यं योगविभागे फलमपि चिंत्यमिति हरदत्तः। राम
तच्चिंत्यं योगविभागस्योत्तरार्थत्वात्। उत्तरसूत्रे हि ठ्चोन संबंधइति यावता भाष्ये त्वित्येदसूत्रेन ध्वन ४५६

मेवनेनोत्तरत्रोपिकद्दत्सुदाहरणांसूत्रविरुद्धमितिवोध्यं।ठज्ञादो।समाहारद्वंद्वेसौत्रंपुंस्त्वं।यस्मिन्विधि
रितिसिद्धेरादियहणांव्यर्थं।ऊर्ध्वंसर्वमिति।ठग्रहणादादेःपरस्येतिनप्रवर्तनेइतिभावः।यत्तु ऊर्ध्वग्रह
णादादेःपरस्येतिनव्याः।तत्राज्ञापकादेवोपपन्नात्वूर्ध्वग्रहणस्य वैयर्थ्यात्।ननुठग्रहणांव्य
र्थंद्र्कादेशेसत्यज्ञादावित्येव सिद्धत्वादितिचेदत्रभाष्यंठग्रहणमुकोद्वितीयस्येकविधानार्थ
मिति।ठावस्थायामेवोकारान्नात्परस्यलोपेकृतेनतःकादेशार्थमित्यर्थः।अन्यथामाधितिकद्दत्रैव
कादेशेकृतेऽन्तरपदलोपेचवायुद्र्कइतिस्थितेठस्याभावात्कादेशोनस्यात्।नचस्थानिवद्भावेनका
देशःश्वकपः।ठस्यकद्दत्सत्रस्थान्यादेशयोरुकारउच्चारणार्थइतिपक्षे।अल्विधित्वात्।पक्षान्तरे संनिपा
तपरिभाषाविरोधाच्च।यत्तुचित्रगुप्रभृतिष्वपिचप्रथममिकादेशस्यासंभवादज्ञादिलक्षणोलोपोन
स्यात्तदर्थमपिठग्रहणमितिकेयटनव्यादयः।तदसत्।कामवडूकरीत्याप्रयोजनेस्पष्टेभाष्यस्थश्वका
समाधानयोरसंबद्धत्वापत्तेः।वायुदत्तशब्देद्र्कादेशोनरदत्तशब्देलोपेवायुकद्दत्पनापत्तेः।नचापवाद

सि र सु त्तनकादेशविषयेऽएवमिकादेशोनेतिवाच्यं।अल्विधित्वेन सान्निपातपरिभाषया वापवाद विषयत्वा
४५७ वात्तत्समाङ्गाष्ट्यान्यथानुपपत्त्यास्तुत्वेनासंग्रहणाच्चमनुष्यनामत्वेन प्रसिद्धेभ्य एवटञ्जादेस्तन्निनि
चित्रगुदेवभान्वादिभ्योऽप्रसिद्धेभ्योऽनभिधानादित्यलं प्रसक्तानुप्रसक्त्यो।रुवादपोतिनेत
न्नाष्येदृष्टं।उक्तवार्तिकानामर्थश्लोकरूपेणासंग्रहलानि।चतुर्थ्यादनाजादौचेति।प्राचामुपादेः।उ
पेंड्दत्तइति।नन्वत्र तसंधेर्लोपो जापमानोनकारादेरेवस्यात्तत्वेकारस्यतत्सत्त्वउपडडपकड्ड्या
दिरूपाणीमस्युरितिचेन्नाद्वितीयं संध्यक्षरमितिवस्मारोनएकारादेर्लोपविधानात्।यद्वासम
र्थानामित्यस्यनिवृत्तेरुक्तनयात्त्रकृतत्वाहपरिभाषया।आङुरणानूर्वमेवप्रत्यये इंद्द दत्तशब्दस
लोपेइष्टंसिद्धं।उपिकड्इति।ठचीकादेशः।एतस्त्ररूपं न साधुस्तत्र स्वरसे विरोधादित्यवोचामाषड्डूया
णीति।हरदत्तमतमनुस्त्यैदं।निष्कर्षेयंचे वैनिवोध्यं।संध्यक्षरामितिएचांसंज्ञेयं प्राचां।द्वितीयादचः।इत्यस्या राम
पवादः।वागाशीरिति।वाचिआशीर्यस्येतिविग्रहः।वाचिक इति।इहोत्तरपदलोपोविषयेकाड्ड्संज्ञापाय ४५७

दत्व बाधात्कुत्वजस्त्वेन भवतः। यदा तु द्वितीयादचः परस्य लोपस्तदा वाच्य आड्कइति स्थितेऽय
स्येति लोपे कृते तस्य स्थानिवद्भावादाकारान्तस्य भत्वेच कारान्तस्यान्तर्वर्त्तिनी विभक्तिमाश्रित्य पद
त्वे कुत्वजश्त्वयोः कृतयोर्वागिकइति स्यात्। न पदान्तेति निषेधोन शंक्यः। भत्वस्य पदत्वरमाव
पवत्वाभावादिति भावः। कथमिति। इह पुनर यदलोपे जश्त्वं न स्यादिति प्रश्नः। घघइति। ठा
जादाविति सूत्रे टौ वेह लोपइष्यते न तु वार्त्तिकोक्तमनर पदलोप इत्यर्थः। स्तु परिकइति।
स्तुपर्याश्रीः शाङ्गाद्वुच्सचाकृतसंधेरकृतत्वूहपरिभाषया। अल्पोऽज् स्वं घृतं तैलं वेति प्रये
गाभावादेतत्सूत्रं। अज्जं वा। अल्प ४ परः। अल्पः शारकः। दृत्यप्रयोगादिदमुप्पावत्स्प वक्रु
टीनामी। स्वार्थिके प्रुलिंगाति वर्त्तेर पि ज्ञापितत्वादाह। कुटीरः। शमीरइति। कासूतरी। ति।
नि गानुवर्त्तनौ ज्ञापकमित्युक्तं। मत्पल मिह इंषि तिभावः। वत्सो ह्रास इति नतुत्व मिह न्यून
नासा च शकटं नावच्छेदकस्यैवेत्याह। अहति। निमित्ततत्वे इति। तदुक्तं भाष्ये। यस्य गुणास्य

६

सि र-स्व
४५८
458

मा वा द्रव्ये शब्दनिवेशस्तस्मिन्गुणो वाच्ये प्रत्यय इति। तेन कृशो वत्सो वत्सतर इति न प्रयोगः। तत्र व
यो नस्याश्वो वत्सत्वस्य तनुत्वेन। क्वचित्तु तत्सहचरितधर्मान्तरारोपः। न घथ्या। अश्वतर इत्यत्राश्वत्वस्य
तनुत्वमल्पपितृकत्वात्। तागर्दभेनाश्वायामुत्पादितेऽश्वतरशब्दस्य रूढत्वात्। एवं ऋषभो भारवोढा
ऋषभतरः षण्ढः मन्दशक्तिः॥ किंयत्तदः। निर्धारणे वा विभाषायां प्रत्ययः। शब्दशक्तिस्वाभाव्यात्स्वार्थि
कत्वात्तेन कयोरन्यतरो देवदत्तो यज्ञदत्तयोरित्यत्र निर्धारणावधिको विभाषान्तःप्रत्ययः। द्वयोरि
ति किं। बहूनां मध्ये एकस्य निर्धारणे माभूत्। एकस्येति किं। द्वयोरिति कर्मणि षष्ठी माभूत्। ते
न कोऽदेवदत्तयज्ञदत्तावित्यत्र नातिप्रसङ्गः। एतेनैकस्येति न कर्तव्यमिति कैयटो निरस्तः। भाष्ये तु
द्वयोरिति प्रत्याख्यातं। उत्तरत्र बहूनामिह ग्रहणात्तद्विषयकत्वाभावात्। तदुक्तं। बहिर्द्वाराणां निर्धारणा
। यावता द्वयोरेकस्ये बहिर्निर्धारणां भवतीति। अन्ये तु द्वयोरिति कर्तव्यं बहूनामिह ग्रहणमेव न कर्तव्यमि राम
त्याहुरिति भाष्यं। तथा च डतमजुत्सर्गः। तदपवादो डतरच् विधीयत इति परिशेषाद् बहूनां निर्धारणे डतमजेव ४५८

विध्यनीत्यर्थइति कैय्यटो व्याचष्टे।भाष्यकृतातुपरिप्रश्नस्यानिर्द्धारितविषयतया बहुविषयत्वख्यो

व्यात् द्वेकयोर्निर्द्धारितत्वेन परिप्रश्नाभावात् डतमज्जनं भविष्यतीति बहुग्रहणं न कर्त्तव्यमित्युक्तं।ए

तच्च भाष्यमसंबद्धं।एकद्विविषयस्यापि प्रश्नस्य संभवात्।को भवान्कतरो भवतोः कठ इत्येतद्द्वा

घ्यं कैय्यटो दूषयांचकार।अत्रेदं वक्तव्यं।देवदत्तत्वेन कठत्वेन वा निश्चितेको भवानिति प्रश्नानास्पदत्वात्त

स्माद्विशेषानिश्चये प्रश्नस्य प्रातिपदिक्यं तरापेक्षत्वे नैकविषयत्वासंभवः।प्रतियोग्यंतरं चाकांक्ष चिद्द्धा

द्दैक्वाचिदार्थिकं बहुत्वावच्छिन्नं चेति।कतरो भवतोः कठ इत्यत्र निर्द्धारणस्यैवशाब्दत्वेन विवक्षितत्वा

दपवादो डतरज्जेव भवति न डतमच्।अन्यथा किंशब्दाड्डतरचोऽसंभवापत्तेः।नच गुणक्रियासं

ज्ञाविषयकप्रश्ने डतरच् सावकाशः।जातिपरिप्रश्नग्रहणस्यापि त्वयाप्रत्याख्यातत्वेन नाद्विषयेपि

डतमचस्त्वयैवाभ्युपगमात्।तस्मात्परिशेषाद्बहूनामेव निर्द्धारणे डतमजिति भाष्यस्यैव साम्राज्य

मिति कैय्यटोक्तं दूषणं यत्किंचिदेतत्।न चैतत्सर्वममि संधाय योक्तं वार्त्तिककृता।किमादीनांद्विब

सि॰र॰स्व
४५९
459

ऽर्थप्रत्ययविधानाद्युपाध्यानर्थक्यमिति। जातिपरिप्रश्न इति। समाहारद्वन्द्वोऽयं। तत्र ज्ञानाविति त्रयाणां
विशेषणां। परिप्रश्नस्तु योग्यताबलात्किंमय एवं तस्य ह्रेयनिष्कृत्यर्थ इति भावः। प्रत्याख्यानमिति।
जातिग्रहणमात्रमित्यर्थः। आकृ इति। कैयट इत्यर्थः। किमोऽस्मिन्निति। अत्र च व्याख्यानमेव श
रणं भाष्ये दृष्टत्वात्। यत्तु द्वयोरित्यस्य प्रत्याख्यातत्वादिति न व्याः। तन्न। फलभेदे प्रत्याख्यानासंभ
वात्। यदपि बहूनां निर्धारणे डतरडिष्ट इति कैयटाद्युक्तं तदपि चिन्त्यं। नाहृग्गिष्टे भाष्याना
रूढत्वादिति दिक्। अवक्षेपणे। करणोत्फूत्। व्याकरणेन हि न स्वतः कुत्सितं किं त्वधीतविस्मृतं सदक्षे
त्यगतकुत्सा हेतुर्भवमुपाहरदवक्षेपणं परस्येति वा तदाहाये नेति॥ ॥इति श्रीमद्वैयाक
रणसिद्धान्तरत्नाकरे प्राग्दीव्यतीयप्रकरणावधिः॥ ॥ ॥इवे न्दराचर्मकाष्ठादिनिर्मितप्रतिमायरू प
र्यांषं वस्तु प्रतिकृतिः। सा च प्रकृत्यर्थविशेषणी स्वार्थिकत्वात् तादृश्यावच्छेपणाद्युत्पन्नः कन्ने राम
वानुवर्तते ननु कः। अश्वक इति। अश्वसदृशो हि सन्नित्यर्थः सहशोमातृकः। अन्ये तु नासौ स्वार्थिकः इत्याहुः गवय ४५९

इतिउक्तलक्षणानांकांतत्वात्कवयोनप्रतिकृतिरितिभावः।लुम्मनुष्ये।लिंगार्थेलुपविधानं।संख्या
लुविधेयएवदेवा।चंचेमनुष्याविति।नतुउक्तं।हरीतक्यादिषुव्यक्तिरिति।वासुदेवइत्यादियाःप्रतिमा
गृहीत्वाभिन्नार्थंगृहाद्गृहमटंतिताएवमुच्यंते।देवलकानामिति।तएवात्रभिन्नबोभिमताः।वर्षि
त्रपंजीविकार्थंदेवान्पूजयंतितेदेवलकाः।निघास्पायाम्लावापतनेप्रतिष्ठाप्यंतेपूज्यंतेचलास्तु
तेनरस्तेषांलुपउक्तःचा।अर्चासुपूजनार्थासुचित्रकर्मध्वजेषुच।इवेप्रतिकृतौलोपःकनोदेवप
थादिषु।इति।अर्चासुशिवःविष्णुः।चित्रकर्मणि।अर्जुनः।ध्वजेषु।कपिः।सिंहः।गरुडः।हस्तिकानिति
।रामंसीतांलक्ष्मणांजीविकार्थंविक्रीणीतेयोनरस्तंचधिक्धिक्।अस्मिन्पद्येपोपशब्दंनवेत्तिव्यर्थ
प्रश्नंपंडितंतंचधिक्धिक्।इवंचादुशब्दादिवार्थेपरः।समासास्त्वादिवार्थविषयादिति।अतएव
ज्ञापकात्तत्पुरुषेतिवेवार्थेसमासःसचसंज्ञाविशेषविनिर्मुक्तःसोपिसुप्सुपेत्यपविषयएवातेनस्वा
नंभ्रमतुपाध्यंतरयोगोविग्रहश्चनेतिवदंति।भाष्येतुकाकागमनमिवतालपतनमिवकाकतालं।का

सि०र० ख कनालमिव काकताली
४६० यमिति सर्वं द्रष्टव्यम् एवेति बोध्यं ॥ छः स्यादिति ॥ इवार्थ इति ज्ञेयं ॥ पूगाञ्ञ्य इत्यतः प्रागिवाधिकारात् ॥
460 घुनञ्यामित्यादौ वेक एवेवार्थः ॥ स च समासे नोक्त इति छो न ॥ नत्वप्रयुक्त इति ॥ प्रकृतिप्रत्ययार्थ
योर्हेतुहेतुमद्भावेनान्वय इत्यर्थः ॥ पूगाञ्ञ्योऽ ॥ ध जीवित्वं ब्रातस्य पूगाद्विशेषः ॥ एवं सूत्रात् ञ्य इत्य
नुवर्तते ॥ कौञ्जायन्य इति ॥ गोत्रे कुञ्जादिभ्यः इति च्फञ् ॥ ञ्यादयस्तद्राजाः इत्यत्र आदेशेऽनेन ञ्यः ॥ पार्शवः इति ॥ पर्श्वादि
ह्राजनपदेशक्तः ॥ ततो अपत्ये ह्यज् मगधेत्यण् ॥ बहुत्वे तद्राजत्वाल्लुक् ॥ पुनः संघे विवक्षितेऽनेन
णः ॥ यौधेय इति ॥ द्व्युपधेति कः ॥ युध्यते सौ युधा ततोऽपत्ये ह्यच इति ढक् ॥ तदन्तात्संघरूपविवक्षायाम
नेनाञ् ञिदन्तत्वादाद्युदात्तं ॥ किं च यौधेयस्यां कोलत्वगां वा यौधेयः ॥ अञन्तत्वात्संघाङ्केत्यण् ॥ राम
एवं च यौधेयादिषु पठ्यते ॥ तत्सुप्रयोजनद्वयं दृष्टव्यं ॥ यौधेयाः इति ॥ तद्राजस्येत्यञो लुक् ॥ किंकिनस्य ४६०
अग्रामणीपूर्वादिति किम् ॥ वैत्रो ग्रामणीर्येषां ते वैत्रकाः ॥ स एषां ग्रामणीरिति कन् ॥ इह स्वमु
दायः पूगवत् वेतनः ॥ प्रातक्षु ॥ उत्सेध

द्जितस्येत्यंनोदात्तं।अभिजित।आभिजित्य इति।अपत्येऽराश्त दं।तादनेन यञ्। अस्यापि स्वार्थिक
त्वेन गोत्रार्थकत्वादाभिजित्यस्यायमिति विग्रहे आभिजितक इति भवति।गोत्रचरणाद्वुञिति वुञ्
चन तत्र गोत्राधिकारे ग्रहणं इति भ्रमितव्यं।गोत्रे कुंजादिभ्य इति गोत्राधिकारविहितप्रत्ययग्रह
णे तु गोपवन्यादावस्माघं तावुञ् न स्यात्। अतो गोत्रार्थमात्रग्रहणात् सिद्धं ताहेत स्माद् अपि वुञो
वुञ् सिद्धः।तत्र चायत्यस्पचे तिपलोपः।पादश्चा तस्या तद्धितार्थे इति।ननु वीप्साप्रकृत्यर्थविशे
न६ षणामिति तु नोत्रार्थकत्वात्कथं समास इति चेन्न।घोषार्थेनैवार्थवत्त्वात्।ददातीति।समर्पणामा
त्रे ददात्यर्थः।मुख्यार्थे न तु रेणा सिद्धं।केचित्तु व्यवस्थितेः प्रयोगे सत्येवोत्तरसूत्रप्रवृत्तिमाहुः
तन्मते मुख्यार्थत्वेपि ददातेर्बाधकाभावः।स्थूलादिभ्यः प्रकारो भेदः सादृश्यं च उभयत्रापि यथा
यथं कन्।चंचत्क इति।चंचु गत्यर्थः सादृश्यद्योतकः कन्।अत्र चंचत्त्रपि पश्च चश्चिपत त्युपतस्य चंच
त्कोपयामरीतीः स्पंदमानप्रभत्वात् अत्र वहन्नपि इह निवपस्तत्प्रभत्वा घोहश्यपनेसद्दहत्कः।स्वरक

सि॰र॰स
४६१
461

इतिकुराः इतिद्रुःस्वः। भिन्नकमिति। ईषद्भिन्नइत्यर्थः। प्रकृतिवाच्यक्रियया प्रत्ययवाच्यस्य साधनस्य
व्याप्तिरत्यंतगतिः। सेह नास्ति। ननु भेदस्य प्रकर्षान्नात्यंतगत्योः पर्यायेणाविवक्षायां नमबादेः कन
स्य सावकाशत्वाद्बाधकगयपद्विवक्षायां परत्वात्कन्नप्राप्नोतीति न तु समबिति चेत्सत्यं वार्त्तिकादिष्टसिद्धेः।
अनत्यंतगतौ क्तान्तमाद्यः पूर्वविप्रतिषेधेन। तदंताच्च स्वार्थिकन्न्वकम् व्यवस्ति भिन्नतरकं छिन्नतरके
मिति सिद्धं। बहुनरकमिति। स्त्रकरनरकं मन्यते। सत्रमभिन्नतरकं भवतीत्याद्यपि सिद्धं। अषड
क्षो। अविद्यमानानि षडक्षीणि यस्मिन्निति बहुव्रीहिः। बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्। अषडक्षीणो
त्रो मंत्रः। उत्तमाषरा। आशिता इति। आङ्पूर्वादश्नातेः कर्मणि क्तः। यद्वा केवलादेवाशितः कर्त्ते
ति ज्ञापकात् कर्त्तरि वा। प्रभूतयवसमररय्यमित्यर्थः। अलंकर्मीणा इति। कर्मठ इत्यर्थः। अलंपुरु
षीणो मल्लादिः। ईश्वराधीन इति। अधिशब्दस्य शौंडादित्वात्समासः। ततः खः। प्रकृतिमात्रस्यापि राम
लोके प्रयोगः कुतो न स्यादित्याशंक्याह। नित्योयमिति। विभाषाग्रहणादिति। उत्तरसूत्रे हि प्राग्ग्रहणं प्राची ४६१

नुमिति रूपद्वयं साध्यं तच्च महाविभाषयैव सिद्धं न च कनः समावेशार्थमिदं विभाषाग्रहणमिति वा
च्यं । उत्सर्गशास्त्रेण कनः प्राप्त्यभावाद्विभाषाशास्त्रस्य समुच्चयार्थत्वे मानाभावाच्च तस्माद्विभाषा
द्वयमध्यस्थाविधयो नित्या भवंतीति न्यायेनास्य रवस्य नित्यत्वे लिंगमुक्तं भाष्ये तु स्त्रहतीजात्यंताद
न्यत्राल्पबहुवचनेन रवस्य नित्यत्वं ध्वनितं । कैय्यटेस्य शीहृतमिति द्वयोर्न चैव माशिना गावोऽस्मि
न्नलंकमिराइत्यादि विग्रहोप्यसाधुरिति वाच्यं । तस्यार्थप्रदर्शनमात्रार्थत्वेन लौकिकत्वानंगीका
रात् । प्रसंगादाह । अन्येष्वपीति । इष्यते इति । भाष्यकृतेति शेषः । प्राक्कन इति । अवद्धेयरोकनित्यतः
न्याद यह इति । स्नगान्नइत्यारभ्य विहिता थः प्राक्सुन इति । पादशानस्येति विहिताद्धुनः । आमाद
य इति । किमेत्तिङव्ययेत्यादि विहिताः प्राङ्मयइति । तत्र कृतवचने मयडिति विहितात् । त्वहतीजात्यं
ना इति । त्वहतीशब्देन त्वहत्याः आच्छादन इति विहितः कन्लक्ष्यते । जात्यंतात्बंधुनीति विहितश्छ इ
न्ययो जात्यंतशब्देन । कनादयश्छान्ताः नाइत्य क्तावतिप्रसंगापन्नेरिति भावः । बहुवचननिर्देशात्याश्रबा

सि॰र॰स्त दीनामपिनित्यताबोध्या।योहिवैयाकरणपाशादिशब्दैरर्थःप्रतीयतेनासोप्रकृतिमात्रेण।एवंशुक्लु
४६२ इत्युक्तेशुक्लतमाद्यर्थोनप्रतीयतइत्येतेषांन्यायसिद्धनित्यत्वानुवादमात्रंपरिगणनमितिकैय्यटादयः।
४६२ वस्तुतस्तुप्रकरणादितात्पर्यग्राहकसत्वेप्रकृतिमात्रादपितादृशबोधस्येष्टेयथाब्राह्मणावि व ३
त्युक्तेस्त्रीपुंसयोर्बोधः।ननुयुमानस्त्रियोरप्यनुशासनंतात्पर्यग्राहकमितिचेन्नाद्दहाप्यसतिपरि
गणनेमहाविभाषैवतथेतितुल्यं।किंचवैस्वार्थिकानित्याइत्येकेनैववाक्येनसिद्धेतमबादय
इत्यादिपृथक्करणवैयर्थ्यापत्तिः।तस्मात्परिगणनंवाचनिकमेवेतिनमवाविदृष्टोतेनपाशबा
दीनांनित्यत्वंनप्रयुक्तं।एतेनमनोरमोक्तमप्येवमितिदिक्।समासान्ताध्यायेति।एतदधिकारोक्तः।प्रत्य
न३ यःसमासान्तपदेनलक्ष्यइत्यर्थः।विभाषांचेः।दिक्चासौस्त्रीचेतिकर्मधारयः।प्राचीनमिति।प्राच्यां
दिशीत्यर्थेदिक्शब्देभ्यइत्याति।अंचेर्लुगितिलुकालुक्तद्धितलुकीतिङीपोलुकितद्धितश्चासर्वेत राम
व्ययत्वेस्त्रीत्वाभावः।एवंदेशकालयोरपितत्रङीबभावाल्लुगपिनास्तीतिविशेषः।प्रांचतीतिप्राक्इति ४६२

क्रियानिमित्तोवाप्रागादिःशब्दः।अव्ययस्यचप्रायेणालिंगत्वेनपद्वेत्वप्रत्ययेसतिसामान्येनपुंसकं।
।अव्ययस्यैवेहग्रहणमितिभ्रमंनिरसितुमाहास्त्रीलिंगिनि।ऋत्विगादिनांचेःस्तुप्फयपदेक्विन्।स्त्री
त्वाननुमाघभावः।अदिक्स्त्रियामिति।डीनन्तस्यांत्वंतत्वाभावादतिप्रसंगाभावात्किंतेनेतिप्रश्नः।
इत्तरोलिंगविशिष्टपरिभाषयाऽतिप्रसंगोऽस्त्येवेतिप्रत्युदाहरति।प्राचीदिगिति।दिग्ग्रहणंकिमिति
।आस्त्रियामित्येत्यावतोक्तौनातिप्रसंगाभावात्किंतेनेतिप्रश्नः।नहिदिग्भिन्नास्त्रियामपिनस्यादित्याश
येनप्रत्युदाहरति।प्राचीनाब्राह्मणीति।नेयंदिग्रूपास्त्रीकिंतुतद्भिन्नास्त्रीतिस्वोभवत्येवेतिभावः।प्राची
नमिति।पूर्वोक्तैवप्रक्रिया।दिग्वाचकत्वेप्यव्ययत्वान्नस्त्रीत्वमितिखोभवत्येवेतिभावः।ग्रामादिति।आ
रादितिपंचमी।ब्राह्मणजातीयइति।ब्राह्मणत्वजात्याश्रयःपिंडइत्यर्थः।ब्राह्मणजातिरिति।षष्ठीतत्पु
रुषोभावप्रधानेनकर्मधारयोवा।व्यंजकेद्रव्यमिति।व्यक्त्याश्रितजातेःसंयुक्तसमवायेनप्रत्यक्ष
विषयत्वादितिभावः।बंध्विति।जात्याश्रयद्रव्यवाचीबंधुशब्दोनपुंसकलिंगः।जात्याश्रयवाचीतुपुल्लिंग

सि.र.ख इतिभावः।पितृस्थानीयइति।स्थानंसंबंधविशेषः।यस्ययद्भ्रातिप्रसिद्धिः।पूज्यत्वादिकमितिपावत्।
४६३ पितृनिष्ठपूज्यत्वादिसदृशपूज्यत्वंवानितिबोध्यं।पितुरिवस्थानमस्येतिबहुव्रीहिः।एतस्यद्धस्यवै
कल्पिकत्वादाह।पितृस्थानइति।इहदृष्टांतसमानार्थकत्वंप्रकरणादिनाबोध्यं।अतेपिपरिगणा
463 नस्यन्यायसिद्धत्वमपरिगणितानांपाशवादीनांचनित्यत्वकथनंचप्राचांनव्यानांचनिरस्तं।इति
शब्दानुल्यस्थानशब्दाच्छोना।अनुगादिनः।अतएवनिपातनात्स्वप्यजानात्वितिवारोनिः।अनु
गादीति।सूत्रेनिर्दिष्टस्यानुवादोयं।नत्वसोलोकेसाधुः।ठकोनित्यत्वात्।आमादयः।प्राग्स्यप्रस्तुतेः
इहराचस्त्रियामजः।अग्नीतुराइतिसूत्रद्वयंफलंहेतेवस्यमाणंपरित्यज्योत्तरसूत्रमाह।विसारिणो
मत्स्यइति।अरण्यस्यादिति।अग्नीतुराइत्यत्रेऽग्नीत्यनुवृत्तेः।अयममिनित्यः।आमादित्वात्।संख्या
याः।अभिसुखीप्रवृत्तिरभ्याहृतिर्जन्मतस्य।सेहगदृष्टेनतदाहडन्नेमाति।पदाद्वितीयादिषु राम
वृत्तिरभ्यावृत्तिः।स्यात्तदातिसृषुप्रवृत्तिषुद्विरितिप्रसज्येतनषट्स्वपंचव्हत्वइतीतिभावः।अअवधि ४६३

पायग्रहणासामर्थ्याल्लिंगसंख्यानन्वयिनःसत्वभूतेनशब्दविशेषणीभूतायाःक्रियायाःनस्याजन्मगृह्यानेवर्त्त
मानसंख्याशब्दाद्इत्यर्थमनसिनिधायाह।पंचकृत्वोभुङ्क्ते।एवंपंचकृत्वोभुक्त्वामोक्तुमित्याघर्व्यह ५२
त्वयिनाद्यक्रियासत्वात्कृत्वोर्थीभवंतीतिबोध्यं।इहतुनद्वौपाकौत्रयःपाकाःपंचपाकाःदशपाकाइति।
घञंतपाकक्रियायालिंगसंख्यान्वयित्वेनासत्वरूपत्वाभावात्।तदभिहितोभावोद्रव्यवत्प्रकाशतइति
भाष्यात्।एकादीनांकृत्वेप्यव्ययत्वाल्लिंगादियोगाभावः।घञ्प्रकृत्याःसत्वभूतक्रियाभिधायित्वेपीतरा
विशेषणान्वयेनास्ति।घञर्थलिंगाद्यन्वयिभावनाविशेषणान्वयात्।एतेनत्रिःपाकाःपंचकृत्वःपाकाइत्या
दिस्वीकुर्वाणाभाष्यकैय्यटादिविरुद्धत्वादुपेक्षणीयाः।द्विर्वचनेचीत्यादिज्ञापकात्तुचप्रत्ययस्यसाधुत्वंक
चित्बोध्यं।एकत्तुमनादौतुक्रियाग्रहणाभावाद्दिनविशेषणत्वेपिक्रियायामुक्तायांकामोक्तुंपाकाइति
भवत्येव।भूरिवाराभिनि।भूरिशब्दस्यलोकेसंख्यावाचकत्वेपिनेहग्रहणं।बहुगणग्रहणात्त्रिपमाद्भूरि
शब्दस्यसंख्यासंज्ञाविरहात्।एकस्यसकृच्च।क्रियाभ्यावृत्तीतिवर्त्तनेऽभिमुखोऽध्यावृत्तिरभ्यावृत्तिरित्युक्तेः।

सि॰र॰स्ठ। सप्तम्युक्ते इत्यत्र चैकस्या अपि प्रवृत्तेः स्वरूपग्रहणं प्रत्याभिमुख्यमस्तीति नैकस्यां प्रवृत्तेः पुनः पुन
४६४ राद्वृत्तिरूपाभ्यावृत्त्यभावादर्थासंगतिरिति न चोदनीयमिति भावः। रूपे विशेषाभावे पि न्या
464 य्यमाह। संयोगान्तस्येति। प्राचोयं थं स्यति। न विविति। अभैसीदित्यत्रेति। साहचर्याद्विभक्तेरेव
ग्रहणमित्युक्तत्वादिति भावः। बहुधादिवसस्य प्रभृत्ते इति। कृत्वोर्थप्रयोगे कालेधिकरणइति ष
ष्ठीति हरदत्तः। नञ्। समासनिवृत्त्यर्था। यात्वस्थ स्त्व्या। क्षितंतनोदाहरणमित्युक्तत्वादिति न वा:
तत्रा। कारकप्रकरणे हरदत्तमतस्य स्थापितत्वात्। मोदकिकमिति। स्वार्थिकत्वाल्लिंगवचनानि
हन्तिः। अचित्तहस्तिधेनोष्ठगिति ठक्वहातिदेशः। निपातनसमुदायइति। उपदेशयात्तं पूर्ये वर्तते
वचनादप्रातिपदिकत्वेपि प्रत्ययइति न व्याः। स्वक्षयेति समासे प्रातिपदिकत्वं स्तवचं। भेषज
मिति। भिषग्जः चिकित्सायां। अस्मात्कंड्वादेः क्विप्। भिषजामिदं भेषजं। अत्रैव निपातनादेत्त्वं। देवतां राम
तानां। आग्नेदेवतायेदमिति। तादर्थ्यप्रत्ययार्थः प्रकृत्यर्थो वा पित्रदेवत्यमिति। इह देवशब्देनजा ४६४

त्तिविशेषवाचीनतथात्वेसामानाधिकरण्याभावाद्घनोत्पत्तेः। किंतुयौगिकः क्रियानिमित्तोदे
वशब्दस्तस्मात्स्वार्थेतल्। अतएवदेवदेवत्यमितिसिद्धं उभयोरूढशब्दत्वेयुगपत्पर्यायपदद्वयप्र
योगोनस्यादितिभावः। अर्थमितिमत्वर्थेऽज्ञाविधावर्धेद्वन्द्वमरुः। आग्नीध्रमितिरणप्रत्ययेनमंत्रो
दात्तत्वमुत्यादिनंशेषिकेष्वानस्मादग्नीध्रदाग्नेः। एवंसाधारणासमानंधारणमितिकर्मधारयःपूर्व
बहुव्रीहिरस्मात्पृषोदरादित्वात्समानस्यसादेशः। फलान्तरमाहस्त्रियामिति। अजभावेऽष्टाप्रशवर्णाचा
। अनित्यत्वंचैतत्समानाधिकरणध्वंसप्रतियोगित्वं। अतएवाकृदित्युत्तरसूत्रेसफलं। लोहिता
दिनारक्तेलोहित्यस्ययावद्द्राश्रयभावितयानित्यत्वात्। लिंगबाधनंवेतिप्रातिपदविधेर्बलवत्ता
त्परत्वाच्च। प्रातिपदिकादेवतद्धिताइत्याश्रयणाच्च वर्णादनुदात्तादितिङीषनकारोबाधित्वाक
न्नस्यात्। ननुलोहिनिकेतिनस्यादितिचेन्न। लिंगार्थप्रत्ययबाधेप्राप्तेविकल्पार्थंवचनात्। वस्तुतस्तु
स्वबंनात्तद्धिताइतिसिद्धान्तात्स्वार्थादिक्रमेणाध्यावंतादेवंपिननः कनिचरूपद्वयसिद्धेर्वचनंव्यर्थं।

सि॰ र॰ स्त ४६५ 465

निरवकाशत्वे सत्येव प्रतिपदविधेर्बलीयस्त्वं नान्यथा। अपायेति। अपायशब्दः ष्ठकं लभते। स्वत्वं चेत्य
र्थः। इह गमी। अत्र कस्मादिति पश्यते नन्विदं तं नन्तु तान्तानेन कादेशेन। अत्र वेयानां ममात्र इति टिलो
पत्राकस्मिकं वा च्चिकौ स्वार्थिकत्वात् लिंगानि हन्निः। मदास्ति कन्याप्रत्ययस्त्वौ त्येव सिद्धेः कारेष्वा
रराण्टायेलु कपिश्रवराथ दशभिर्मन्निकाभिः क्रीतो दशमन्निकः पटः। सत्योऽपि इह प्रशंसायां रूपप्
इत्यस्यानन्तरं ष्ठकड्येषताभ्यां निरनाति लोचयंछदासिमन्दः सन्नोऽतिकं श्रुतिस्तु वचमिति तिन ब्याः नन् त्र
ति कश्चेत्यत्र प्रशंसायामिति न संबध्यते। योगविभागसामर्थ्यादित्याशया बोध्या। बहुल्यार्थात्। का
न्कि। बहूनां स्वामी। अत्र यथ ग्रहणात् स्यायेभ्यो विशेषभ्यश्चाभ्र रिश्रोददाति। पंचशो ददाति। मंगलेति। आ
त्तुर्याभि प्रायेणोदं कश्चिदन्यत्रापि दर्शनात्। तत्र पत्रमैरल्पशब्द इति। समसनक्रियानिरूपितं कर्मत्वं
बोध्यं। पंचम्याः कर्मत्वात्। अत एवाल्पा पंचमी समस्यत इति व्याचक्षते। तो परिमाणशब्दादिति। एवं राम
चैकवचनशब्दे न वृत्तावेकार्थत्वात्। परिमाणवचनाएवग्रहणं न इति भावः। जातिशब्दास्त्वनेवमिति प्रत्र ४६५

त्य ४
तामिय १

दाहरति। घटं घटमिति। एते हि द्वन्द्वोनेकार्थना नियता इति जयादित्यः। वामनस्त्वक्त नियमे मानाभा
वाज्जातिशब्देभ्यो भवत्येवेत्याह। तथा च डः शसोः शिरिति सूत्रे डसा सहचरितस्य शसोग्रहणान्ने
हशिः। कुंडशो ददाति वनं गाः प्रविशन्तीत्युदाहृतं। द्विशङ्गति। वीप्सायां शसेव घोनिनेति द्वैव
र्वचनं नेति भावः। नन्वेवं एकैकशश्च पित्तसंयुक्तानीति न स्यादिति चेन्न। छंदोवदृषयः कुर्वन्ती
ति हरदत्तोक्तेः। वस्तुतस्तु लोकेपि प्रत्याहाराह्निके एकैकशः सहस्रकृत्व इति भाष्यप्रयोगात्सा
ध्वेवेति स्पष्टमिति सूत्रे प्रतिपादितं। अत एव प्रक्रियायां हर्षणायां परमनोरमायां प्युक्तेत्यवोचाम। द्वयो
द्वयोरिति। सहस्रं समेतानामित्यत्र सहस्रं सहस्रं पेसमवेतानामिति समवायक्रियां प्रतिवाप्साकर्तृ
कारकत्वं चास्त्येवेति ध्येयं। यायापंचमी विहितेनेति। प्रतिनिधिप्रतिदाने च यस्मादित्यनेनेति भावः। ह
भ्यासि। वृत्तावभूततद्भाव इति सूत्र एव ग्रहीष्यते तद्भाष्यविरुद्धमिति ध्वनयन्नाह। वक्ष्यामिति। अनन्तादि
तिञ्यादिविडाचश्चेति निपातनत्वादव्ययसंज्ञेत्यर्थः। दोषाभूतमिति। दोषादिवाद्युत्पेनयोरधिकरणाश

श।४

सि॰र॰स्त
४६६
466

न्तिप्रधानयोरपिहन्तोस्वभावाद्यक्तिमत्प्राधान्यंतेना[illegible]हरित्यादिसामानाधिकरण्यप्रसङ्गप
यन्नमितिभावः। चेच[illegible]अहृत्सार्वधातुकयोरित्यतोदीर्घइतिवर्त्तनेनदाह। दीर्घःस्यादितित्र्य
रूकरोतीति। अंत्यसकारस्यलोपश्चोचेतिदीर्घः। एवमुत्तरत्रापि। डाचिविवक्षितइति। परसप्तमींतु
अन्योन्याश्रयःस्यात्। डाचिकृतेद्व्यजवरार्द्धनातस्यांचसत्यां डाडितिरवरटाकरोति। तिरवर
टदित्यस्यडाचिविवक्षितेद्वित्वादिपूर्ववत्। एवंत्रपटदित्यस्याद्व्यजर्द्धादित्युक्तेः। तत्रनस्यात्। तानघ
स्यकृतद्वित्वस्यार्द्धद्व्यचाकिंत्वव्यचापन्नप्राचाटिलोपेसतिद्व्यचोऽवरंयततानदर्द्धयस्येतिव्याख्यातं।
नन्वसत्यंनस्यान्निर्मलत्वात्सरटस्वरयाकरोतीत्यादावव्याप्तेश्चोपेत्त्यापघापडाचश्च्वित्वंनस्वरार्थं
प्रत्ययस्वरेणासिद्धत्वात्। तानापिलोहितादिडाभ्यःक्यषित्यत्रविशेषणार्थफलाभावात्। तानचेडा
शङ्कानकयषशंक्यः। अनर्थकत्वादप्रत्ययत्वाच्चतथापिनाभाष्येव्यानिहितोदविघ्नतत्त्वइत्यत्र [illegible]
कयषादिवारणायचित्वमावश्यकम्। तत्रस्वेपांस्वलुगित्योडोडादेशः। वीजेनसहेति। हस्तिविषये ४६६

युक्तिप्राचुर्ययुक्तो श्रीसोपेरत्नाकरेऽस्तु लो। तद्धितप्रक्रिया पूर्णा वेद्ध्वां देशप्रसादतः॥७

बीजशब्दो बीजावापसहिते विलेखने भाक्तः। सपत्रानिष्पत्रा। पतंत्यनेनेति पत्रं शराणां पुंखनोव
हिः। स्थलमिति। परासहितमित्यर्थः। शूलात्। पाके किं। शूलं करोति कदन्नं। शूलमुदररोगः। स
त्यात्। भांडरत्नादिद्रव्यजातं क्रेतव्यमिति। मयेतद्ग्राह्यमिति वा परीक्षादिनामल्पदानेन च दृढं
करोतीत्यर्थः। तथैव तथ्यं। पादार्घाभ्यां चेति। चस्यानुक्तसमुच्चयार्थत्वात्स्वार्थे यत्। परिवापरामि
ति। कर्मव्यापारमात्रवाचिनो वपेर्हेतुमत्यण्णंताल्लुट्। मांगल्यमुंडने नेति। चौलदीक्षादौ। मद्राद्व
निामद्राद्रित्यर्थग्रहणमिति नोक्तं। कल्याणं मंगलादिभ्योप्यतिप्रसंगात्। मद्रं करोतीति। क्षेमंक
रोतीत्यर्थः॥४॥ ॥इति श्रीमद्वैयाकरणसिद्धांतरत्नाकरे सिद्धांतकौमुदीव्याख्याने तद्धितप्रक्रिया॥
॥ ॥सर्वस्य द्वे। समासासमासैकशेषतद्धितांतात्मकस्य सर्वस्यापि शब्दस्योपजीव्यत्वात्तदु
त्तरमस्यारंभः। न चैवं तिङंतस्याप्युपजीव्यत्वात्तदुत्तरमेवास्यारंभः शंक्यः। सुबंतोपजीवकस्त्वा
नां भूयस्त्वेन तादृक्शंकानवकाशादिति भावः। अस्य सूत्रस्यार्थाकांक्षत्वादुत्तरेषां च विधेयसाकांक्षत्वे

सि॰र॰स्त
४६७
467

नोमप्याकांक्षपास्वरितत्वाच्चाधिकारोपत्र...धिकत्येति। एतयोरर्थावधिकृत्येत्यर्थः। स्वरूप
ग्रहणात्तु न भवति। तस्य परमाम्रेडितं। अनुदात्तं चेति लिंगात्। अत्र च स्थाने द्विर्वचनं द्विष्प्रयो
गो द्विर्वचनमिति च द्वौ पक्षौ संभवतः। तथाहि। द्वे इत्यस्य संख्येयापेक्षायां पदाये द्वे इत्यध्याहृ
यते सर्वस्येति च स्थानषष्ठी सर्वावयवोपेतस्य पदस्य स्थाने नित्यवीप्सयोर्गम्यमानयोर्द्वे पदे
इत्यादेशत्वेन विधीयेते तदाऽद्यः पक्षः। अवयवकार्त्स्न्यवाचित्वात्सर्वशब्दस्य पदस्येत्यपकर्ष
णाच्चाकार्यलाभः। पदानुच्चारणोऽस्य ध्वंहत्यपतद्वयेऽपाकर्मणि। षष्ठीक्रकविधेयपदस्य द्वेऽच्चारणो पा५
भ [भ]वत इति तदाहुरिती प [illegible]। सर्वस्य किं। वृक्षाभ्यामित्यत्र भ्याम् प्रागभागस्य द्वित्वं मा भूत्। समुदा
यवाक्यपरिसमाप्तिरिति न्यायेन समुदायस्य बहित्वं भविष्यतीति चेन्न हि स्पष्टार्थं सर्वग्रहणं। पदस्य
किं। वाक्यस्य मा भूत्। तत्राद्ये पक्षे द्वे इति द्विवचनबलात् द्वे पदे आदेशाविति फलितत्वादवयव रामः
योः पदत्वं स्वतः सिद्धं समुदायस्य तु स्थानिवद्भावेन। तेनावयवानां पदकार्याणि सिद्धानि। तद्घपा अपव ४६७



॥

न्तत्ववान्तरपदत्वंनास्तीत्येवंपरः४ भऊ न्कातन्नेयइतिनव्याः।वस्तुतस्तु ३

न्नपचन्नितिङमुट्त्ववान्त्वन्नानः इत्यत्र्यपदांतस्येतिरात्वनिषेधः।अग्नेऽन्नेइत्यत्रएङःपदांतादि
तिपूर्वरूपंचेत्यादि।अत्रएवाश्नीनाश्नीनेत्यादा वतो गुराइतिनपररूपमितितिपघपोहभाष्येऽवप

त्ती३ वानांपदत्वंनोभिक्तनंपिंतुसमुदायस्येतिप्रतिभातितथापिंकेषुचिल्लक्ष्येषुवपवपदत्वा
भावेपिनत्वमितिरितिसूचयितुंनोक्तंनथाहिमास्त्ववपत्वपदत्वाराजाराज्ञा।वाक्त्वाक्इत्यादौ
द्वित्वान्परत्वान्नलोपादिषुकृतेषुद्वित्वप्रवृत्ताविष्टसिद्धेः।नचासिद्धत्वंशंक्यंप्रकृतेत्रासिद्धीयम
द्विर्वचनइतिवचनात्।नचविसंविसमुसलंमुसलमित्यत्रषत्वंशंक्यंआदेशरूपत्वाभावा
त्।पदत्वनभिन्नेभिरित्यत्रगत्वमाशंक्यसमानयहणसामर्थ्यात्समानमेवपन्निमित्तंतत्रैवराग्व
मितिसमाहितंभाष्ये।नचद्वित्वंपाविसर्गविशिष्टस्येवद्वित्वापत्तौरेफात्परत्वस्यदोर्लभ्यात्परएवंत्रा
सिद्धीयमद्विर्वचनइत्युक्तत्वात्।अन्यथारेफस्यापिदोर्लभ्यापत्तेः।नचपदत्वावसानत्वयोर्भावेनवि
नाशेहष्टावविसर्गानिह ... इतिवाच्यंरेफस्यापितथात्वापत्तेः।किंचैवमवानरपदत्वाभावेस

लु२ त्तिंद्रमे

प

सि॰र॰ख मानपदत्वं वा कथं नास्तीति तिन तस्मात् राजा राजेत्यादौ क्वचिन्न विहितयिन सर्वत्रानिर्वाह इत्युवपयवदंतत्व
४६८ मंगीकार्यमेवेति भाष्यतात्पर्यं निष्कृष्टयामिति दिक्। द्विष्ठा योगपक्षे प्रत्येकं पदसंज्ञा व्यक्तैव। पचसि
468 पचसि इत्यत्र समुदायस्य पदत्वमेवं दुष्टव्यं॥ सएव धातुः प्रथमपक्षे हि पश्यते तेन तस्मात्स्य समात्प्रत्ययो
विहितः समुदायादितदंतस्य विधीयमानं पदत्वं समुदायस्यापि भवतीति तेनावग्रहादि सिध्यति। आ
मपचसिपचसि देवदत्ता इत्यत्रैकान्तरता चासिद्धा। अन्यथोऽस्मए कान्तरमामंत्रितमनंतिक इति
आमंत्रितस्य निघातप्रतिषेधो न स्यात् तत्रामृशब्दो निपातत्वादनुदात्तः तदुत्तरसमुदायस्य तिङ्
तिङः इति निघातः। केयटस्तु द्वितीयस्यानुदात्तत्वं चेति निघात इत्याह। आमंत्रिते त्वाद्यं तो द्वावुदात्तो षा
ष्टिकामंत्रिताद्युदात्तत्वं तस्य तोदात्तत्वं चेति। पक्षद्वित्वपोगपक्षोत्तु भः। योनः पुन्यं योनः पुनिकद्
निष्पन्नस्तु तेनो रन्तुत्यत्नि प्रसंगात् तत्र ध्वनदंगत्वाद्व्यपात्वयोस्तु कि द्वित्वप्रवर्तन इति तिन व्या॰ मते राम
दं वक्तव्यं तद्द्वितानुत्पत्तिः किं समुदायस्याप्रातिपदिकत्वाभावात् त्वबैबाद्धो नाघः। अपसिद्धांतात्। ४६८

लेइ त१
८१

नद्वितीयः।पचसिपचसीत्यत्रेवमध्वट्ठकारीत्याभाष्याध्ककारीत्याचसत्त्वंतत्वस्यैकपद्यस्यत्व
निर्बाधत्वात्।प्रत्ययलक्षणेनस्तुवंतत्वानपायात्।अग्रकार्यत्वाभावेननलुमतेतिनिषे
धाप्रवृत्तेः।अतएवसमर्थादित्येवंभविष्यतीतिभाष्यंकैयटेनोक्तरीत्यैवव्याख्यातं।किंचैवंसु वन्त
त्वानंगीकारेसमाससेऽवेतिप्रातिपदिकसंज्ञानियमस्याविषयत्वात्समुदायस्यप्रातिपदिक
त्वमपिदुर्वारमेवनियतार्किंचिदेवनपश्यतेनयुनःपुनर्जायमानेऽत्रैकपदत्वाभावेऽवग्रहोपि
नस्यादितिनव्योक्तंपरास्तं।अतएवन्यायसिद्धेर्थेज्ञापकमप्युक्तंभाष्यात्पदंयकस्कादिषुकौन
स्कुनशाहृंपठति।निपातनान्यपबाधित्वाऽऽश्रावणसक्तप्रथमपदस्यान्तिसंभवएवना
स्तीतिवक्ष्यतइतिदिक्।प्रयोगपद्धेननकिंचिद्बाधकमितिसिद्धं।नित्यवीप्सयोः।इहाप्रिस्वरूपप
र्याययोर्निग्रहरोः।नित्यंप्रहृदेशरादिभ्यः।द्वक्तवमपायेभागवीस्योःस्वप्रति[illegible]परी।नेनिर्दिशात्।न
न्वेवमनित्यत्वेनपेप्रसिद्धास्तेषांद्विर्वचनंप्राप्नोति।हिमवानपारियात्रइतिनित्यत्वंचनध्वंसाप्रतियो

पि१

सि॰र॰ह्य गित्वरूपं। किंतु पेषां प्रयोक्तृभिरुत्पादविनाशौ नोपलभ्येते ते नित्या इति चेन्न। नित्या पृथिवी नित्यमा
४६९ काशमिति प्रयोगात् चिरकालावस्थायिनि नित्यशब्दः। शक्तः नित्यप्रहसितो नित्यप्रजल्पित इत्यादि प्रयो
गादाभीक्ष्ण्येपि तत्राघस्वार्थे वास्याद्वीप्सायां वा। नो घः। हिमवान्। हिमवान्नित्युक्ते स्वार्थमात्राप्रतीत्या
469 वीप्सापा आपि प्रतीतेः। नद्वितीयः। द्विर्वचनं स्यपष्टं पि नित्यग्रहणा वैयर्थ्यापत्तेः। क्रियावाचि नाम संग्र
हायन्नेष्वु अतो द्वितीयः पक्ष एव युक्तः अन्याशेपे नाह। आभी [illegible] क्ष्ण्यपदं निघोत [illegible] ति। नपुंसकम
नपुंसके नैकशेष एकवद्भावः। पदस्येति। अपकर्षणीयमित्युक्तत्वात्। द्विर्वचनमिति। द्विपदे आ
देशौ स्यातामित्यर्थः। कर्मणीति ल्युट्। यद्वा भावे ल्युट् द्विरुच्चारणं स्यादित्यर्थः। नन्वेवं प्रपचतीत्यस्या
२८ पदत्वाद्द्विर्वचनं न स्यात्। सत्यं। सगतिग्रहणं कर्त्तव्यमिति वार्त्तिकादिष्टं सिध्यतीति तेनाभीक्ष्ण्ये विधी
यमाने द्विर्वचनं धातुमात्रस्य न। नापि यङो बाधकमिदं द्विर्वचनं धातोर्यङि पदस्य द्विर्वचनमिति वि राम
षयभेदात्। अन्यथा भृशार्थे सावकाशो यङ् पौनःपुन्ये परेण द्विर्वचनेन बाध्येत। नापदात्तु भृशार्थे ४६९

ङ्नदायोनः पुन्ये पडंनस्य द्विर्वचनं भवत्येवा पापच्यते पापच्यते इति। क्रियासमभिहारे लोडपि भवति
पापच्यस्व इति। आभीक्ष्ण्ये पठितत्वेनैव नस्योक्तत्वाद्द्विर्वचनाभावः। पदे कैयटोदयः। परिगृहीत
साधना क्रियाव्यवहारोपयोगिनीति नदनभिधानान्न धातुमात्रस्य द्विर्वचनमित्याह। तदयुक्तं
नानाकारकविशिष्टक्रियाया एवनथ्यान्वेन वाक्यस्यैव द्विर्वचनापत्तेः। तत्समासदस्यापपदस्य
न इत्येव युक्तमित्याशयेनाह। आभीक्ष्ण्यमित्यादिना। क्रियाप्रधानमाख्यातमिति सिद्धान्तान्तिङन्ते
क्रियायाः प्राधान्यात्तद्धर्मस्याभीक्ष्ण्यस्य द्योतनार्थं द्विर्वचनं। एवं कृदन्तेष्वपि। अव्ययकृतो भा
व इति वचनादसत्वभूतक्रियैव तत्र प्रधानमिति भावः। तथैवोदाहरति। पचति पचतीत्यादि। इहा
भीक्ष्ण्यस्यातिङ्पनस्य च विवक्षापांपरत्वाद्द्विर्वचनं ततस्तरप्शनेन पचति पचतितरां तिष्ठतीति
भवति। इहन्त्वाख्यातरमाख्यतरमान पेन्नभयत्र नरविशिष्ट इति भाष्ये स्थितं। वीप्सायामिति। [illegible] कौ वि
ति डिहाषति इत्यत्र न द्विर्वचनं तस्मिन्नाभीक्ष्ण्यमेव प्रतीयते न स्वार्थमात्रेन तस्य वीप्सा प्रहणं व

सिर-स्त्र
४७०
470

र्थी स्यात् वृक्षं वृक्षमिति च न स्यात् तातस्माद्ध्याप्तुमिच्छा वीप्सेति व्युत्पत्तावपि योगरूढोयमिति वीप्साप्र
योन्हू धर्मः। यथाऽब्धौ गतगतमित्यत्र केचित्प्रियस्य चिरगमनादिना पीडितो वाक्यं प्रयुङ्क्ते इति प्रतिपत्तिः।
।तथा वृक्षं वृक्षं सिंचतीत्यादौ एषां वृक्षसंख्या या युक्तानितरेतरयोगं प्राप्तान्सर्वार्थान्क्रियया गुरो म२
न वाञ्छुगपद्ध्याप्तुवन्न वाक्यपदावक्ति न दावक्तृत्वस्य इच्छाविशेषो द्विर्वचनेन द्योत्यते तदुक्तं भाष्ये।
वीप्सितीनि वीप्सः वीप्सश्चेत्कर्त्ता भवति। अनवयवेन द्रव्याणामभिधाने वीप्सार्थ इति अनवयवेनेति प्र
तीकमादाय साकल्येन द्रव्याणां क्रियागुणा [illegible] संबंधप्रतिपादनं वीप्साफलमित्यर्थ इति
कैय्यटः। साकल्यं च यथायोग्यं द्रष्टव्यं। यत्र तु संकोचकं नास्ति तत्रासंकोच एव। पृथ्वी
ग्रामो ग्रामो रमणीयः। जातो जातो निधनमुपैतीति नचैवं ब्राह्मणा इत्यादौ जातिनिर्देशेन
कव्यक्तिप्रतीतेरवश्यंभावाद्द्विर्वचनापत्तिः। यथा न ब्राह्मणोहं तव्यद्वयत्रेति वाच्यं। व्यक्तिप्रती राम
तेरार्थिकत्वेन कृत्स्नार्थीप्रतीतेः। नचैवमेकशेषे कृत्स्नाभिधानसत्त्वाद्द्विर्वचनापत्तिः। अस्मि ४७०

रवनेहद्वाः शोभनाइतिकतिपयानामेवहद्वाराणां शोभनत्वेनप्रतीत्याकार्त्स्न्येनाभिधानाभा
वान्नद्विर्वचनाप्रवृत्तेः।यथा भोयाभोरमणीयः अस्मिन्वनेहद्वोवृक्षः शोभनइत्यादौ सर्वेषामेव
ग्रामनगराणांहद्वाराणांचरमणीयत्वशोभनत्वप्रतीतेर्द्विर्वचनंभवत्येवासर्वेहद्वाइत्यत्रनद्विर्वचनं। ५३
सर्वशब्देनवीप्साद्योतनान्नानचैवंवृक्षंवृक्षंहद्वामित्यादौबहुवचनाप्रसक्तिःवस्तुतोबहुत्वप्रतीतावप
पितस्याशाब्दत्वात्तत्रत्यैकमेकत्वस्यशाब्दत्वादेतत्संगत्वार्थेकवचनस्यैवोपपत्त्याबहुवचनायाद
नायोगात्। चैत्रायचैत्रायशतंदीयतामित्युक्तेप्रत्येकंविधेयसंबंधःप्रतीयतेनाएकशेषेत्वनेनचै
त्रात्मजाभ्यःशतंदेयमित्युक्तेनियमेनप्रत्येकंशतंदेयमित्यप्रतीतेः।अतएवैकशेषेएक
वचनंन।यत्तुएकशेषेएकवचनंनेत्यविशेषेणोक्तंनतैः।तत्रसमाहारप्राधान्येनत्राप्येक
वचनमावश्यकमितितिसरूपस्तत्रैवप्रतिपाद्यितव्यात्।यदात्वपरिग्रहीनद्वित्वबहुत्वानांविवक्षातदाब्रा
ह्मणाभ्यांब्राह्मणाभ्यांशतंदेयंब्राह्मणेभ्योब्राह्मणेभ्यइत्यादिभवत्येव।द्वंद्वसमासस्तुनाशंक्यः।।

स२

लभि ... तिस्पष्टे १ नयोनंकः १

इत्युक्तम् एतेनस्थानेद्विर्वचनपन्दएवकुं ... पन्नानंतरंदुलभिमितिपरास्तम् ७

सिरु ३ चार्थाभावात्तासमुच्चयेत्वनभिधानाद्वंद्वोनेत्युक्तं। अयंनिगीलितोर्थोनएकशेषद्विशेषयोःग्र

४७१ नेकप्रत्ययस्तत्त्वनियमादितिदीहितिनाः। नत्रैकशेषेद्वित्वस्यहद्दावच्चप्रतीतितः। द्विशेषेनद्व

४७१ भावेनयोग्या कोनियमः कुत्र॥१॥ एकत्वस्याप्येकशेषेप्रतीतेरधुनोक्तिनःभावत्कौनियमो

नेतिप्रकृप्रत्येभिसंप्रति॥१॥ अयमत्रविशेषः द्विशेषएकत्वंद्वित्वंबहुत्वंचस्पवस्थितेनप्रतीप

र्थभ्रा५ नोपदार्थकारंसंभवाएकशेषेनुएकत्वादिप्रतीयते पदार्थकास्त्वनुनेता भाष्येतुनानेनद्वि

६५ र्वचनेविधीतेकिंतुनित्यवीप्सयोर्यावंतोऽर्थास्तावतांशब्दानांप्रयोगेप्रसक्ते द्वेएवशिष्येतेनेतरे ३५

लुप्यंतइत्यर्थायथैकशेषे। अस्मिंश्चपक्षेद्वेइत्येवस्यममस्कः। सर्वपदसमानियहरा। निप्रस्याख्या

नानितदुक्तं सर्वपदं ति ... यहरानर्थकं चार्थाभिधानेद्विर्वचनविधानादितिनानुपपत्तिनैक

त्वानामपिद्विर्वचनानंतरंबहुत्वाभिधानायबहुवचनंकिंनस्यादितिचेन्नाहद्वंद्वहोमित्या राम

दावुक्तदिशास्वबंतत्वेनाप्राप्तियदिकत्वारायनुयोपायोपाहषदृषत्समिवसमिन्सरित्सरिदि ४७१

गा३ शाब्दमेव ६

त्यत्रोक्तसमाधानमव्यापकमिति न्यासः। तत्रायो नः स्तुत्यामित्यत्रैवेहापि प्रत्ययलक्षणेन सु
बन्तत्वेनाप्रातिपदिकत्वात्। एतच्च भाष्य एव स्पष्टं। अपद इत्यनन्तरं गेकत्वावच्छेदेन द्विरुक्तार्थसंख्या
नरेनिराकांक्षत्वादेवेति न बहुवचनं। वस्तुतो बहुत्वविधानेपि तस्य शाब्दबोधाविषयत्वा
दित्याहुः। तदपि चिन्त्यं। अद्वौ वहवस्त्वं पद इत्यादौ बाधिकेकाव्ययस्य तौल्याद्विनेकेरत्नुसारेणि
संग्रहात्। साधुत्वार्थं तत्र द्विर्भक्तिरिति चेत्सामित्सामिदित्यत्रापि तथैवांगीक्रियतामिति निष्प्रत्ययकं
विदेतन्नातस्मात्सुबन्तत्वेनाप्रातिपदिकत्वाद्बहुवचनं नेति सिद्धं। परेर्वर्जने। इह स्वार्थद्विर्व
चनं नेह परितस्त्रिगर्तं वृष्टो देवः। परेरस समासेति वार्त्तिकात्। वेगेभ्य इति। पंचम्यपाङ्परिभि
रिति पंचमी। उपर्यध्यधसः। उपरि शिरसो भारं धारयतीत्यत्राधाराधेयभावमात्रं विवक्षितं न
तु सामीप्यं। तेन न वस्तुतस्तत्त्वेपि न द्विर्वचनमिति भावः। वाक्यादेः। स्तुदरस्तुदरेति वाक्या
देरामंत्रितस्यासूयासंमतिकोपकुत्सनेष्वाम्रेडितं भर्त्सन इत्ययथायथं पुनः प्राप्तोपि नास्य

१ वीप्सायां दोषीहानुवर्तते न तु मध्यस्थे परेर्वर्जन इत्यादौ। अर्थनिर्देशेनाकाङ्क्षाविरहात् असत्यपि संभव इति न्यायेन बहुव्रीहिवद्भावेन
द्विर्वचने [illegible]स्य वीप्साप्रसङ्गा[illegible]दने नैवोभयं विधीयत इति कैयटः [illegible] न्ते ति ब न यन्नाह १
: वक्ष्यमाणरीत्या [illegible] २ अतिदेशिकसमासप्रवृत्तिमादाय २ कैयटः ४

सि॰र॰सु र्वे पुतः साहमनिष्कुता विभाषा कर्तव्य इति भाष्योक्तेः। एकं बहुव्रीहिवदित्यतिदिष्टत्वात् इति। केवलस्या
४७२ तिदेशोपलाभावादिति भावः। पूर्वभागेष्विति सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावः पूर्वभागस्य वस्तुतः
५१२ न्वाच्चातेन न नोत्तरस्य पुंवद्भावः। स्त्रियाः पुंवदिति तु नेह प्रवर्तते सामानाधिकरण्याभावादि
ति भावः। पटु द्वित्वं पनतु हन्तावेकाशब्दे पुंवद्भावेन रयायो निवृत्तिप्रसंग इति हरदत्तः। कौतन्न भ्रपामु४
भस्त्रैषेति लिंगेन पूर्वस्यैव स इति सिद्धान्तात्। अवग्रहे विशेष इति। एकैक एकयेति पूर्वपद
६ कैयटाश्रिति रूपत्वात्तं पठनीयमिति भावः। वैदिकास्तु एकया। एकया इति पदपाठे पुंवद्भावं न कुर्वन्ति। ब
४ छन्दसि दृ हृचाश्च एकैकानुपरिषिति सहस्रत्रावग्रहे दीर्घमेव पठन्ति। आबाधे च गतगतेति। ए
ष्टानुविधेः। कस्य एवगमनकर्त्र्याः स्त्रियाः कथनात्समानाधिकरणं स्त्रीलिंगमुत्तरपदमस्तीति स्त्रियाः पुं
अत एव एक वद्भाषितेति पुंवद्भावः। अतिदेशसामर्थ्यादुत्तरपदत्वस्यापि लाभात् तान्त्रेव न नेत्यत्र न राम
मेकं सुशासि लोपोपि स्यात् नामेवान लोपो न ञ्ञः स्यात्त उत्तरपदाधिकाराविशेषेपि मैदु कश्च स्यात् न समासः ४७१
रित्यत्र न सुप बहकिं चि[illegible]त्रपोऽ इति न्यायेन बहुव्रीहिवद्भावविधानसामर्थ्यादेव सुबन्तो समुदायस्य सुबन्तत्वे प्रातिपदि
लुक्। इत्थं कत्वात्सुबन्तं किं तत एव पुनः सुबुत्पत्तिर्विधेया। न च समासत्वेन प्रातिपदिकत्वम्। तत्राऽप्रत्यय [illegible]त्यनुवर्त्यतान्नेयम्
देशः। आम्रेडितानुदात्तत्वेनेष्टासिद्धेरिति दिक्। ४ ३

न्यतः समासग्रहणात् तु वर्त्तनाच्च मुख्यसमास एव न लोप इति कैयटोक्तेः नञः सामर्थ्याद्विशिष्टेन का
र्यित्वेन निमित्तत्वबाधात् नञ्समिन्नो नरपदः एव नलोपप्रवृत्तेश्च । अत एवाचोरहाभ्यां द्वे इत्य
नेन मद्दत्त्र द्दो भद्दत्त्र इत्यत्र रेफस्य द्वित्वं कुतो नेत्याशंक्य साहाह्यविशिष्टेन निमित्तत्वेन कार्यि
त्वं बाध्यत इत्युक्तम् आकरे । न चैवं न नस्तृत् त्तृत् इत्यत्र नञ्स्तुभ्यामिति स्वरः स्यात् नञ् स्तृजः स्तृ
शृ इत्यत्र ऋशृ रवृध्रृ इति समासान्तश्च स्यादिति वाच्यं । अवनं समासग्रहणं तत्र सिंहावलोकितन्या
येन नञ्स्तुभ्यामित्यत्र समास इत्याह । ष्यं तु मुख्यसमास एव नञ्स्तुभ्यामित्यस्य प्रवृत्त्यभ्युपग
मात् । बहुव्रीहौ प्रकृत्येति निरवयवयद प्रकृतिस्वरत्वमकल्प्य वा नत्र समास इत्यस्यास्य संबन्धात् । स
मासान्तो ऽपि मुख्यसमास एव प्रवर्त्तते । समासान्तत्वं तद्धितविषयादित्यनेन समासान्ता इति सह त्रेस
मास इत्यनुवर्त्तनात् । तत्प्रकारे गुणा वचनस्याभेदसाहचर्यः प्रयोगः प्रकारशब्दः । शक्तः बहुलमिः प्र
कारे गुडुंड्त्रावाह्मणाड प्रकारोयं चैत्र इति कर्मेराप्य वत्तारासानत्र व्याख्यानो द्वितीयस्य ग्रहणा

९९ ।

सि·र·स्त मित्याह। साहस्रपेइति। पुंवद्भावइति। पुंवत्कर्मधारयेत्यनेनेतिभावः। नत्वत्र नकोपधायाइत्या
४७३ दिनिषेधविषयेपिप्रवर्त्ततइतिकर्मधारयवदित्यत्तुदतेः फलांतरमपिबोध्यम्। पटुपटुरि
473 ति। इहद्विर्वचनेनजातीयपरो बाधानेष्यतइतिवामनः। जयादित्यस्तुजातीयर्विधौविशेष
:प्रकारइत्यर्थभेदमाश्रित्यसमादधौ। ननुसिंहोमाणवकइत्यादावपिस्यात्। लक्षणायां
सिंहशब्दस्यगुणवचनत्वात्। मैवं। वचनग्रहणसामर्थ्याच्छक्त्यागुणवचनत्वेनप्रसि
द्धः। शुक्लोदयस्तेस्य वर्गइत्यनेनद्रव्याकरणाद्वानादित्याप्रायेन व्याचष्टे। गुणोपसर्जनेनद्र
ना। केवलगुणेति। उभयविधग्रहणेव्याख्यानंशरणं। नवीननवोभवतीत्यत्रवाश्रयादि
त्वाच्छनेनद्वित्वेसुवत्तुकस्यात्। नचप्रकारद्विर्वचनेनतस्यबाधःशक्यः। मित्रवि
षयत्वात्। नित्यंकौटिल्येगतावित्यत्रतुनित्यग्रहणाद्बाधकत्वंवत्सतोपधानवनवाव राम
नवाग्रमिरादेशइत्यत्रपुंवद्भावः। भीतभीतइवेत्यत्रेवेनसाहस्रपोकौ क्तित्वाप्राप्तावपिभीत। ४७३

ड्डीन इति समासो बोध्यः।खिन्नःखिन्नःशिरवखिन्नुपदंन्यस्यगंनासियत्रेति मेघदूतस्कासर्व्व
दवाचः कवयइतिन्यायेनयोज्यः।खेदावस्थास्तुभेदंप्रकल्प्यवीप्सातत्र बोध्येतिनव्याः
अत्रवार्त्तिकान्याह।आनुपूर्व्य इति।वीप्साभावादारम्भः।संभ्रमेणोति।चापलेनेत्यर्थः।आ
भुप्रतिपादनेचापलं।न्यायसिद्धइति।यावद्भिःशब्दैःसंबोध्योर्थःप्रत्येतिनावंतः।प्रयोक्त
व्याः।फलपर्यवसायित्वात्प्रवृत्तेः।अन्यथाऽहिनाहन्यतएवेतिवाक्यप्रयोगात्।क्रि
यासमभिहारइति।योनःपुन्यंभृशार्थश्चक्रियासमभिहारः।योनःपुन्यमेवनित्यत्वेनतु
क्रमतोनास्यवैयर्थ्यमित्याह।भृशार्थेहित्वार्थमिदमित्यागपेतावदेवप्रयोजनंस्या
न्नाहि भृशार्थेऽन्यवद्रूपात्तमाह।लोटासहेतिसमुच्चिन्येति।अन्यथाकार्येत्वाद्द्विर्वचनंन
स्यात्क्रियासमभिहारग्रहणान्नन्यायोबाध्यतइतिभावः।एवंचनित्यवीप्सयोरित्यत्र
नित्यग्रहणस्यनवैयर्थ्यमित्यवधेयं।यत्तुआभीक्ष्ण्येपदद्वैमवनइतिवक्तव्यमनुक्ताभुक्ताव्रजती

सि॰ र॰ स्त न्यादिनद्वार्तिकेव्यर्थंसूत्रेणासिद्धत्वात्। अन्येतु एकारागमुलंनेषुक्रियाविच्छेदप्रतीतेर्नै
४७४ दं नित्यमित्याप्राप्तेर्द्वित्वं विधीयत इति नाक्षिवेध्यमित्याहुः। मतांतरेणाप्यपिकैयटेऽव
474 गंतव्यानि। वस्तुतो नेदं युक्तमिति दीक्षितानां भावः। कर्मव्यतिहार इति। क्रियाविनिम
य इति यावत्। द्वेवाच्येइति। द्वित्वं नित्यमेव समासवद्भावस्येव बहुलग्रहणेन संबंधः।
स्वयं स्त्वेवंभाष्य इति। अत्र केचित् द्वितीयादीनामेव स्वादेशापिधीयतेऽन्तरङ्गलेपि द्वितीये
वनप्रथमा। तत्राप्येकवचनमेव न बहुवचनं नांतरीणीति तु गंपरिशिष्टकंठाभरणादि थे श्रे
ष्वस्य स्पष्टं प्राचापि न देवासुरस्तनंतत्सर्वभाष्यानुवादपारीणीयमिति ध्वनयन्वचनांतर
मुदाहरंति। अन्योन्या वित्यादि। महाकविप्रयोगेणेमर्थदृष्टिपति। अन्योन्येषामि
ति। भाष्यकैयटयोर्विशेषानुक्तेस्तदविरुद्धमाघ इति भावः। अत्र केचिदिति। प्रक्रियाकार राम
रादयः स्वमतमाह। अन्ये त्विति। आमादेशमिति। तान्द्विश्वास सर्वेत्यव्ययत्वमांतस्य वो ४७४

क्र४ त१

ष्यां दलद्वयशतीसंग्रहश्लोकः प्राचीनोनभाष्यकैय्यटस्थः। अतिप्रसंगादितितथावै
कशेषप्रतिबंधाद्विर्वचनस्यापिहनिलंनाशंकंया। प्रातिपदिकार्थनिर्दिष्टेयांयांविभक्तिमा
श्रयितुंबुद्धिरुपजायतेसासा आश्रयितव्याकारकेचेद्विजानीयाद्यांयांमन्येतसाभवे
दित्यवचः परस्मिन्नकथितंसूत्रभाष्यविरोधादितिभावः। पुनः सदेवेति। प्रियदा प्रियदा
इत्यलौकिकेटाद्युपस्यापिस्थपोधात्वितिलुकिद्वित्वबहुत्वादेरभावात्सुनरप्येकवचने
टाएवभवतीतिभावः। स्यादेतत्। प्रियप्रियपशब्दस्यापिस्थबंतत्वात्प्रातिपदिकत्वाभा
वेकथंस्त्वुत्पत्तिः। समासग्रहणंनियमार्थमितिसिद्धांतात्। अतएवातिदेशिक
समासत्वेस्त्यपिस्थपोलुगेवदुर्लभः। प्रातिपदिकत्वाभावान्नानचसमासग्रहणाम
र्वविध्यर्थमितिवाच्यं। अप्रत्ययपदत्यनुवर्त्यनियमार्थत्वस्यैवस्वीकृतत्वात्। एनच्चवि

सि०र०त्न स्त्रैरेशानिरूपितंतेनत्वास्माभिः।नचबहुव्रीहिवत्कर्मधारयवदित्यतिदेशसामर्थ्यान्नपोत्तु
४७५ शिनिवाच्या।स्वरस्तुबहुव्रीहिवार्थेनस्यात्।अतिदेशसाफल्यात्।अत्रोच्यते।परोऽवत्तदइतिसूत्रे
475 एकैकस्येतिलिंगेनसर्वंसर्वपक्षाःसमाधेयाःइतिदिक्।क्लीबत्वंचेति।तेनकृस्वत्वंसि
द्धंपथायथमिति।ज्ञातेत्यस्यकृदन्तत्वात्कर्मणिषष्ठ्यांप्राप्तायांनलोकेतिनिषेधा
त्द्वितीयैकवचनंनान्तमेतदितिभावः।अभिव्यक्ताइति।लोकेसाहचर्येणप्रसिद्धा
वित्यर्थः।नेहद्वौयुधिष्ठिरार्जुनौ।अतिसहचरितत्वाभावात्।अन्यत्रापीति।तथा
चनस्त्रिसकलत्वमनिपात्यंलोकाश्रयत्वाल्लिंगस्येतिभगवान्पतंजलिराह।इष्यतइति।
चार्थेद्वंद्वइतिलिंगात्सर्वंसिद्धं॥५॥श्री॥ ॥फणीन्द्रभाष्यादिविभाव्ययत्नतःसिद्धान्त राम
रत्नाकरमर्थविस्तृतं।श्रीरामकृष्णोऽरचयद्द्विपार्श्वेनेतेनेष्टदौशंभुहरीप्रसीदतां॥१॥ ४७५
पुनिप्राप्तुपधृन्कोश्रीहिमेरत्नाकरंछुलो।द्विकृन्नप्रक्रियाप्राप्तमूर्द्धंकेदेशप्रसादतः २४

सि॰र॰ख शेषा शेषार्थसिद्धांतकौमुदीमनिगद्गूरांव्याचिख्यासुर्महाशेषं याचेयं यानुवितनुतां ॥४॥
४७६ सोपरत्नाकरेपित्रोस्तिमिलाख्यान्नसूर्यायोः ॥ भून्यर्थमननोद्वामहस्रो गोविंदमानसः
॥ ॥श्री॥ ॥इतिश्रीमद्वैकटाद्रिमहात्मजनतिमिलमहात्मज रामकृष्णभट्टकृतेकौसि
476 द्धांतकौमुदीव्याख्यानेवैयाकरणसिद्धांतरत्नाकरेसर्वांद्ध ॥ ॥संवत १७५८ कार्तिक ७

राम
४७६

नं० ६२ पत्र इसके ४१८ फरे है



सिद्धांतरत्नाकर दर्बीधर

१,१५०.

